अनीकः–कम [अनिति जीवत्यनेन; अन्-ईकन् Uṇ. 4. 16–17] **1** Army, forces; troop, host; दृष्ट्वा तु पाण्डवानीकम् Bg. 1. 2. महारथानां प्रतिदन्त्यनीकम् Ki. 16. 14. पदातींश्च महीपालः पुरोऽनीकस्य योजयेत् H. 3. 73. **–2** A collection, group, mass; नवाम्बुदानीकमुहूर्तलाञ्छने R. 3. 53. **–3** Battle, fight, combat. **–4** A row, line, marching column. **–5** Front, head; chief; रथेषु नोऽनीकेष्वधिश्रियः Rv. 8. 20. 12. (सेनामुखेषु); अग्निर्वै देवानामनीकम् Śat. Br.; अग्निमनीकं कृत्वा. cf. अनीकस्तु रणे सैन्ये सन्देहेऽपि च कथ्यते Nm. **–6** Face, countenance, *ibid* (मुखम्) (तस्य प्राणवायुनिस्सारणात् तथात्वम्); splendour; brilliance; form (तेजस्); स्वनीक Rv. 7. 1. 23, 3. 6 (mostly Ved. in these two senses) **–7** Edge, point. **–Comp.** **–स्थः 1** a warrior, combatant. **–2** a sentinel., (armed) watch. अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः Rām. 6. 32. 34. **–3** an elephant-driver, or its trainer (द्राविडी 'अने' = हत्ती); अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिनो गृह्णीयुः Kau. A 2. 2. **–4** a war-drum or trumpet. **–5** a signal, mark; sign. **–स्थानम्** a military station; Kau. A. 1. 16.

अनीकवत् *a.* Ved. forming the face or front rank; occupying the foremost rank. अग्नयेऽनीकवते पुरोडाशम् TS. 1. 8. 4. 1.

अनीकशः *adv.* In rows or columns.

अनीकिनी [अनीकानां सङ्घः; अनीकं युद्धं प्रयोजनतया अस्त्यस्याः इति वा, अनीक-इनि] **1** An army, host, forces. **–2** Three chamūs or one-tenth of a complete army (अक्षौहिणी); 10935 foot, 6561 horse, 2187 elephants and as many chariots. चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनी। अनीकिनी दशगुणा प्राहुरक्षौहिणीं बुधाः ॥ Mb. 1. 2. 22 **–3** A lotus.

अनीच *a.* **1** Not low or vile, decent, respectable. **–2** Not pronounced with the अनुदात्त accent. **–Comp.** **–अनुवर्तिन्** *a.* not associating with low or vile persons. (*–m.*) a faithful husband.

अनीचिदर्शिन् *m.* A form of Buddha.

अनीड *a* Having no abode (body), incorporeal, epithet of Agni.

अनीतिः *f.* **1** Impropriety, immorality; injustice, wrong act; indiscretion, foolish conduct. **–2** (न ईतिः) Freedom from calamity. **–Comp.** **–ज्ञ, –विद्** *a.* impolite, not discreet, not conversant with policy.

अनीप्सित *a.* Not desired (*p. p.* from the desiderative of आप्) तथायुक्तंचानीप्सितम्; (cf. P. I. 4. 50).

अनीर्षु *a.* Not envious, not conceiving malice; मृतपुत्रा मृतामात्या मृतदारा ह्यनीर्षवः Mb. 12. 221. 31 Poona Critical Edition, B. O. R. I.

अनील *a* Not blue, white &c. °वाजिन् *m.* 'white-horsed'; N. of Arjuna; इतीरिताकूतमनीलवाजिनम् Ki. 14. 26, 42

अनीश *a.* Having no lord or superior, paramount, supreme, without a controller, uncontrolled; सर्वप्रभुरनीशस्त्वम् R. 10. 20. **–2** Not a master or lord, having no mastery or control over; not master of (with gen.); powerless; गात्राणामनीशोऽस्मि संवृत्तः Ś. 2; अनीशया शरीरस्य हृदयं स्ववशं मयि न्यस्तम् V. 2. 19; उर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्। भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥ Ms. 9. 104. **–3** Not one's own master, not independent (अस्वतन्त्र); एको ह्यनीशः सर्वत्र. **–शः** N. of Viṣṇu (सर्वनियन्ता अनन्यस्वामिको हि सः). **–शा** Helplessness (दीनभाव); समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः Muṇḍ. 3. 2.

अनीश्वर *a.* **1** Having no superior, uncontrolled. **–2** Unable; शयिता सविधेप्यनीश्वरा सफलीकर्तुमहो मनोरथान् Bv. 2. 182. **–3** Not relating to God; ध्यानेनानीश्वरान् गुणान् (दहेत्) Ms. 6. 72. **–4** Not acknowledging God, atheistical. **–रम्** The godless one (with Sāṅkhyas), epithet of the world; जगदाहुरनीश्वरम्. **–Comp.** **–वादः** atheism, not acknowledging God as the Supreme Ruler. **–वादिन्** *m.* one who maintains the doctrine of no god or atheism, an atheist.

अनीह *a.* **1** Indifferent, listless. एकान्तेन ह्यनीहोऽयं पराभवति पूरुषः Mb. 3. 32. 39. **–2** Not industrious, lazy; ऋणं धारयमाणस्य कुतः सुखमनीहया Mb 5. 107. 6. **–हः** N. of a king of Ayodhyā. **–हा** Disregard, apathy, indifference, disinclination; अनीहया Ki. 2. 10 carelessly.

अनीहित *a.* Undesired, disagreeable, unpleasant. **–तम्** Displeasure.

अनु *ind.* (Either used with nouns to form adverbial compounds, or as a prefix to verbs and verbal derivatives, or as a separable preposition with acc. and regarded

as a कर्मप्रवचनीय). **1** After, behind, along after (पश्चात्); सर्वे नारदमनु उपविशन्ति V. 5; प्रमदामनु संस्थितः शुचा नृपतिः सन् R. 8. 72; तं गच्छन्त्यनु ये विपत्तिषु सदा ते तत्प्रतिष्ठाशया Mu. 1. 14; असौ कुमारस्तमजोनुजातः R. 6. 78; रत्या च साशङ्कमनुप्रयातः Ku. 3. 23; क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् R. 2. 24; अनुविष्णु = विष्णोः पश्चात् P. II. 4. 18. Sk.; तदनु कथयेर्माधवीयामवास्थाम् Māl. 9. 26 afterwards. **–2** Along, alongside, by the side of, lengthwise यस्यचायामः P. II. 1. 16 जलानि सा तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् R. 13. 61; सोऽश्वमेधशतेनेष्ट्वा यमुनामनु वीर्यवान् । त्रिशताश्वान् सरस्वत्यां गङ्गामनु चतुःशतान् Mb.; अनुगङ्गं वाराणसी = गङ्गामन्वायतम् (गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षिता) situated alongside the Gaṅgā P. II. 1. 16 Sk.; आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् Me. 21; गिरिरिव अनुतटपुष्पितकर्णिकारयष्टिः V. 3. 3 along the sides or slopes. **–3** After, in consequence of, being indicated by; जपमनु प्रावर्षत् P. II 3. 8 Sk. (हेतुभूतजपोपलक्षितं वर्षणम्); so वृक्षमनु विद्योतते विद्युत्. **–4** With, along with (सहार्थे); connected with; नदीमन्वसिता सेना P. I. 4. 85 Sk. (नद्या सह सम्बद्धा) उमास्तनोद्भेदमनु प्रवृद्धः Ku. 7. 24 along with, contemporaneously; Śi. 8. 56; दिवसोऽनुमित्रमगमद्विलयम् 9. 17. **–5** Inferior or subordinate to, (मित्रलाभमनु लाभसम्पदः Ki. 13. 52 inferior, lower in value or importance; अनु हरिं सुराः = हरेर्हीनाः हीने); P. I. 4. 86 Sk. **–6** In a particular relation or state (इत्थंभूताख्याने प्रकारविशेषनिरूपणे); भक्तो विष्णुमनु Sk. (विष्णोरित्थंभूतः, भक्तिविशेषयुक्तः) an ardent devotee of Viṣṇu; यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु Rām. favourably inclined or devoted to. **–7** Having a part or share, participation; or one that claims a share of (भागे); भागोऽस्यास्ति इति भागस्वामी; लक्ष्मीर्हरिमनु (हरेर्भागः) Sk., हरिस्वामिकभागवतीत्यर्थः. **–8** Repetition, in a distributive sense, mostly in comp. (वीप्सार्थे, विषयतायाम्); अनुदिवसम् day by day, every day; अनुक्षणम् every moment; °वेलम् every time, frequently; वृक्षम् वृक्षमनु सिञ्चति Sk. waters tree after tree, *i. e.* every tree (यावद्वृक्षव्यापकः सेकः). **–9** Towards, in the direction of, near, to, at (अनुर्यत्समया P. II. 1. 15); अनुवनमशनिर्गतः Sk.; °नदि Śi. 7. 24 near the river; प्रजिघाय कान्तमनु मुग्धतरः 9. 55 to (प्रति); on or in, with the force of the locative; यदेतदस्यानुतटं विभाति 4. 39, 7. 1; तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णाम् (जह्नोः कन्याम्) Me. 52. **–10** In orderly succession, according to; अनुक्रमम् in regular order; अनुज्येष्ठम् = ज्येष्ठस्यानुपूर्व्येण in order of seniority; °पूर्वम्; अनुरूपम् = रूपस्य योग्यम् Sk. **–11** Corresponding with, like, in imitation of; सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः V. 4. 47; so अनुगर्ज् to roar after or in imitation of. **–12** Following, conformable to (अनुगत); तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् R. 4. 12. (अनुगतोऽर्थो यस्य). **–13** With regard to, towards, in respect of; अर्घ्यदानमनु चोदितो वचः Śi. 14, 53; साधुर्दैवदत्तो मातरमनु; **–14** On account of, by reason of (with abl.); समस्तो बत लोकोऽयं भजते कारणादनु । त्वं तु निष्कारणादेव प्रीयसे वरवर्णिनि ॥ Rām. As a separable adverb अनु is used only in the Vedas and means after, afterwards, later on, now, at this time, again, once more, then, and further. (The senses of अनु as given by G. M. are:— अनु वेदाध्ययनानुष्ठानसामीप्यपश्चाद्भावानुबन्धनसाम्याभिमुखहीनविसर्गलक्षणेषु; *e. g.* वेदे अनुवाकः; अनुष्ठाने अनुतिष्ठति; सामीप्ये अनुमेघं वर्षति; पश्चाद्भावे तदनु; अनुबन्धने अनुशेते; साम्ये अनुकरोति; आभिमुख्ये मातरमनुधावति वत्सः; हीने अनुहरिं सुराः; विसर्गे अनुजानीते; लक्षणे अनुवनमशनिर्गतः.) The senses of अनु may be thus expressed in verse:— आयामेऽपरभावे च (पश्चादर्थे) वीप्सायां सन्निधौ तथा । इत्थंभूते लक्षणे च भागसादृश्ययोरपि ॥ योग्यतायां तथा हीने तृतीयार्थे ह्यनुक्रमे । अर्थेष्वेतेषु बहुशो ह्यनुशब्दः प्रयुज्यते ॥.

अनुः Ved. **1** A man. **–2** N. of a son of Yayāti. **–3** An ancient tribe in India; अनुत्वाहिघ्ने अध देव देवा Rv. 6. 18. 14.

अनुक *a.* [अनु–कन् P. V. 2. 74, अनुकामयते इति अनुकः कमिता Sk.] **1** Greedy; desirous. **–2** Libidinous, lustful (as a lover). **–3** Sloping.

अनुकच्छम् Along or near the marshy ground; आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् (Me. 21).

अनुकथ् 10 P. To relate after (some one else), mention subsequently.

अनुकथनम् Subsequent mention; आदेशः कथनम्, अन्वादेशोऽनुकथनम् Kāśi. on P. II. 4. 32. **–2** Relation, narration; discourse, conversation.

अनुकनीयस् *a.* The next youngest. P. VI. 2. 189.

अनुकम्प् 1 A. To take pity or compassion on, sympathize with, pity (with acc.); किमुज्जिहानजीवितां वराकीं नानुकम्पसे Māl. 10; कथं ब्राह्मणी मामनुकम्पते Mk. 3; कम्पसे नानुकम्पसे 4. 8; with loc. also; सौहृदेन तथा प्रेम्णा सदा मय्यनुकम्पसे Mb. –*Caus.* To pity &c.; शफरीं प्रथमा वृष्टिरिवान्वकम्पयत् Ku. 4. 39.

अनुकम्पक *a.* Pitying, taking compassion on, sympathizing with.

अनुकम्पन *a.* One who pities, kindhearted, compassionate. **–नम्** Compassion, pity, tenderness, sympathy.

अनुकम्पा [कम्प्-अङ्] Compassion, commiseration, pity; with gen.; तेषामेवानुकम्पार्थम् Bg. 10. 11; or with loc.; भक्त्या गुरौ मय्यनुकम्पया च R. 2. 63; or in comp.; भूतानुकम्पा तव चेत् R. 2. 48; अनुकम्पायां कन् P. V. 3. 76.

अनुकम्पित *p. p.* Pitied; °आत्मन् having a compassionate spirit.

अनुकम्पिन् *a.* Pitying (in comp.); sympathizing with.

अनुकम्प्य *pot. p.* Pitiable, worthy of sympathy; किं तन्न येनासि ममानुकम्प्या R. 14. 74; दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् Ku. 3. 76. **–म्प्यः** **1** A courier, express messenger. **–2** An ascetic.

अनुकल्पः An alternative, a second alternative, a make-shift, अभावे हि श्रुतस्य अनुकम्पः प्रतिनिधिः । ŚB. on MS. 6. 3. 35.

अनुकाङ्क्षा Desire, wish.

अनुकाम *a.* [कामस्य सदृशः अनुरूपो वा] 1 Agreeable to, according to one's desire. –2 [अनुकामयते कम्–अच्] Desirous, lustful. **–मम** *ind.* At will, according to desire or wish, as desired, at pleasure. **–मः** [अनुरूपः कामः] Proper or worthy desire; desire; °कृत् fulfilling one's desires.

अनुकामीन *a.* [कामस्य सदृशम् अनुकामम्; ख प्रत्ययः; अनुकामं गामी यथेष्टं गन्ता इत्यर्थः P. V. 2. 11 Sk.] Going at will or pleasure; one who acts as he pleases; अनुकामीनतां त्यज Bk. 5. 15.

अनुकाल *a.* [कालस्य योग्यः] Opportune, timely, adapted or suited to the time. **–लम्** *ind.* Opportunely, on a proper occasion.

अनुकीर्तनम् Act of proclaiming or publishing. असदाचरिते मार्गे कथं स्यादनुकीर्तनम् Mb. 3. 233. 10.

अनुकूल *a.* [अनुगतः कूलं तटं स्नेहादिबन्धनं वा] 1 Favourable, agreeable (lit. following the bank or slope, according to the current, with the grain;), as wind, fate &c.; मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् Me. 9; शान्त °पवनश्च Ś. 4. 11; °परिणामा संवृत्ता Ś. 7; बाणास्त एव मदनस्य ममानुकूलाः V. 3. 20. –2 Friendly, kind, well or kindly disposed. –3 Conformable to; pleasing, agreeable or favourable to, conducing to, capable of; oft. in comp.; स्पर्शानुकूला इव सूर्यकान्ताः Ś. 2. 7; अननुकूलोऽभिमानस्य K. 45 not inclined to pride; दर्शनानुकूलाहमस्य न वेति 197; कुशलविराचितानुकूलवेशः R. 5. 76 befitting, suitable. **–लः** 1 A faithful or kind husband, (एकरतिः S. D. or एकानिरतः एकस्यामेव नायिकायाम् आसक्तः), a variety of नायक. –2 'Favourable to all', epithet of Viṣṇu. **–ला** 1 N. of a tree (दन्ती) Croton Polyandrum. –2 N. of a metre. **–लम्** 1 Favour, kindness; नारीणामनुकूलमाचरति चेत् K. P. 9. –2 (Rhet.) A figure in which unfavourableness turns into kindness; अनुकूलं प्रातिकूल्यमानुकूल्यानुबन्धि चेत् S. D.; कुपितासि यदा तन्वि निधाय करजक्षतम् । बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा ॥.

अनुकूलता, –त्वम् 1 Favour, conformity, kindness, good will; पवनस्यानुकूलत्वात् R. 1. 42 the wind being favourable. –2 Prosperity.

अनुकलयति Den. P. To conciliate, propitiate, act in a friendly way towards; (तम्) अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः Ku. 2. 39; अस्यानुकूलय मतिं मतिमन्ननेन Ki. 13. 71; Śi. 7. 11.

अनुकूलित *a.* One who is honoured or well received; मन्त्रिणो नैगमाश्चैव यथार्हमनुकूलिताः Rām. 7. 74. 6.

अनुकृ 8 U. 1 To do after or afterwards; follow; especially to imitate, do after or in imitation of, resemble, equal, copy (with gen.); ततोऽनुकुर्याद्विशदस्य तस्याः... स्मितस्य Ku. 1. 44; श्यामतया हरेरिवानुकुर्वतीम् K. 10; अनुकरोति भगवतो नारायणस्य 6. 282; ननु कलभेन यूथपतेरनुकृतम् M. 5; (also with acc.); सर्वाभिरन्याभिः कलाभिरनुचकार तं वैशम्पायनः K. 76; शैलाधिपस्यानुचकार लक्ष्मीम् Bk. 2. 8; बहुतरं भवन्तमनुकरोति V. 5; Ms. 2. 199. –2 To requite, recompense. –3 To try on, adjust, adapt; बन्धं ततोऽनुकुर्वीत Suśr.

अनुकर *a.* Imitating. **–रः** An assistant.

अनुकरणम्, –कृतिः *f.* 1 Imitation; त्वदीयसुचरितैकदेशस्यानुकरणं किलैतत् Mu. 7. –2 Copy, resemblance, similarity; शब्दानुकरणम् onamatopoeia; अव्यक्तानुकरणस्यात इतौ P. VI. 1. 98; V. 4. 57; I. 4. 62; धूमोद्गारानुकृतिनिपुणाः Me. 71. –3 Compliance; ओमित्येतदनुकृति ह स्म वै Taitt. Up. 8.

अनुकर्तृ *m.* 1 An imitator. –2 Actor, performer.

अनुकर्मन् *n.* 1 Imitation. –2 [पश्चात्कृतं कर्म] A subsequent rite. *–m.* N. of one of the Viśvedevas.

अनुकारः [कृ–घञ्] Imitation, resemblance; सुलभानुकारः खलु जगति वेधसो निर्माणसंनिवेशः Māl. 9.

अनुकारिन् *a.* Imitating, resembling (with gen. or in comp.); प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विलोभयामि Ś. 6; अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि Ś. 2. 17; 1. 21; R. 1. 43. कपिलानुकारिणा 3. 50.

अनुकार्य, –करणीय, –कर्तव्य *pot. p.* Fit to be imitated. **–र्यम्, –अनुक्रिया** A subsequent rite or ceremony.

अनुक्रीः [अनु–कृ उणा० बा. ई. किच्च Tv.] A kind of sacrificial rite called साद्यस्क.

अनुकीर्ण *a.* Filled, Pervaded; अनुकीर्णं महारण्यं ब्राह्मणैः समपद्यत Mb. 3. 26. 1. Crowded, crammed.

अनुकृत *a.* Imitated, made like. **–तम्** *n.* 1 Return. –2 Defence; जघ्नतुस्तौ तदान्योन्यं कृतानुकृतकारिणौ Rām. 6. 107. 27.

अनुकृपायते Den. A. to sympathize or condole with. अनुकृप् To mourn for, long; अनु पूर्वीः कृपते वावशाना Rv. 1. 113. 10.

अनुकृष् 1 P. To drag after oneself, to attract (in gram.); see अनुकर्ष below. *–Caus.* To subject.

अनुकर्षः, –र्षणम् 1 Dragging after, drawing along; attraction in general. –2 Summoning or invoking (by means of spells). –3 Grammatical attraction, application or attraction of a word in a preceding rule to a subsequent rule, word &c.; नायमनुकर्षणार्थश्चकारः Mbh. on P. II. 2. 4; see also Sk. on P. VI. 1. 127. –4 [अनुकृष्यते स्वसम्बद्धेन चक्रेण] The axle-tree or bottom of a carriage. –5 Delayed performance of a duty.

अनुकर्षन् *m.* The bottom of a carriage.

अनुकृष्ट *a.* Drawn after, attracted. –2 Implied; included.

अनुक्लृप् 1 A. To follow duly. *–Caus.* To cause others to follow duly.

अनुकल्पः [अनुगतः मुख्यं कल्पम्] 1 A secondary direction or precept, a substitute or alternative to be used in times of necessity when the primary one (प्रथमकल्प) is not possible: as the direction to use गोधूम or तण्डुल in the absence of यव; प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते Ms. 11. 30, 3. 147. **–2** A work connected with Kalpa (one of the six auxiliaries of the Vedas).

अनुक्त *a.* **1** Unuttered, unsaid (in gram.) = अनभिहित q. v. under अभिधा. **–2** Unheard of, extraordinary. **–3** Not told; असावनुक्तोऽपि सहाय एव Ku. 3. 21

अनुक्थ *a.* Without hymns or songs of praise; किं मामनिन्द्राः कृणवन्ननुक्थाः Rv. 5. 2. 3.

अनुक्रकच *a.* [अनुगतः क्रकचम्] Serrated, dentated like a saw.

अनुक्रन्द् **1** P. To cry after, reply to the sound; यं क्षोणीरनुचक्रदे Rv. 8.3.10. वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यमी कुक्कुटाः Mal. 9. 7.

अनुक्रन्दनम् A cry in reply.

अनुक्रम् 1 U., 4 P. **1** To go after, follow (fig. also): महर्षिभिरनुक्रान्तं धर्मपन्थानमास्थितः Rām; to betake oneself to; तीर्थयात्रामनुक्रामन् Mb.; व्यवसायमनुक्रान्ता कान्ते त्वमतिशोभनम् Rām. **–2** To count up, enumerate, state or go through in order; यच्चानुक्रान्तं यच्चानुक्रंस्यते Mbh. on P. I. 1. 72; give a table of contents, used frequently in the Nirukta.

अनुक्रम *a.* [अनुगतः क्रमम्] In due order. **–मः 1** Succession, order, sequence, arrangement, method, due order; प्रचक्रमे वक्तुमनुक्रमज्ञा R. 6. 70; श्वश्रूजनं सर्वमनुक्रमेण 14. 60; गृहीतानुक्रमाद्दाप्यो Y. 2. 41. **–2** A table of contents, index, such as that of the Vedic Saṁhitās. **–3** Routine order, daily practice; मानेन रक्ष्यते धान्यमश्वान् रक्षत्यनुक्रमः Mb. 5. 34. 40. (अनुक्रमः व्यायामशिक्षादिः इति भाष्यकारः).

अनुक्रमणम् **1** Proceeding in order. **–2** Following. **–णी, –णिका** [स्वार्थे कन्] A table of contents, an index showing the successive contents of a work. उभे सन्ध्ये जपन्किञ्चित् सद्यो मुच्येत किल्बिषात् । अनुक्रमण्या यावत्स्यादह्ना रात्र्या च सञ्चितम् ॥ Mb. 1. 1. 263.

अनुक्रुश् **1** P. To shout at or after. –*Caus.* To join in lamenting, condole with, show sympathy. तावदिमान् बालवृक्षान् उदकप्रदानेन अनुक्रोशयिष्यामि । Pratimā. 5.

अनुक्रोशः **1** Pity, compassion, tenderness (with loc.); भगवन्कामदेव न ते मय्यनुक्रोशः Ś. 3; Me. 117; किमपि सानुक्रोशः कृतः made to relent Ś. 4; न ते मां प्रति अनुक्रोशः Ś. 3. **–2** One who has gone over a krośa (2 miles) (अनुगतः क्रोशम्).

अनुक्षणम् *ind.* Every instant, constantly, frequently.

अनुक्षत्तृ *m.* (**–त्ता**) The attendant of a door-keeper or charioteer.

अनुक्षपम् *ind.* Night aftar night; Ki.

अनुक्षेत्रम् Stipend given to certain temple-worshippers in Orissa in commutation of the proceeds of an endowment,

अनुख्या 2 P. Ved. To descry, see from a distance; अनु पूर्वाणि चख्यथुर्युगानि Rv. 7. 70. 4.

अनुख्यातिः *f.* **1** Descrying. **–2** Reporting, revealing.

अनुख्यातृ *m.* (**–ता**) A discoverer; reporter.

अनुगम् 1 P. **1** To go after, follow, attend, accompany; अनभिज्ञो गुणानां यो न भृत्यैरनुगम्यते Pt. 1. 73; ओदकान्तात्स्निग्धो जनोऽनुगन्तव्यः Ś. 4; केकारवैरनुगम्यमानो भूषणनिनादः K. 84; मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् R.2.2; छायेव तां भूपतिरन्वगच्छत् 6, Ms. 12. 115; **–2** To follow, practise, observe, obey, act up to; प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात् K. 104; पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते Rām.; विपत्तौ च महाँल्लोके धीरतामनुगच्छति H. 3. 37. **–3** To seek, wander through; काननं वापि शैलं वा यं रामोऽनुगमिष्यति Rām.; कृत्स्नां पृथ्वीमनुगच्छत *ibid.* go in quest of. **–4** To come, arrive, approach, present oneself (as time); काले त्वनुगते Bhāg. **–5** To answer or respond to; correspond with, be suitable to; imitate, resemble; धनुःश्रियं गोत्रभिदोऽनुगच्छति Ki. 4. 326; आस्फालितं यत्प्रमदाकराग्रैर्मृदङ्गधीरध्वनिमन्वगच्छत् R. 16. 13; न चापि कादम्बरीं लक्ष्मीरनुगन्तुमलम् K. 203. **–6** To go or die out, be extinguished; यद्येष उख्योऽग्निरनुगच्छेत् Śat. Br. **–7** To enter into. –*Caus.* [गमयति] To cause to follow, follow; उद्ग्रीवैरनुगमितस्य पुष्करस्य M. 1. 21 followed or accompanied in sound.

अनुग *a.* [अनुगच्छतीति, गम्-ड] (In comp.) Following, going after; corresponding or tallying with, adequate to; सदा पृष्ठानुगः पुरे Pt. 1. 59; गीतानुगं वारि मृदङ्गवाद्यम् R. 16. 64; Me. 47; कामक्रोधवशानुगम् Ms. 2. 214; गोत्ररिक्थानुगः पिण्डः 9. 142 governed or regulated by; 8. 239. **–गः** A follower, (obedient) servant, companion; तद्भूतनाथानुग R. 2. 58, 9. 82; बल° followed by an army, being the head of an army.

अनुगत *p. p.* **1** (Used passively) (*a*) Followed (lit. & fig.), attended; अनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय R. 12. 102; M. 3. 9; मद्यानुगतभोजनं मलावहम् Ms. 11. 70. (*b*) Full of, filled with; दारिद्र्येणाभिभूतेन त्वत्स्नेहानुगतेन च Mk. 4. 5; वर्षधरकलमूकानुगतेन परिजनेन K. 159 consisting or made up of; चिन्तानुगतसर्वात्मन् Mb. (*c*) Covered, as by a dress hanging behind; शिवमिवानुगतं गजचर्मणा Ki. 5. 2 (पश्चाद्व्याप्तम्). (*d*) Extinguished &c. (*e*) Acquired, obtained. (*f*) Overtakan; कालेनानुगतो ह्यसि Rām. 7. 68. 6. **–2** (Used actively) (*a*) Following, obeying; observing; स्वमतमनुगतः Mu. 5. 19; विभवानुगता भार्या Mk. 3. 28; दिग्विजयप्रसङ्गेनानुगतो भूमिमिमाम् K. 191 come to; Ms. 9. 267; K. 166; Mu. 6. 5; H. 2. 55; R. 15. 9. (*b*) Corresponding or tallying with, adapted or answering to, in harmony with; सूत्रेणानुगतं भवति Ś. B.; पादन्यासो लयमनुगतः M. 2. 8 in accompaniment to the musical time; मृदङ्ग °तः सङ्गीतमधुरः Ratn. 1; °वीणैः Śi. 11. 10. (*c*) Adequate or suitable to, fit for; प्रस्तावानुगतं पृष्टः Pt. 5. (*d*) Imitating; परितुष्टोऽस्मि यत्पितरमनुगतो वत्सः M. 5. I am glad that the boy takes after his father. **–तम्** Moderate time in music. **–Comp. –अर्थ** *a.* having a corresponding or easily discoverable sense.

अनुगतिः *f.* **1** Following; बलस्य चतुरङ्गस्य नायकानुगतिर्नयः Rām.; गतानुगतिको लोकः Pt. 1. 342. following, imitating; see under गत. **–2** Consent, approval; अकाम° forced consent.

अनुगमः, –मनम् **1** Following; आत्मानुगमनेन गां प्रसादयितुमर्हसि R. 1. 88; बृहतेर्धातोरर्थानुगमात् Ś. B. **–2** Comprehending, grasping (as a sense); रसाद्यनुगतः S. D. **–3** Following in death, post-cremation, self-immolation of a widow on her husband's funeral pile. **–4** Imitating; approaching. **–5** Conformity, accordance; श्रुत्यनुगमाच्च Ś. B.

अनुगामिन् *a.* Following. *–m.* A follower = अनुग.

अनुगामुक *a.* Habitually or constantly following.

अनुगर्ज् **1** P. To roar after or in imitation of.

अनुगर्जित *p. p.* Roared. **–तम्** A roaring echo, अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः Ku. 6. 40.

अनुगव *a.* [गोः सदृशः आयामः, अच्] Suiting (the length of) the oxen.

अनुगवीनः [अनुगु गोः पश्चात्पर्याप्तं यथा गच्छति सोऽनुगवीनः गोपालः; अनुगु ख P. V. 2. 15 Sk.] A cowherd.

अनुगादिन् *a.* [गद्–णिनि] Repeating, following in speaking, echoing. (P. V. 4. 13).

अनुगिरम् *ind.* By the mountainside अयं सुजातोऽनुगिरं तमालः R. 13. 49.

अनुगीता *f.* An after-song. N. of a part of the fourteenth book of the Mb (Chs. 16–92).

अनुगीति See under अनुगै.

अनुगुण *a.* [अनुकूलो गुणो यस्य] Having similar qualities, of the same nature; कान्तारतापसाविक्षू वंशकानुगुणौ स्मृतौ Suśr.; conformable to, favourable or agreeable to, suitable, according to; मनोरथस्यानुगुणं सर्वदा यस्य चेष्टितम् Mv. 7. 7 obedient to the will 7. 38; गुणसम्पदानुगुणतां गमितः Ki. 6. 33; 10. 13; congenial, suitable, fit; °अन्नलाभात् Dk. 64, 94; अननुगुणदाराणाम् Dk. 130 not having wives worthy of themselves; (वीणा) उत्कण्ठितस्य हृदयानुगुणा वयस्या Mk. 3. 3 agreeable or pleasing to the heart, exactly after the heart (Tv. here takes °णा mean तन्त्रीयुक्तवीणा itself); अत्र द्वावप्युपध्मानीयावेव न शान्तानुगुणौ R. G.; रसानुगुणतामेति S. D.; °णं सर्वास्ववस्थासु यत् U. 1. 39. **–णः** A natural peculiarity. **–णम्** *adv.* **1** Favourably, conformably to one's desires; चिरेणानुगुणं प्रोक्ता प्रतिपत्तिपराङ्मुखी Bk. 8. 95. **–2** Agreeably or conformably to (in comp.); तदादेशानुगुणं भवदागमनमभूत् Dk. 11. **–3** Naturally.

अनुगुणत्वम् Favourableness.

अनुगुणयति Den. P. To make favourable, conciliate; bring about, secure; सम्पदोऽनुगुणयन् सुखैषिणाम् Ki. 13. 44.

अनुगुप्त *a.* Covered, sheltered.

अनुगै 1 P. **1** To sing after (a person), sing to (a tune); follow in singing; अनुगायति काचिदुदञ्चितपञ्चमरागम् Gīt. 1; अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः Ki. 3. 60 sent back, echoed. **–2** To sing; to celebrate in song.

अनुगीतम् Singing in response to; झङ्कारस्यानुगीतैरनुरणनमिवारभ्यते भृङ्गसार्थैः Ratn. 1. 19.

अनुगीतिः *f.* N. of a metre of two lines, the first having 27 and the second 32, mātrās, a species of the Āryā metre.

अनुगृहम् The roof of a house; कर्णकीलायसम्बन्धोऽनुगृहं सेतुः (cf. Kaut. A. ch. 65.)

अनुग्रह् 9 P. (Ved. –गृभ्णाति). **1** To favour, oblige, treat with kindness; शिलातलैकदेशमनुगृह्णातु वयस्यः Ś. 3 our friend will be so good as to, or kindly, take a seat on the stone; अयं विष्टरोऽनुगृह्यताम् V. 5 be pleased to sit down &c.; महेन्द्रेण पुनरनुगृहीता V. 3 favoured (by modifying the curse); with instr. or abl. of that which is an obligation; अनुगृहीतोऽहमनया मघवतः सम्भावनया Ś. 6; कतरत्कुलमनुगृहीतं भगवत्या जन्मना K. 135; अनुगृहीतोऽस्मि अहमुपदेशाद्भवतः V. 4. I am much obliged to you &c. (अनुगृहीत is oft. used by itself in the sense of 'much obliged', 'many thanks', 'I thank you', 'I esteem it as a favour'.) **–2** To foster, cherish, protect, maintain (as fire); अग्निर्नित्यानुगृहीतः स्यात् Āśval. **–2** To receive, welcome. **–4** To hold up, support, uphold. त्रिभिस्तीक्ष्णैर्महावेगैरन्वगृह्णाच्छिरः शरैः Mb. 6. 120. 45. **–5** To follow in robbing, seizing or depriving. **–6** To keep to, conform or correspond to, follow, take after; आकृतिमनुगृह्णन्ति गुणाः Vb. 2; क्षात्रधर्मश्चानुगृहीतो भवति U. 5. *–Caus.* To cause to favour, or to favour; आर्यस्य दर्शनेनात्मानमनुग्राहयितुम् Mu. 4.

अनुग्रहः, –हणम् **1** A favour, kindness, obligation; showing favour, obliging, rewarding (opp. निग्रह); निग्रहानुग्रहकर्ता Pt. 1; पादार्पणानुग्रहपूतपृष्ठम् R. 2. 35; अनुग्रह इवेयमभ्यर्थना Ś. 1; अनुग्रहं संस्मरणप्रवृत्तम् Ku. 3. 3. **–2** Assistance, help (shown to the poor in feeding them &c. दरिद्रादिपोषणम्). **–3** Facilitating by spells. **–4** Acceptance. **–5** Rear-guard. **–Comp.** **–कातर** *a.* anxious to please or for favour. **–सर्गः** creation of feelings or mental conditions.

अनुग्राह्य *pot. p.* Fit to be favoured or obliged; ततः कथनेनात्मानमनुग्राह्यमिच्छामि K. 134; न वयमनुग्राह्याः प्रायो देवतानाम् 61.

अनुग्राहक *a.* **1** Favouring, furthering, promoting. **–2** Gracious, kind.

अनुग्रासकः A mouthful; the equivalent of a mouthful.

अनुघटनम् Linking together with; क्षिप्ता कथानुघटनाय मयापि वाणी K. 240.

अनुघट्ट् To stroke, to rub lengthwise.

अनुचर् 1 P. **1** To follow, pursue, go after; to serve, attend or wait upon; पित्रोः पादाननुचरन् K. 368 serving. **–2** To traverse, seek after, go through, wander. **–3** To conduct oneself, behave.

अनुचरः **1** A companion, follower, attendant, servant; तेनानुचरेण धेनोः R. 2. 4; आत्मानुचरस्य भावं जिज्ञासमाना 26, 52; Me. 3; विबुधानुचराः Ms. 12. 47. In comp. attended or followed by; वानर°, राक्षस° &c. **–2** Following a spy (चरमनुगतः). **–रा, –री** **1** A female attendant. **–2** A logical or due strophe.

अनुचरित *p. p.* Followed &c. attended, विद्याधरानुचरितं किन्नरीभिस्तथैव च Mb. 3. 158. 39. **–तम्** Walk; walk in life; conduct.

अनुचारकः A follower, servant &c. ... सहचरस्तु स्यादनुचारे सहाशने । Nm. **–रिका** A female servant.

अनुचर्चिः *f.* Ved. Repeating (in a chorus).

अनुचित *a.* **1** Wrong, improper. **–2** Unusual; unfit. **–अर्थः** An unusual meaning.

अनुचिन्त् 10 P. To consider, think of, call to mind; धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः Ś. 2. 10; परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् Bg. 8. 8; धर्मार्थौ चानुचिन्तयेत् Ms. 4. 92.

अनुचिन्ता, –अनुचिन्तनम **1** Calling to mind, thinking of, meditating upon. **–2** Recalling, recollecting. **–3** Constant thinking, anxiety.

अनुच्छादः The part of a man's under-garment which is allowed to hang down in front from the waist to the feet (Mar. निऱ्या).

अनुच्छित्तिः *f.*, अनुच्छेदः Non-extirpation; non-destruction; indestructibility. अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा । Bṛ. Up. (?)

अनुच्छिष्ट *a.* Not rejected; pure, holy; fresh, unused; °यौवना Dk. 112.

अनुजन् 4 A. **1** To be born after, arise or be produced after, to follow in being born, arising &c.; पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते Ms. 9. 134; अथवा जायमानस्य यच्छीलमनुजायते Mb. **–2** To take after (one's parents); to be born similar to.

अनुज,–जात *p. p.* Born after, later, younger; राममनुजातः P. III. 4. 72; असौ कुमारस्तमजोऽनुजातः R. 6. 78; पुमांसमनुरुध्य जाता पुमनुजा Sk.; so स्त्र्यनुजा. **–जः, –जातः** **1** A younger brother; दन्तजातेऽनुजाते च कृतचूडे च संस्थिते । अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥ Some interpret the word अनुजात there to mean 'a child which has not, cut teeth.' Ms. 5. 58. **–2** A cadet; born again, after born, younger, later. **–3** Taking after. अनुजातो हि मां सर्वैर्गुणैः श्रेष्ठो ममात्मजः Rām. 2. 2. 11. **–4** Born again, invested with the sacred thread. **–5** Equal, resembling; एकस्त्वमनुजातोऽसि पितरं बलवत्तरम् Rām. 6. 76. 72. **–जा, –जाता** **1** younger sitser. **–2** N. of a plant (त्रायमाणालता). **–जम्** N. of a palnt (प्रपौण्डरीक; Mar. पुण्डरीक), **–Comp.** **–अवर** *a.* lower than the younger, youngest.

अनुजनः Attendants, followers. Mb. 4.

अनुजन्मन् *m.* [अनु जन्म यस्य] A younger brother; जननाथ तवानुजन्मनाम् Ki. 2. 17; Śi. 13. 2. 14.

अनुजीव् 1 P. **1** To depend upon for subsistence, hang on, live by or upon (something); ये च त्वामनुजीवन्ति नाहं तेषां न ते मम Rām.; स तु तस्याः पाणिग्राहकमनुजीविष्यति Dk. 122 hang or depend on, live (submissively) under, live as a subordinate to. **–2** To see without envy; यां तां श्रियमसूयामः पुरा दृष्ट्वा युधिष्ठिरे । अद्य तामनुजीवामः Mb. **–3** To live for any one. **–4** To follow or imitate in living; प्रेमदत्तवदनानिलः पिबन्नन्वजीवदमरालकेश्वरौ R. 19. 15 v. l. (अत्यजीवत्). **–5** To survive.

अनुजीविन् *a.* Dependent, living on or upon. *–m.* A dependent, servant, follower; अवञ्चनीयाः प्रभवोऽनुजीविभिः Ki. 1. 4, 10; भर्तुश्चिन्तानुवर्तित्वं सुवृत्तं चानुजीविनाम् Pt. 1. 69. °वृत्तम् conduct of a courtier; Kau. A. 5.

अनुजीव्य *a.* **1** To be served (as a master). **–2** To be followed in living; आचार्यो गुरवो वृद्धा वृथा वां पर्युपासिताः । सारं यद्राजशास्त्राणामनुजीव्यं न गृह्यते ॥ Rām. 6. 29. 9.

अनुज्ञा 9 U. **1** To permit, allow (a person or thing); assent or consent to, approve; authorise, sanction; तदनुजानीहि मां गमनाय U. 3. so let me go; सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् Ś. 4. 9 permitted to go; ततोऽनुजज्ञे गमनं सुतस्य Bk. 1. 23; M. 1. 19; तन्मया प्रीतिमताऽनुज्ञातम् Ś. 5 approved, agreed to. **–2** To betroth, affiance; मां जातमात्रां धनमित्रनाम्नेऽन्वजानाद्भार्यां मे पिता Dk. 50. **–3** To excuse, forgive; अनुप्रवेशे यद्वीर कृतवांस्त्वं ममाप्रियम् । सर्वं तदनुजानामि Mb. **–4** To repent, be sorry for. **–5** To request, entreat, beg; त्वां साहमनुजानामि न गन्तव्यमितो वनम् Rām. **–6** To treat or behave kindly, favour; ते मां वीर्येण यशसा... अस्त्रैश्चाप्यन्वजानत Mb. **–7** To dismiss, bid farewell (usually in caus.). *–Caus.* (–ज्ञापयति) **1** To ask or beg for, request. **–2** To ask permission, ask for leave; take leave of, bid adieu to; सोऽपि तत् श्रुत्वा...वानरमनुज्ञाप्य स्वाश्रयं गतः Pt. 4; तं चक्रधरमनुज्ञाप्य स्वगृहं गतः 5; अतिथिं चाननुज्ञाप्य Ms. 4. 122; 9. 82; स मातरमनुज्ञाप्य तपस्येव मनो दधे । जग्मतुश्च यथाकाममनुज्ञाप्य परस्परम् Mb.

अनुज्ञा, –ज्ञानम् [ज्ञा-अङ्-ल्युट् वा] **1** Permission, consent, sanction; गुरोरनुज्ञामधिगम्य मातः (v. l. ऋषेरनुज्ञाम्) R. 2. 66. **–2** Permission or leave to depart. **–3** Excusing, forgiving, allowance made for faults. **–4** An order, command. **–Comp.** **–एषणा, –प्रार्थना** requesting permission, taking leave.

अनुज्ञात *p. p.* **1** Permitted, allowed, ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात् । स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ॥ Ms. 2. 116. **–2** assented to, granted, honoured, favoured. **–3** authorised. **–4** dismissed. **–5** Taught; शिष्याणामखिलं कृत्स्नमनुज्ञातं ससंग्रहम् Mb. 12. 318. 24.

अनुज्ञापकः One who commands or orders.

अनुज्ञापनम्, –ज्ञप्तिः *f.* Authorising. **–2** Issuing an order or command.

अनुज्येष्ठ *a.* [अनुगतो ज्येष्ठम्] Next to the eldest. **–ष्ठम्** *adv.* According to seniority.

अनुतप् 1 P. **1** To heat; vex, annoy (fig.). **–2** (4 A. or *pass.*) To repent, grieve, be sorry for, be stung with remorse; विविधैरनुतप्यन्ते दयितानुनयैर्मनस्विन्यः V. 3. 5 (v. l. for निर्वृतैर्व्यपत्रपन्ते &c.); तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयानुतेपे Ki. 17. 40. *–Caus.* To pain, afflict, distress विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् R. 8. 89.

अनुतप्त *p. p.* **1** Heated. **–2** Filled with regret, repentant.

अनुतापः **1** Repentance, remorse, contrition, subsequent regret or sorrow; जातानुतापेव सा V. 4. 67 stung with remorse; ख्यापनेनानुतापेन (पापकृन्मुच्यते पापात्) Ms. 11. 228. **–2** Heat.

अनुतापन *a.* Causing distress or regret or sorrow.

अनुतापिन् *a.* Repentant, sorry.

अनुतर See under **अनुतॄ.**

अनुतर्षः [तृष्-घञ्] **1** Thirst, desire to drink; सोपचारमुपशान्तविचारं सानुतर्षमनुतर्षपदेन Śi. 10. 2 (thirst and liquor). **–2** Wish, desire. **–3** Drinking spirituous liquors. **–4** A drinking vessel (used in drinking spirituous liquors). **–5** Liquor itself, Śi. 10. 2.

अनुतर्षणम् = अनुतर्ष 3 and 4.

अनुतिल *a.* Following तिल (as a field). **–लम्** *ind.* Grain after grain, *i. e.* by grains or very minutely.

अनुतुन्न *a.* Ved. Depressed or repressed (in sound), unruffled.

अनुतूलयति Den. P. To rub (as the point or end of grass) with cotton; P. III. 1. 25.

अनुतूलनम् Rubbing in this manner.

अनुतॄ 1 P. **1** To go across or to the end. **–2** To stretch lengthwise.

अनुतरम् [अनुतीर्यते अनेन; तॄ–करणे अप्] Fare, freight.

अनुत्क *a.* Not over-anxious, not repentant or regretful; self-complacent अपरः कोकिलोऽनुत्को यं प्रतिश्रुत्य कूजति । Bu. ch. 4. 51.

अनुत्कट *a.* Short, small; Hch. 2.

अनुत्त *a.* Ved. [उन्द्-क्त न. त. P. VIII. 2. 61] **1** Not moistened or wet; तुभ्यमिदद्रिवोऽनुत्तम् Rv. 1. 80. 7. **–2** Not set, driven forth or urged (अप्रेरित); invincible (?).

अनुत्तम *a.* [न उत्तमो यस्मात्] **1** Than which there is nothing better, having no superior or better, unsurpassed, the very best or highest, incomparably or preeminently the best; सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् H. Pr. 4; काङ्क्षन् गतिमनुत्तमाम् Ms. 2. 242; Y. 1. 87; अदस्त्वया नुन्नमनुत्तमं तमः Śi. 1. 27 all-pervading; Bg. 7. 18; Ms. 2. 9; 5. 158; 8. 81. **–2** Not the best. **–3** (in gram.) Not used in the उत्तम or first person. **–मः** N. of Śiva or Viṣṇu. **–Comp. –अम्भस्, –अम्भसिकम्** a term in Sāṅkhya Philosophy, said to mean 'indifference to and abstinence from sensual enjoyment, as fatiguing or involving injury to external objects.'

अनुत्तर *a.* [नास्ति उत्तरो यस्मात्] **1** Principal, chief. **–2** Best, excellent; अनुत्तराणि विलसितानि Dk. 162 uusurpassed. शरीरसौख्यार्थमनुत्तरस्य निपेततुर्मूर्धनि तस्य सौम्ये । Bu. ch. 1. 35. **–3** [नास्ति उत्तरं यस्य] Without a reply, silent, unable to answer; भवत्यवज्ञा च भवत्यनुत्तरात् Naiṣadha. **–4** Fixed, firm (न उत्तरति चलति). अथ्यं तथ्यं हितं वाक्यं लघुयुक्तमनुत्तरम् Mb. 2. 2. 5. **–5** Low, inferior, base, mean. **–6** Southern. **–रम्** [न. त.] No reply, a reply which, being evasive, is considered to be no reply. **–राः** (pl.) A class of gods among Jainas (°उपपातिक). **–उपपातिकदशाः** *f.* Title of the ninth aṅga of the Jainas treating of those gods. **–रा** The south. ...अनुत्तरः । नोदीच्यां नोपरि श्रेष्ठे... । Nm. **–Comp. –योगतन्त्रम्** Title of the last of the four Bauddhatantras.

अनुत्तरङ्ग *a.* Steady, not ruffled (by waves); अपामिवाधारमनुत्तरङ्गम् Ku. 3. 48.

अनुत्तालः A melodious note; Hch. 4.

अनुत्थानम् Absence of exertion. अनुत्थाने ध्रुवो नाशः Kau. A.

अनुत्पत्तिः *f.* Failure, non-production. **–त्तिक** *a.* Not yet produced. **–Comp. –धर्मक्षान्तिः** preparation for a future state, acquiescence in the state and moral condition which is yet to come. **–समः, –मा** a method of arguing against a thing by attempting to prove that nothing exists from which it could spring.

अनुत्पन्न *a.* Not produced or born, unborn, unproduced &c.

अनुत्पादः Not coming into existence, not taking effect. **–Comp. –क्षान्ति** see अनुत्पत्तिधर्मक्षान्ति.

अनुत्साह *a.* Destitute of energy or determination. **–हः** Want of determination, energy &c.; listlessness, languor, indifference.

अनुत्सुक *a.* Moderate, not overeager, retiring, calm.

अनुत्सूत्र *a.* Not deviating from the Sūtra (of Pāṇini or of morality); not anomalous or irregular; °पदन्यासा सद्वृत्तिः सन्निबन्धना Śi. 2. 112.

अनुत्सेकः Absence of haughtiness or pride; °को लक्ष्म्याम् Bh. 2. 64; modesty; °कः खलु विक्रमालङ्कारः V. 1; cf. "Modesty is the handmaid of heroism".

अनुत्सेकिन् *a.* Not puffed up, not proud or arrogant; भाग्येषु °नी भव Ś. 4. 18.

अनुद *a.* [न नुदति or अनुददाति तुल्यं ददाति, दा-क] Ved. Not urging or driving onward; or, emulating others in giving (तुल्यरूपदातृ); see अनानुद.

अनुदक *a.* 1 Waterless (as a desert). याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः Rv. 7. 50. 4. -2 Having very little water (as a puddle). -3 Devoid of the libations of water (a sort of श्राद्ध).

अनुदग्र *a.* 1 Not lofty, low. -2 Soft, tender; weak, not sharp.

अनुदर *a.* 1 Having a slender waist; thin, lank; °राजकन्या Sk. (अल्पार्थे नञ्, see अ).

अनुदा 3 U. To give back, restore; to yield, grant, remit.

अनुदेयी 1 Restoration. -2 A female companion.

अनुदात्त *a.* Grave (accent); not elevated or raised (not pronounced with the Udātta accent); उच्चैरुदात्तः नीचैरनुदात्तः; accentless, having the neutral, general tone; उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः uttered with the grave accent (as a vowel); प्रयत्नप्रेरितो वायुर्यदोर्ध्वभागे प्रतिहतोऽचं निष्पादयति स उदात्तः; एवमधोनिष्पन्नोऽच् अनुदात्तः; ताल्वादिषु सभागेषु स्थानेषु नीचभागे निष्पन्नोऽच् अनुदात्तः; °त्तं पदमेकवर्जम् Sk. (The term अनुदात्त is used by Pāṇini for the grave accent which immediately precedes the Udātta, and also for the general accentless tone neither high nor low, termed एकश्रुति, the one monotonous intonation belonging to the generality of syllables in a word). **-त्तः** The grave accent. **-Comp. -आदिः** a nominal base of which the first syllable is अनुदात्त. **-इत्** a verbal root having for its अनुबन्ध the grave accent (denoting that it takes the Ātm. terminations only). **-उदयम्** a syllable followed (immediately) by the grave accent. **-तर** *a.* more than अनुदात्त; still lower or graver accent, *i. e.* that which immediately precedes a syllable having the उदात्त or स्वरित accent and is thus more depressed than the ordinary अनुदात्त accent.

अनुदार *a.* 1 Not liberal, niggardly; not high or noble. -2 Having none more liberal, very liberal, or great.

अनुदार *a.* (अनुगतो दारान्) 1 Adhering to or followed by a wife; यस्मिन्प्रसीदसि पुनः स भवत्युदारोऽनुदारश्च K. P. 4. (used in sense 1 also). -2 Having a suitable or worthy wife (अनुरूपाः दाराः यस्य).

अनुदित *a.* 1 Unsaid, not uttered. -2 Not risen or appeared forth.

अनुदिनम् **-दिवसम्** *ind.* Daily, day after day; पारावतः खलु शिलाकणमात्रभोजी कामी भवेदनुदिनं वद कोऽत्र हेतुः Udb.; अनुदिवसं परिहीयसेऽङ्गैः Ś. 3.

अनुदिश् 6 P. To point out, assign. **-अनुदिशम्** *ind.* In every quarter.

अनुदेशः 1 Pointing back; rule or direction which refers or points back to a previous rule; यथासङ्ख्यमनुदेशः समानाम् P. I. 3. 10; subsequent mention of things (words, suffixes &c.) in the order of things previously mentioned; respective enumeration or statement, first for first, second for second; as in समूलाकृतजीवेषु हन्कृञ्ग्रहः P. III. 4. 36. -2 Direction, order, injunction.

अनुदेशिन् *a.* Pointing or referring back; being the object of an अनुदेश.

अनुदृश् 1 P. To survey, behold; to keep in view or mind, see in prospect; पूर्वेषां पन्थामनुदृश्य धीराः Rv. 10. 130. 7. न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे Bg. 1. 31; न संसारोत्पन्नं चरितमनुपश्यामि कुशलम् Bh. 3. 3. -*Caus.* To show, tell, inform as follows; सेनापतिः पुत्रमाग्निमित्रं परिष्वज्य अनुदर्शयति M. 5. writes or informs as follows.

अनुदर्शनम् Inspection, survey; उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने Rām.; consideration, regard; जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् Bg. 13. 8 perception.

अनुदृष्टि *a.* Having a favourable look. **-ष्टिः** *f.* A favourable look.

अनुद्रष्टृ *a.* Benefactor; अनसूयुरनुद्रष्टा सत्कृतस्ते पुरोहितः Rām. 2. 100. 11.

अनुदैर्घ्य *a.* [दैर्घ्यमनुगतः] Longitudinal, lengthwise.

अनुद्धत *a.* Not raised or puffed up; °ताः सत्पुरुषाः समृद्धिभिः Ś. 5. 12; humble; modest; unsurpassed.

अनुद्धरणम् 1 Not removing or taking away. -2 Not offering, establishing or proving.

अनुद्धात *a.* Even, without ups and downs रथेनानुद्धातस्तिमितगतिना तीर्णजलधिः Ś. 7. 33.

अनुद्धारः 1 Non-partition; not taking a share (विंशोद्धारशून्यो विभागः). -2 Non-removal.

अनुद्धृत *a.* Undivided, unremoved, uninjured, unharmed, undestroyed, unoffered or established &c. **-Comp. -अभ्यस्तमयः** taking place of sunset, while the आहवनीय fire continues to be unremoved from the गार्हपत्य.

अनुद्भट *a.* 1 Not bold; soft, mild. -2 Not exalted or lofty.

अनुद्य *a.* unutterable; P. III. 1. 101. Sk.

अनुद्यत, अनुद्यम *a.* Not diligent, idle, inactive.

अनुद्यूतम् Repeated playing or gambling; N. of a part of the Sabhāparvan (Chap. 70-79).

अनुद्योग *a.* Lazy, not industrious. **-गः** Idleness, inactivity.

अनुद्रु 1 P. 1 To run after, follow, accompany. अश्वेति विद्रुतमनुद्रवताश्वमन्यम् Śi. 5. 59. -2 To chase, pursue.

अनुद्रुत *p. p.* 1 Followed, pursued; धनुर्धरं राजसुतैरनुद्रुतम् R. 3. 38; 12. 67; 16. 25; Śi. 1. 52; (sometimes used actively). -2 Sent or brought back (as sound). **-तम्** A measure of time in music = half *druta*, or one-fourth of a Mātrā (or of the time taken to utter a short vowel); अर्धमात्रं द्रुतं ज्ञेयं द्रुतार्धं चाप्यनुद्रुतम्.

अनुद्वाहः Non-marriage, celibacy.

अनुद्विग्न *a.* Easy in mind, secure.

अनुद्वेग *a.* Free from anxiety or apprehension. **-गः** Security or freedom from fear. अदैन्यमनुदीर्णत्वमनुद्वेगो व्यवस्थितिः Mb. 12. 274. 18.

अनुधाव् 1 P. **1** To run after; follow; ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति U. 1. 10 the sense follows the words (the words being not uttered with a view to a particular sense); स्वरुचिं निश्चयतोऽनुधावति Śi. 16. 44 follows his own will. **-2** To run up to, approach. **-3** To cleanse, wash.

अनुधावनम् **1** Going or running after, following, pursuing; तुरग °कण्डितसन्धेः Ś. 2. **-2** Close pursuit of an object (for the knowledge of truth); research, investigation. **-3** Seeking a mistress, though unattainable. **-4** Cleansing, purification.

अनुधूपित *a.* Puffed up, proud, ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि Rv. 2. 30. 10.

अनुध्यै 1 P. **1** To think of, muse, consider attentively. **-2** To wish well of, to bless, favour; प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति R. 14. 60 bless; अनुदध्युरनुध्येयं सांनिध्यैः प्रतिमागतैः 17. 36 favoured.

अनुध्या [ध्यै-अङ्] **1** Thinking or wishing well of, favouring, attachment. यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम् Bhāg. 1. 2. 15. **-2** Sorrow; प्रेतो यन्तु व्याधः प्रानुध्याः Av. 7. 114. 2.

अनुध्यान *p. p.* Mused, thought of &c. **-तम्, -नम्** [ध्यै-ल्युट्] **1** Thought; अनुध्यानानन्तरमेव K. 262; meditation, religious contemplation. **-2** Thinking of, remembrance; या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसम्भवा Ku. 6. 21. **-3** Wishing well of, affectionate solicitude for; अनुध्यानैरुपेतव्यं वत्सयोर्भद्रमस्तु वः (v. l. अनुध्यातै) U. 7. 11; सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भव U. 1.

अनुध्यायः [ध्यै कर्तरि घञ्] One who wishes well of.

अनुध्येय *a.* To be favoured or wished well of; अनुदध्युरनुध्येयम् R. 17. 36.

अनुनद् 1 P. To sound towards or at (with acc.). *-Caus.* To cause to sound, make resonant, fill with echo; पृथिवीं चान्तरिक्षं च सागरांश्चानुनादयन्; साधु साध्विति नादेन पृथिवीमन्वनादयन्; विहङ्गैरनुनादितम् Mb. made musical or resonant.

अनुनादः [अनुरूपो नादः] Sound, noise; गुरुतरकलनूपुरानुनादम् Śi. 7. 18; reverberation, echo.

अनुनादिन् *a.* Echoing, sounding, resonant. तस्यास्फोटितशब्देन महता चानुनादिना। पेतुर्विहङ्गा गगनादुच्चैश्चेदमघोषयन् ॥ Rām. 5. 42. 32.

अनुनन्द् 1 P. To enjoy.

अनुनय, -नायिका See under अनुनी.

अनुनासिक *a.* [अनुगतो नासिकाम्] **1** Nasal, pronounced through the nose; मुखसहितनासिकया उच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् Sk.; मुखनासिकावचनोऽनुनासिकः P. I. 1. 8; अमोऽनुनासिका न ह्रौ Śikṣā: अनुनासिक being a name for the 5 nasal consonants, the vowels or the consonants य्, व्, ल् (under certain circumstances): *i. e.* the letters included in the प्रत्याहार अम् except ह् and र्. **-2** The sign used to mark the nasalization in the case of य्, व् or ल्. **-कम्** The nasal twang. **-Comp. -आदिः** a conjunct consonant beginning with a nasal.

अनुनिर्देशः Description or relation following the previous order or sequence: भूयसामुपदिष्टानां क्रियाणामथ कर्मणाम्। क्रमशो योऽनुनिर्देशो यथासङ्ख्यं तदुच्यते S. D.

अनुनिर्वापः Subsequent libation (with clarified butter).

अनुनिर्वाप्या A ceremony connected with this libation

अनुनिशीथम् *ind.* At midnight; Ki.

अनुनी 1 P. **1** To conciliate, win over, induce, persuade, prevail upon; request, supplicate, entreat, propitiate, pacify, appease (anger &c.); स चानुनीतः प्रणतेन पश्चात् R. 5. 54; विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे 19. 38, 43; Bk. 5. 46; 6. 137; त्वत्सङ्गमेन मम तत्तदिवानुनीतम् V. 3. 20 pacified, made favourable or agreeable; Ki. 13. 67; M. 5; K. 168, 178; Dk. 3, 4, 7. **-2** To cherish love; विद्विषोऽप्यनुनय Bh. 2. 77; cf. Shakespeare "Cherish those hearts that hate thee". **-3** To bring near to (with dat. of peason). **-4** To train, discipline. **-5** To honour.

अनुनय *a.* [नी-अच्] Kind, conciliatory, pacifying (as words). तुल्यदुःखोऽब्रवीद्भ्राता लक्ष्मणोऽनुनयं वचः Rām. 4. 27. 33. **-यः** **1** Conciliation, propitiation, pacification (of anger), friendly persuasion; कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् R. 2. 54; कथं वा तेषामनुनयः कृतः H. 4; प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति Ś. 4. **--2** Courtesy, civility, courteous or polite behaviour, modesty, modest or respectful deportment, conciliatory act (such as salutation); showing respect (to a guest, deity &c.); विविधैरनुतप्यन्ते दयितानुनयैर्मनस्विन्यः V. 3. 5; दयितजन° 2. 22; वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम् S. D. 458. **-3** An humble supplication or entreaty, a request in general; भद्र प्रियं नः किंतु त्वदभिप्रायापरिज्ञानान्तरितोऽयमस्मदनुनयः Mu. 2; R. 6. 2; निषेधवाक्यालङ्कारजिज्ञासानुनये खलु Ak; °आमन्त्रणम् conciliatory address. **-4** Discipline, training, regulation of conduct. **-यम्** *adv.* Fitly, suitably.

अनुनयिन् *a.* Courteous, polite, hnmble, supplicating.

अनुनीतिः = अनुनय q. v.; सानुनीतिश्च सीतायै नाक्रुध्यत् Bk. 8. 75 adopting a conciliatory tone; भजते कुपितोऽप्युदारधीरनुनीतिं नतिमात्रकेण सः Śi. 16. 55.

अनुनायक *a.* Submissive, humble, supplicating.

अनुनायिक *a.* Conciliating; प्रियतमेषु वधूरनुनायिका Śi. 6. 7. **-का** A female character subordinate to the Nāyikā or leading character, such as a friend, nurse, maid-servant &c.; सखी प्रव्रजिता दासी प्रेष्या धात्रेयिका तथा। अन्याश्च शिल्पकारिण्यो विज्ञेया ह्यनुनायिकाः ॥

अनुनेय (–नीय) *a.* Favourable; अनुनेयानि जल्पन्तम् Mb. 7. 85. 25 To be conciliated; Mk.

अनुन्नत *a.* Not raised or elevated, not lifted up. **–Comp. –आनत** *a.* level (neither raised nor lowered). **–गात्र** *a.* having limbs not stout or prominent.

अनुन्माद, –अनुन्मत्त *a.* Not mad or frantic, sober, calm, sane.

अनुप = अनूप, q. v.

अनुपकारिन् *a.* **1** Not obliging, ungrateful, not making a return for benefits received. **–2** Worthless, useless.

अनुपक्षित *p. p.* Not injured or destroyed (अनुपक्षीण). द्युमदग्ने सूवीर्यं वर्षिष्ठमनुपक्षितम् Rv. 3. 13. 7; Av. 6. 78. 2.

अनुपगीत *a.* Not praised. **–तम्** *ind.* So that no other person accompanies in singing.

अनुपघातः Absence of damage or detriment; °अर्जित obtained without any detriment (to the paternal estate).

अनुपजीवनीय *a.* Not yielding or granting livelihood, having no livelihood.

अनुपद् 1 P. To say after, repeat.

अनुपठित *p. p.* Read through, repeated in imitation of the teacher's instruction.

अनुपठितिन् *a.* Who has read through, proficient.

अनुपत् 1 P. **1** To fly to or towards. **–2** To fly or run after, follow (fig. also); pursue, chase; मुहुरनुपतति स्यन्दने दत्तदृष्टिः Ś. 1. 7; कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः Ś. 1; न यत्र प्रत्याशामनुपतति नो वा रहयति (चेतः) Māl. 9. 8 does not run after (cherish), hope or leave it; यस्यैवं भवन्तः कुटुम्बवृत्तिमनुपतिताः Mv. 1; अनुपतति रजनीं पूर्वसन्ध्या Śi. 11. 40. **–2** To fall upon, attack; प्राग्वीराननुपत्य Māl. 8. 9. *–Caus.* **1** To fly to. **–2** To throw another down along with oneself.

अनुपतनम्, –पातः **1** Falling upon, alighting upon in succession. **–2** Following, going after, pursuit; उपवनपवनानुपातदक्षैः Śi. 7. 27. **–3** Going or proceeding in order or as a consequence. **–4** [अनुरूपः त्रैराशिकेन पातः] Proportion. **–5** Rule of three. **–6** A degree of latitude, opposite to one given. **–तम्** *ind.* (regarded as ending in *ṇamul* from पत्) Following in succession, going after; लतानुपातं कुसुमान्यगृह्णात् Bk. 2. 11 (लतां लतामनुपात्य going to creeper after creeper, or after bending the creepers.)

अनुपातिन् *a.* Following as a result. *–m.* A follower; मदनुपातिनामेष पन्थाः Dk. 168.

अनुपथ *a.* [पन्थानमनुगतः] Following the road. **–थः** **1** A road, favourable road; अन्तस्पथा अनुपथाः Rv. 5. 52. 10 (अनुकूलमार्गाः) **–2** an attendant; क एतेऽनुपथा ये ते एकादश महाभटाः Bhāg. 4. 25. 27. **–थम्** *adv.* Along the road.

अनुपद् 4 A. (P. in epic poetry) **1** To go after, follow, attend. **–2** To be fond of, be attached to (as a wife); उतथ्यस्य यवीयांस्तु ममतामन्वपद्यत Mb. **–3** To enter, go to or into. **–4** To fall down, come down (to the earth); वसुधामन्वपद्येतां वातनुन्नाविव द्रुमौ Mb. **–5** To enter upon, betake oneself to; जितमित्येव तानक्षान्पुनरेवान्वपद्यत, ध्यानमेवान्वपद्यत Rām.; पुत्रौ दृष्ट्वा सुसंभ्रान्ता नान्वपद्यत किंचन Mb. did not do anything else. **–6** To find, discover, see, notice; दीर्घं दध्यौ....निमित्तं सोऽन्वपद्यत Bhāg. **–7** To lose (with abl.) महत्त्वान्नान्वपद्येताम् Mb. **–8** To handle. **–9** To fall to the share of (Ved.)

अनुपद् *a.* [पद्-क्विप्] Ved. Coming to pass. *–f.* Food (got every day) (अनुदिनलभ्यमन्नम्).

अनुपद *a.* [पदान्यनुगतः] **1** Following the feet closely. **–2** Following every word; °सूत्रम् a commentary (of a Brāhmaṇa) explaining the text word for word. **–दः** N. of a man or tribe. **–दम्** A chorus, burden of a song or words sung again at regular intervals. *–ind.* [पदानां पश्चात्] **1** Along the feet, near the feet; अनुपदं बद्धा अनुपदीना Sk. **–2** Step by step, at every step; स्खलिताभिरप्यनुपदं प्रमदाः प्रणयातिभूमिमगमन्गतिभिः Śi. 9. 78. **–3** Word for word. **–4** On the heels of, close behind or after, immediately after (of time or space); अनुपदमन्वेष्टा अनुपदी Sk.; गच्छतां पुरो भवन्तौ । अहमप्यनुपदमागत एव Ś. 3 I shall be close behind you, just follow you; °दमुच्चलित एव K. 263, 264; oft. with gen. or in comp. in this sense; लक्ष्मीवाननुपदमस्य संप्रतस्थे Ki. 12. 54; (तौ) आशिषामनुपदं समस्पृशत् पाणिना R. 11. 31; अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः 1. 44. 14. 81; दर्शनानुपदमेव Śi. 14. 48.

अनुपदिक *a.* [अनुपदमस्त्यस्य गन्तृत्वेन, ठन्] Following, gone after.

अनुपदिन् *a.* [अनुपद्–इनि P. V. 2. 90] Following, seeking after or for a searcher, inquirer; अनुपदमन्वेष्टा गवामनुपदी Sk.; क्षणदाकरेऽनुपदिभिः प्रयये Śi. 9. 70; मृगस्यानुपदी रामो जगाम गजविक्रमः Bk. 5. 50.

अनुपदीना [आयामार्थे अनु, पदस्यायामतुल्यायामः, तेन बद्धा ख] A shoe (boot, buskin, or slippers) of the length of the foot (अनुपदं बद्धा अनुपदीना उपानत् P. V. 2. 9. Sk.).

अनुपदवी A way, road.

अन्तरित *p.p.* **1** Gone between, intervening. **–2** Gone within, hidden, concealed, covered, screened, shielded, protected (from view) by something; पादपान्तरित एव विश्वस्तामेनां पश्यामि Ś. 1 hid behind a creeper; सारसेन स्वदेहान्तरितो राजा H. 3 screened; विटपान्तरितास्तिष्ठ Ś. 3; नालिनीपत्रान्तरितं प्रियसहचरमपश्यन्ती Ś. 4; शार्दूलचर्मान्तरितोरुपृष्ठम् Ku. 7. 37 covered; Dk. 21, 146; K. 28, 152, 200; पर्वतान्तरितो रविः set. Ak.; त्वगन्तरिततृतीयलोचनम् K. 108, R. 10. 8; उन्मादमोहान्तरितोऽपि Māl. 9; तल्पमन्तरितभूमिभिः कुथैः R. 19. 2. **–3** Gone in, reflected; स्फटिकभित्त्यन्तरितान् मृगशावकान् reflected in the crystal wall. **–4** (*a*) Concealed, made dormant, impeded, hindered, prevented; त्वदभिप्रायापरिज्ञानान्तरित एवायमनुनयः Mu. 2 prevented from being made; त्वद्वाञ्छान्तरितानि साध्यानि Mu. 4. 15 prevened from being actually effected &c.; द्विषत्प्रतापान्तरितोरुतेजाः Ki. 3. 45 obscured; नोपालभ्यः पुमांस्तत्र दैवान्तरितपौरुषः Pt. 2. 133. (*b*) Separated, lost to view, made invisible by interposition; मुहूर्तान्तरितमाधवा दुर्मनायमाना Māl. 8; भर्तुरेतान्यक्षराणि बिम्बान्तरितानि M. 3; धनमित्राख्ययान्तरितः Dk. 36; चन्द्रापीडनामान्तरितस्य चन्द्रमसः K. 338; प्रतिनिवर्तमानयात्राजनसंकुलेन अन्तरिते तस्मिन् Māl. 2; क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया Ku. 4. 22 separated (from me) by the next world, i. e. dead, deceased; मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी S. D. (*c*) Drowned, obscured removed, eclipsed; परलोकभयमैहिकदुःखेनान्तरितम् Dk. 82. drowned, eclipsed, obscured; वीरलोकसाधुवादेनान्तरितः समरतूर्यरवः Ve. 4 drowned; विस्मयान्तरितशोकवृत्तान्ता K. 322; कार्यान्तरितोत्कण्ठम् V. 3. 4 forgotten, removed; इन्दुप्रकाशान्तरितोडुतुल्याः R. 16. 65 obscured by moon-light. –5 Disappeared, vanished, departed, retired, withdrawn; (महामृगः) आश्रमान्तरितः शीघ्रं प्लवमानो महाजवः Mb. 3. 311. 9. अन्तरिते तस्मिञ्शबरसेनापतौ K. 33; नाथदेहस्पर्शेन अन्तरित एव सन्तापः U. 6 has disappeared, has been removed. **–6** Passed over, omitted; अये मध्यमाम्बावृत्तान्तोऽन्तरित एवार्येण U. 1; कथान्तरेणान्तरितमिदम् M. 5 put off, delayed. **–7** Slighted, despised. **–8** (In Math.) That which remains, the remainder **–9** A technical term in architecture.

अन्तरि–री–क्षम् [अन्तः स्वर्गपृथिव्योर्मध्ये ईक्ष्यते, ईक्ष् कर्मणि घञ्, अन्तः ऋक्षाणि अस्य वा पृषो° पक्षे ह्रस्वः ऋकारस्य रित्वं वा Tv., according to Nir. अन्तरा द्यावापृथिव्योः क्षान्तं अवस्थितं भवति, or अन्तरा इमे द्यावापृथिव्यौ क्षयति निवसति; or शरीरेष्वन्तः अक्षयं न पृथिव्यादिवत् क्षीयते] **1** The intermediate region between heaven and earth; the air, atmosphere, sky (अन्तरा द्यावापृथिव्योर्मध्ये ईक्ष्यमाणं व्योम Sāy.) दिवं च पृथिवीं चान्तरिक्षमथो स्वः Sandhya Mantra; योऽन्तरेणाकाश आसीत्तदन्तरिक्षमभवदीक्षं हैतन्नाम ततः पुरान्तरा वा इदमीक्षमभूदिति तस्मादन्तरिक्षं Śat. Br. दिव्यन्तरिक्षे भूमौ च घोरमुत्पातजं भयम् Rām. 2. 1. 43 **–2** The middle of the three spheres or regions of life. **–3** Talc. (Mar. अभ्रक) **–4** A synonym of a pent-roof. Māna. 18. 174-75. **–Comp.** **–उदर** *a.* whose inside is as wide as the atmosphere. (**–रम्**) the interior of the atmosphere.**–कान्तः** a class of ten-storeyed buildings. Māna. 28. 14-15. **–क्षित्**, **–सद्** *a.* dwelling in the atmosphere. **–गः**, **–चरः** a bird (moving through the atmosphere). ततोऽन्तरिक्षगो वाचं व्याजहार नलं तदा Mb. 3. 53. 20. **–गत** *a.* moving in air; अब्रवीच्च तदा वाक्यं जातक्रोधो बिभीषणः। अन्तरिक्षगतः Rām. 6. 16. 18. **–जलम्** water of the atmosphere, dew. **–प्रा** *a.* [अन्तरिक्षं प्राति पूरयति, प्रा–विच्] filling the atmosphere; illuminating the sky, travelling through the atmosphere. **–प्रुत्** *a.* [अन्तरिक्षं प्रवते गच्छति, प्रु क्विप्] floating over the atmosphere, sweeping or going through it. **–लोकः** the intermediate region, regarded as a distinct world; त्रयो लोका एत एव वागेवायं लोकः (earth) मनोन्तरिक्षलोकः, प्राणोऽसौ लोकः (heaven) Śat. Br. **–शंसित** *a.* sharpened in the atmosphere. **–सद्यम्** [अन्तरिक्षे सद्यं सदनं, सद् भावे यत्] dwelling or residence in the atmosphere.

अन्तरि -री -क्ष्य *a.* [भवार्थे यत्] Aerial, atmospheric.

अन्तरीपः [अन्तः मध्ये गता आपो यस्य बहु. अ P. V. 4. 74. अप ईत् द्व्यन्तरुपसर्गेभ्योऽपईत्; P. VI. 3. 97] A portion of land stretching out into the sea, promontory; an island (being situated in and surrounded on all sides by, water). सान्तरीपश्च सागरः Śiva. B. 18.13; दृष्ट्वा तानि ध्रुवमुपगतः सैन्धवादन्तरीपात्। Rām. ch. 4. 96

अन्तरे,– रेण See under अन्तर.

अन्तर्गम् 1 P. **1** To go between, interpose, intervene (so as to exclude). **–2** To be included or comprised in. **–3** To vanish, disappear (mostly used in past part. only).

अन्तर्गत *p. p.* **–गामिन्** *a.* **1** Gone into or between, crept into (as a bad word &c.). **–2** Being or seated in, included in or by, existing in, belonging to; °शवे ग्रामे Ms. 4. 108; लघुद्वीपा जम्बूद्वीपान्तर्गता एव H. 3.; पार्थिवानि च भूतानि सागरान्तर्गतानि च Rām. **–3** Being in the interior, hidden, concealed, internal, inward, secret, suppressed; अन्तर्गतमपास्तं मे रजसोऽपि परं तमः Ku. 6. 60 inward; सौमित्रिरन्तर्गतबाष्पकण्ठः R. 14. 53 with suppressed tears; K. 60; °तां हृदयशुद्धिम् 135 inward; अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावम् R. 2. 43 internal, seated in the breast or heart; °फलारम्भाः 10. 59; °तो हृदयाभिलाषः K. 143; °तेन चन्द्रापीडेन 198; नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः inward or secret motives of the mind Pt. 1. 44; बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् Ms. 8. 25; °गतप्रार्थनम् Ś. 7. 2 inwardly longing (for the same). **–4** Slipped out of memory, forgotten. **–5** Vanished, disappeared. **–6** Destroyed. **-Comp.** **–उपमा** a concealed simile (the particle of comparison being omitted.) **–मनस्** = अन्तर्मनस् q. v.

अन्तर्धा 3 U. **1** To place or keep within, deposit; उदुम्बरशाखामन्तर्धाय अभिषिञ्चति Ait. Br. **–2** To receive within or into oneself, admit, take in; तथा विश्वंभरे देवि मामन्तर्धातुमर्हसि R. 15. 81; contain, comprise, include; (शास्त्रमेतत्) अन्तर्धास्यति तत्सर्वमेतद्वः कथितं मया Mb. **–3** To indicate, exhibit, display. **–4** To hide or conceal oneself from, avoid the sight of, (with abl. and used in *Atm.*); उपाध्यायादन्तर्धत्ते P. I. 4. 28. Com. अन्तर्धत्स्व रघुव्याघ्रात् Bk. 5. 32; मत्तो मान्तर्धिथाः सीते 6. 15. अन्तर्दधानां रक्षोभ्यः 8. 71; **–5** To cover up, conceal from view, hide, obscure, envelope, wrap up, veil; सध्वजं सरथं साश्वं भीष्ममन्तर्दधे शरैः Mb. 6. 118. 37. eclipse (fig.); अनृतेनात्मानमन्तर्धाय Ch. Up.; भौमं (रजः) अन्तर्दधे लोकमावृत्य सवितुः प्रभां Rām. enveloped, covered; पितुरन्तर्दधे कीर्तिं शीलवृत्तिसमाधिभिः Mb. obscured or eclipsed. –*pass.* **1** To be received within, be absorbed; to be covered up or concealed, be obscured or rendered invisible, become invisible; to vanish, disappear, cease to exist; इषुभिर्व्यतिसर्पद्भिरादित्योऽन्तरधीयत Mb.; ते चान्तर्दधिरे नागाः *ibid*; रात्रिरादित्योदयेऽन्तर्धीयते Nir. disappears; आत्मन्यन्तर्दधे, तत्रैवान्तरधीयत &c. –*Caus.* (–धापयति) To render invisible, conceal.

अन्तर्धा [धा भावे अङ्] Covering, concealment &c.; अन्तर्धामुपययुरुत्पलावलीषु Śi. 8. 12.

अन्तर्धानम् [धा-ल्युट्] Being invisible, disappearance, passing out of sight; °व्यसनरसिका रात्रिकापालिकीयम् K. P. 10; °गम् or इ to become invisible, disappear. **–Comp.** **–गत** *a.* disappeared, invisible. **–चर** *a.* moving invisibly.

अन्तर्धायक *a.* Concealing, rendering invisible.

अन्तर्धिः *f.* [धा–कि] Disappearance, concealment; hiding oneself from (another); अन्तर्धौ येनादर्शनमिच्छति P. I. 4. 28; अन्तर्धिं द्रुतमिव कर्तुमश्रुवर्षैः Śi. 8. 42.

अन्तर्हित *p. p.* **1** Placed between, separated, rendered invisible by interposition, hidden, concealed; अब्रुवन्त्राह्मणाः सिद्धा भूतान्यन्तर्हितानि च Mb. 3. 37. 21. अन्तर्हिता शकुन्तला वनराज्या Ś. 4; covered (with something else); अन्तर्हिताशापथो जलदकाल इव K. 293; शेष्वानन्तर्हितायां त्वं भूमौ Rām. uncovered or bare ground; पात्रेषु दर्भान्तर्हितेषु अप आसिच्य Āśval.; अन्तर्हिते आवाम् V. 2; अन्तर्हिता यदि भवेद्वनिता न वेत्ति Mk. 3. 4 a disguised male, a female in male dress. –**2** Disappeared, vanished, become invisible; इति मन्त्रयमाणः स्वयमन्तर्हितः Ś. 4 withdrew from sight, became invisible; अन्तर्हिते शशिनि Ś. 4. 2; तस्यायमन्तर्हितसौधभाजः R. 13. 40 dwelling in a palace hidden under (the waters). –**Comp.** –**आत्मन्** *m.* N. of Śiva.

अन्तर्भू 1 P. To be contained, comprised or included in; be inherent or implied in; कदा न्वन्तर्वरुणे भुवानि Rv. 7. 86. 2. केचिदन्तर्भवन्त्येषु K. P. 8.; गुणाश्चिरन्तर्नैरुक्ता ओजस्यन्तर्भवन्ति ते S. D.; अन्तर्भूय रहस्येषु तैर्वशीक्रियते हि सः Ks. 34. 204; वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः। अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ॥ Ms. 12. 87. –*Caus.* To contain, include, imply, involve; अन्तर्भावितण्यर्थोऽत्र नमिः P. III. 1. 88. Sk. involving a causal sense.

अन्तर्भव *a.* Inward, internal, inwardly situated.

अन्तर्भावः **1** being included or comprised in, inclusion; तेषां गुणानामोजस्यन्तर्भावः K. P. 8. –**2** Inherent or natural condition or disposition. –**3** Disappearance, becoming invisible; सर्वे अन्तर्भावं गताः Dk. 26.

अन्तर्भावना **1** Inclusion. –**2** Inward meditation or anxiety. –**3** A technichl term in arithmetic, rectification of numbers by the differences of the products.

अन्तर्भूत *p. p.* **1** Included or contained in; कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥ Hari. –**2** Inward, internal, internally situated; एष वै भगवान् विष्णुरन्तर्भूतः सनातनः.

अन्तर्य *a.* Inner.

अन्तस्त्यम् Intestines; Ait. Br.

अन्तार *a.* [अन्त ऋ अण्] A cowherd; Śabda. ch.

अन्ति *ind.* [अन्त-इ] Ved. **1** Near, before, in the presence of; न ह्री नु वो मरुतो अन्त्यस्मे Rv. 1. 167. 9; 1.79. 11. –**2** (Prep.) To, in the vicinity of (with gen.); मुग्धप्रभीतवदुपेयतुरन्ति मात्रोः Bhāg. 10. 8. 22. –**तिः** *f.* An elder sister (in dramas). –**Comp.** –**ऊति** *a.* ready with help. (–**तिः** *f.*) protection of what is near (आसन्नरक्षण); अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम् Rv. 1. 138. 1. –**गृहम्** a house near one's own dwelling, the neighbourhood of the house. –**देव** *a.* being near the god; an adversary (at dice); पाथो हि ष्मा वृषणाअन्तिदेवम् Rv. 1. 180. 7. –**मित्र,** –**वाम,** –**पुम्ण** *a.* near or at hand with help, wealth, or kindness; अन्तिवामा दूरे Rv. 7. 77. 4 (निकटस्थधना).

अन्तिका **1** An elder sister. –**2** An oven, fire-place. –3 N. of a plant (सा-शा-तलाख्यौषधिः; Mar. शिकेकाई).

अन्तिक *a.* [अन्तः सामीप्यम् अस्यास्तीति मत्वर्थीयः ठन्; according to Nir. from आ-नी; अन्तिकं कस्मात् आनीतं भवति सन्निकृष्टत्वात्] **1** Near, proximate (with gen. or abl. P. II. 3. 34). वैरमान्तिकमासाद्य यः प्रीतिं कर्तुमिच्छति। मृन्मयस्येव भग्नस्य यथा सन्धिर्न विद्यते॥ Mb. 12. 139. 69. –**2** Reaching to the end of, reaching to; नासान्तिक Ms. 2. 46. –**3** Lasting till, until; as far as, up to; षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् Ms. 3. 1; ग्रहणान्तिकम् Y. 1. 36. –**कम्** Nearness, proximity, vicinity, presence; न त्यजन्ति ममान्तिकम् H. 1. 43; oft. in comp.; °न्यस्त R. 2. 24; **कर्ण–°चरः** Ś. 1. 23; सिंहासनान्तिकचरेण सहोपसर्पन् M. 1. 12 a servant in attendance upon the throne. –**कः** A class of two storeyed buildings; Māna. 20. 94. 26–27. – *adv.* (with abl. or gen. or as last member of comp.) Near (to), in the vicinity; अन्तिकं ग्रामात्–ग्रामस्य वा Sk.; into the presence or proximity of; दूरस्थस्यैत्य चान्तिकम् Ms. 2. 197; प्रविष्टे पितुरन्तिकम् Rām.; so जनान्तिकम्, मृगान्तिकम्; अन्तिकेन near (with gen.) अन्तिकेन ग्रामस्य P. II. 3. 35; अन्तिकात् near, closely, within the presence of; from the proximity of, from near, from (abl. or gen. or acc.); °कादागतः P. VI. 2. 49; रजःकणैःस्पृशद्भिर्गात्रमन्तिकात् Rām.; क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् Ms. 9. 174 from; so नैव प्रवृत्तिं शृणुमस्तयोः कस्यचिदन्तिकात् Rām.; अन्तिके near, closely, in the presence of or proximity of; दूरस्थं चान्तिके च तत् Bg. 13. 15; दमयन्त्यास्तदान्तिके निपेतुः Nala. 1. 22; °के स्त्रियाः Ms. 2. 22. –**Comp.** –**आश्रयः** resorting to what is near, contiguous support (that given by a tree to a creeper).

अन्तितः *ind.* Ved. Near.

अन्तिम *a.* [अन्ते भवः, अन्त डिमच्] **1** Immediately following. –**2** Last, final, ultimate; अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः H. 1. –**Comp.** –**अङ्कः** the last digit, the number nine. –**अङ्गुलिः** the little finger (कनिष्ठिका).

अन्ती An oven, fire-place.

अन्त्य *a.* [अन्ते भवति वसति &c., अन्ताय हितः; अन्त-यत्] **1** Last, final (as a letter, word &c.); last (in time, order or place) P. I. 1. 47; as ह of letters, Revatī of asterisms, Mīna of the zodiacal signs. &c.; अन्त्ये वयसि in old age R. 9. 79; अन्त्यं ऋणम् R. 1. 71 last debt; °मण्डनम् 8. 71 last funeral decoration, Ku. 4. 22. –**2** Immediately following (in comp.); अष्टम ° ninth. –**3** perishable, transitory; देहाद्यपार्थमसदन्त्यमभिज्ञमात्रं (विन्देत) Bhāg 12. 8. 44. –**4** Lowest (in rank, degree or position), undermost, worst, inferior, base, vile, wretched; °अवस्थां गतः Pt. 4. 110 reduced to the worst plight; अन्त्यासु दशासु Pt. 1. 336 at perilous (critical) times; belonging to the lowest caste; चण्डाल °स्त्रियः Ms. 11. 175; °स्त्रीनिषेविणः 12. 59; अन्त्यादपि वरं रत्नं स्त्रीरत्नं दुष्कुलादपि;

शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः (साक्ष्यं कुर्युः) 8. 68, 3. 9; 4. 79; Y. 1. 148, 2. 294. **−न्त्यः 1** A man of the lowest caste; see above. **−2** N. of a plant (मुस्ता Mar. नागरमोथा) (*f.* also) (the roots of which are prescribed for colic). **−3** The last syllable of a word. **−4** The last lunar month i. e. Fālguna. **−5** A Mlechcha, foreigner, barbarian. अन्त्येषु स विनिक्षिप्य पुत्रान् यदुपुरोगमान् Mb. 1. 86. 12. −6 (In Vaiśeṣika Phil.) A name for the category विशेष; अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः Bhāṣā P. **−न्त्या 1** A technical name for त्रिज्या in astronomy. **−2** A woman of the lowest tribe. **−न्त्यम् 1** A measure of number; 1000 billions (1000,000,000,000,000.) **−2** The 12th sign of the zodiac. **−3** The last member or term of a progression (series), the last figure; स्थाप्योन्तवर्गो द्विगुणान्त्यनिघ्नः Līlā. **−Comp. −अनुप्रासः** see under अनुप्रास. **−अवसायिन्** *m.*, *f.* (**°यी, °यिनी**) a man or woman of the lowest caste, begotten by a chāṇḍāla on a Niṣādī woman; निषादस्त्री तु चाण्डालात्पुत्रमन्त्यावसायितम्। स्मशानगोचरं सूते बाह्यानामपि गर्हितम्॥ Ms. 10. 39; the following 7 are regarded as belonging to this class; चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः॥ सोऽहमन्त्यावसायानां हराम्येनां प्रतिगृहात् Mb. 12. 141. 41. see अन्तेवसायिन्. **−आश्रमिन्**. *m.* one who belongs to the last or mendicant order. **−आहुतिः −इष्टिः** *f.* **−कर्मन्, −क्रिया** last or funeral oblations, sacrifices or rites; ° कर्म Ms. 11. 197, 5. 168; अन्त्याहुतिं हावयितुं सविप्राः Bk. **−ऋणम्** the last of the three debts which every one has to pay, i. e. begetting children; see अनृण. **−गमनम्** intercourse by a woman of the higher caste with a man of the lowest caste. **−ज.** *a.* **1** latest born, younger **−2** belonging to the lowest caste; °जैर्नृभिः Ms. 4. 61; °स्त्री 8. 385. (**−जः**) **1** a śūdra (अन्त्यः सन् जायते, वर्णमध्ये शेषभवत्वात्). **−2** one of the 7 inferior tribes; chāṇḍāla &c.; रजकश्चर्मकारश्च नटो वरुड एव च। कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥ Yama; also Ms. 8. 279; Y. 1. 273. (**−जा**) a woman of the lowest caste; Ms. 11. 59, 171; Y. 3. 231. **−जन्मन्, −जाति, −जातीय** *a.* 1 one belonging to the lowest caste; प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः Ms. 10. 110. **−2** a Śūdra; °तिता Ms. 12. 9. **−3** a chāṇḍāla. **−धनम्** the last term of a progression or series. **−पदम्, −मूलम्** the last or greatest root (in a square). **−भम् 1** the last lunar mansion रेवती. **−2** the last sign of the zodiac; मीन Pisces.. **−युगम्** the last or Kali age. **−योनि.** *a.* of the lowest origin; अन्त्यानामन्त्ययोनयः (साक्ष्यम्) Ms. 8. 68. (**−निः**) the lowest source or origin **−लोपः** dropping of the last letter or syllable of a word. **−वर्णः, −वर्णा** a man or woman of the lowest caste, a śūdra male or female. **−विपुला** N. of a metre.

अन्त्यकः A man of the lowest tribe. See अन्त्यज.

अन्त्रम् [अन्त्यते बध्यते देहोऽनेन, अन्त्-करणे ष्ट्रन्; according to Uṇ. 4. 163 अम्-क्त्र] An entrail, intestine; अन्त्रभेदनं क्रियते प्रश्रयश्च Mv. 3 the vitals of the heart are rent (मर्मभिदः वाचः उच्यन्ते इत्यर्थः). **−न्त्री** N. of a plant (used against colic or wind in the stomach (Mar. वरधारा); cf. अजान्त्री, छगलान्त्री). **−Comp. −आदः** a worm in the intestines. **−कूजः, कूजनम्, −विकूजनम्** the rumbling noise in the bowels; पक्वाशयस्थोन्त्रकूजं शूलं नाभौ करोति वा Suśr. **−पाचक** [अन्त्रस्थं दोषं पाचयति] N. of a medicinal plant Æschynomene Grandiflora. (सं. वसनः Mar. तमालपत्र). **−मांसम्** a kind of roasted flesh. **−वृद्धिः** *f.* inguinal hernia, rupture, swelling of the scrotum. **−शिला** N. of a river rising from the Vindhya mountain. **−स्रज्** *f.* a garland of intestines (worn by नृसिंह).

अन्त्रंधमिः *f.* Indigestion, inflammation of bowels; flatulence.

अन्द् 1 P. To bind, fasten.

अन्दः Binding.

अन्दुः −न्दूः *f.* [अन्द्यते बध्यते अनेन, अन्द्-कु, कूप्रत्ययान्तः निपातः Uṇ. 1. 93] also अन्दुकः, अन्दूकः **1** A chain or fetter. **−2** A chain for the elephant's feet; गजमन्दूरिव निश्चलं चकार Śi. 20. 51; °निनादः 11. 7. **−3** A sort of ornament worn round the ankles; cf. नूपुर.

अन्दिका 1 An oven, fire-place. **−2** An elder sister (cf. -अन्तिका).

अन्दोलयति Den. P. To swing, agitate, rock to and fro, oscillate. See आन्दोल्.

अन्दोलनम् Swinging, oscillating, waving; द्राक् चामरान्दोलनात् Udb. See आन्दोलनम्.

अन्ध् 10 U. **1** To make blind, blind; अन्धयन् भृङ्गमालाः Śi. 11. 19; तिमिरे जनस्य दृशमन्धयति 9. 21. **−2** To be or become blind.

अन्ध *a.* **1** Blind (lit. and fig.); devoid of sight, unable to see (at particular times); दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे; D. Bhāg. made blind, blinded; स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया Ś. 7. 24; मदान्धः blinded by intoxication; so दर्पान्धः, क्रोधान्धः; काम°, लोभ°, अज्ञान°; अज्ञानान्धस्य दीपस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥; सहजान्धदृशः स्वदुर्नये Śi. 16. 29 blind to his own wicked acts. **−2** Making blind, preventing the sight; utter, pitchy; complete, thick (darkness) प्रधर्षितायां वैदेह्यां बभूव सचराचरम्। जगत्सर्वममर्यादं तमसान्धेन संवृतम्॥ Rām 3.52. 9. Ms. 8. 94; सीदन्नन्धे तमसि U. 3. 33; Māl. 9. 8. 20; See °कूप, °तामसम् *infra*. **−3** Afflicted. आर्यः पर्युषितं तु नाभ्यवहरत्यन्धः क्षुधान्धोऽप्यसौ Viś. Guṇa. 101. **−4** Soiled, tarnished; निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते Rām. 3. 16. 13. **−न्धम्** Darkness. अन्धः स्यादन्धवेलायां बाधिर्यमपि चाश्रयेत् Mb. 1. 140. 12. **−2** Spiritual ignorance; अज्ञान or अविद्या q.v. **−3** Water; also, turbid water. **−न्धः 1** A kind of mendicant (परिव्राजक) who has completely controlled his organs; तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्। चतुष्पदां भुवं मुक्त्वा परिव्राडन्ध उच्यते॥ **−2** An epithet of the zodiacal signs at particular periods; (नष्टद्रव्यलाभालाभोपयोगयुक्तो राशिभेदः);

मेषो वृषा मृगेन्द्रश्च रात्रावन्धाः प्रकीर्तिताः। नृयुक्कर्कटकन्याश्च दिवान्धाः परिकीर्तिताः॥ **–न्धाः** (pl.) N. of a people; see अन्ध्र.–**Comp.** **–अलजी** a blind boil or abscess in the eyes (one that does not open or suppurate). (Ved. अलजि. विसल्पस्य विद्रधस्य वातीकारस्य वालजेः Av. 9. 8. 20.) **–अहिः, –अहिकः** a blind serpent, i. e. one that is not poisonous. (**–हिः, –हिकः**) N. of a fish (कुचिका). **–कारः** [अन्धं करोति] darkness (lit. and fig.); लीनं दिवाभीतमिवान्धकारम् Ku. 1. 12; काम°, मदन°; अन्धकारतामुपयाति चक्षुः K. 36 grows dim; बाष्पजलधारान्धकारितमुखी K. 161, 286. **–कूपः** [अन्धयतीत्यन्धः, अन्धः कूपः] **1** a well, the mouth of which is hidden; a well overgrown with plants &c. **–2** [अन्धस्य दृष्टप्रभावस्य कूप इव] mental darkness, infatuation. **–3** N. of a hell, to which those who tease and kill harmless creatures are condemned. **–तमसम्** (P. V. 4. 79.)**–तामसम्, –न्धातमसम्** deep or complete darkness; लोकमन्धतमसात्क्रमोदितौ R. 11. 24; अन्धतमसमिव प्रविशामि U. 7 the gloom of hell; प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः Śi. 2. 33. (**–सा**) night. **–तामिस्रः, –श्रः** (**–स्रम्** also) **1** complete or deep darkness (especially of the soul); तामिस्रोऽष्टदशधा तथा भवत्यन्धतामिस्रः Saṅ. K. 48 (भयविशेषविषयकोऽभिनिवेशः); तस्यामन्धतामिस्रमभ्यध्यायत् Mv. 1. **–2** spiritual ignorance (देहे नष्टे अहमेव नष्टः इति रूपमज्ञानम्); enveloped in utter darkness. (**–स्रः, स्रम्**) **1** N. of a division of Tartarus or infernal regions, the second of the 21 hells to which those who seduce the wives of others and enjoy them are condemned. According to Bhavabhūti persons committing suicide were condemned to this hell; cf. अन्धतामिस्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते U. 4; तामिस्रमन्धतामिस्रं महारौरवरौरवौ। नरकं कालसूत्रं च महानरकमेव च॥ Ms. 4. 88, 197; Y. 3. 224; doctrine of annihilation after death. **–2** Death मोहोऽप्रकाशस्तामिस्रमन्धतामिस्रसंज्ञितम्। मरणं चान्धतामिस्रं तामिस्रं क्रोध उच्यते॥ Mb. 12. 313. 25. **–धी** *a.* mentally blind. **–पूतना** a demoness supposed to cause diseases in children; यो द्वेष्टि स्तनमतिसारकासहिक्काछर्दीभिर्ज्वरसहिताभिरर्द्यमानः। दुर्वर्णः सततमधःशयोऽम्लगन्धिस्तं ब्रूयुर्वरभिषजोन्धपूतनार्तम् Suśr. **–मूषा** a small covered crucible with a hole in the side. **–मूषिका** [अन्धं दृष्ट्यभावं मुष्णाति, मुष्-ण्वुल्] N. of a plant or grass देवताड (तत्सेवनेन चक्षुष्मत्ता भवतीति वैद्यकप्रसिद्धिः). **–रात्री** dark night (Ved). **–वर्त्मन्** *m.* [अन्धं सूर्यप्रकाशराहित्याद्वर्त्म यत्र] the seventh skandha or region of wind.

अन्धङ्करण *a.* Making blind (P. III. 2. 56).

अन्धंभविष्णु,–भावुक *a.* Becoming blind (P. III. 2.57).

अन्धक *a.* [अन्ध्-कन्] Blind; अन्धकः कुब्जकश्चैव Pt. 5. 91. **–कः 1** N. of an Asura, son of Kaśyapa and Diti and killed by Śiva. [He is represented as a demon with 1000 arms and heads, 2000 eyes and feet, and called *Andhaka*, because he walked like a blind man, though he could see very well; स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत। तमन्धकोऽयं नाम्नेति प्रोचुस्तत्र निवासिनः॥ He was slain by Śiva when he attempted to carry off the Pārijāta tree from heaven; whence Śiva is called *Andhakaripu, -ari, -dviṣ* &c. According to the Matsya Purāṇa *Andhaka* was admitted to the class of Gaṇas by Śiva, at his importunities and humble supplication, when he was about to be killed by the god for having attempted to carry off his wife Pārvatī]. **–2** N. of a descendant of Yadu and ancestor of Kṛiṣṇa and his descendants, a grandson of Kroṣṭu, son of Yudhājit who, together with his brother Vṛiṣṇi is the ancestor of the celebrated family of Andhakavṛiṣṇis; P. IV. 1. 114, VI. 2. 34. **–3** N. of a sage, son of Mamatā and of Utathya, elder brother of Bṛihaspati. **–Comp.** **–अरिः –रिपुः, –शत्रुः, –घाति, –असुहृद्** &c. slayer of Andhaka, epithets of Śiva. **–वर्तः** N. of a mountain. **–वृष्णि** *m. pl.* descendants of अन्धक and वृष्णि.

अन्धिका [अन्ध्–ण्वुल्] **1** Night. **–2** A kind of game or sport, probably blindman's buff; gambling (तया हि जनः अन्ध इव विवेकशून्यः क्रियते Tv.). **–3** A woman of a particular character, one of the classes of women. **–4** A disease of the eye. **–5** =सर्षपी, =सिद्धा q. v. (अस्या अत्यन्तसेवनात् दृष्टिक्षयो जायते इति वैद्यकप्रसिद्धिः).

अन्धीकृ 8 U. To make blind, blind; °कृतात्मा blinded in mind.

अन्धीभू To become blind.

अन्धस् *n.* [अद्–असुन् नुम् धश्च; अदेर्नुम्धौ च Uṇ. 4. 205] **1** Food; द्विजातिशेषेण यदेतदन्धसा Ki. 1. 39; सशेष एवान्धसि असावतृप्यत् Dk. 133, 157 Viś. Guṇa. 101; Mb. 3. 193. 34. (supposed to have in the Veda the senses of Soma, the herb itself, or its juice; juice, ghee or boiled rice, but usually taken to mean 'food' only by Indian lexicographers and commentators. **–2** Grassy ground उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः Rv. 7. 96. 2. [cf. Gr. *andhos.*]

अन्धुः [fr. अम् Uṇ. 1. 27] **1** A well; आपीनोऽन्धुः P. VI. 1. 28; Sk. cf. also 'मन्यमानः......बन्धूनन्धूनिवासौ...' चोलचम्पूकाव्य P. 9, Verse 13. **–2** The male organ of generation; वाक्पाणिपादपाय्वन्धुसंज्ञान्याहुर्मनीषिणः.

अन्धुलः [अन्ध्–उलच्] A kind of tree, Acacia Sirissa (शिरीष).

अन्ध्रः (*pl.*) **1** N. of a people and the country inhabited by them. [The country of the Āndhras is said to be the modern Telingana. But the limits were probably confined to the Ghats on the West and the rivers Godāvarī and Kṛiṣṇā on the North and South. It bordered on Kalinga (See Dk. 7th Ullāsa), and its capital Andhranagara is probably the old town of Vengi or Vegi. According to Daṇḍin, there was near it a lake 'like the ocean and crested with cranes' which description can only refer to the lake Colair which has an area of over 150 miles; जगन्नाथादूर्ध्वभागादर्वाक् श्रीभ्रमरात्मकात्। तावदन्ध्राभिधो देशः]. **–2** N. of a dynasty of kings. **–3** A man of a mixed (low) caste, being born of a Vaideha father and Kārāvara mother, who lives by killing game; कारावरो निषादात्तु चर्मकारः प्रसूयते। वैदेहकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ॥ Ms. 10. 36. **-4** A kind of fowler. **-Comp. -जातिः** the Andhra tribe. **-भृत्याः** N. of a dynasty of kings.

अन्नम् [अद्-क्त; अनित्यनेन, अन्-नन्; according to Yāska, from अद्, अद्यते अत्ति च भूतानि; or from आ-नम्, आ आभिमुख्येन ह्येतन्नतं प्रह्वीभूतं भवति भोजनाय भूतानाम्] **1** Food (in general); अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते Tait. Up.; मेदोऽसृङ्मांसमज्जास्थि वदन्त्यन्नं मनीषिणः Ms. 3. 8. 182; अहमन्नं भवान् भोक्ता H. 1. 51. I am your prey &c.; चराणामन्नमचराः Ms. 5. 29. **-2** Food as representing the lowest form in which the Supreme Soul is manifested, being the coarsest and last of the 5 vestures (कोश) in which the soul is clothed and passes from body to body in the long process of metempsychosis – " the nutrimentitious vesture or visible body in the world of sense " (स्थूलशरीर called अन्नमयकोश). **-3** Boiled rice; अन्नेन व्यञ्जनम् P. II. 1. 34. **-4** Corn (bread corn); ता (आपः) अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवति Ch. Up. 6. 2. 4.; आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः Ms. 3. 76; कृत° 9. 219; 10. 86, 12. 65. **-5** Water. **-6** Earth (पृथिव्या अन्नहेतुत्वादन्नशब्दवाच्यता). **-7** N. of Viṣṇu. **-न्नः** The sun (स हि अन्नहेतुवृष्टिहेतुः). **-Comp. -अकालः** = अनाकाल q. v. **-अत्तृ, -आदिन्, -आहारिन्** eating food. **-अद** *a.* eating food. **-2** having a good appetite (दीप्ताग्नि). (**-दः**) N. of Viṣṇu. **-अद्यम्** proper food, food in general; कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा Ms. 3. 82, 4. 112, 11. 144. अन्नाद्येन प्रजापतिः (तृप्तः) Mb. 3. 200. 68. **-आच्छादनम्, -वस्त्रम्** food and clothing, food and raiment, the bare necessaries of life. **-आयुः** (अन्नायु) consisting of, living by, food; desirous of food (अन्नबन्धनः, अन्नजीवनः). **-काम** *a.* desirous of food; स इद्भोजो यो गृहवे ददात्यन्नकामाय Rv. 10. 117. 3. **-कालः** hour of dinner; meal-time. **-किट्टः** =°मल q. v. **-कूटः** a large heap of boiled rice. **-कोष्ठकः 1** a cupboard; granary. **-2** Viṣṇu. **-3** the sun. **-गतिः** *f.* the passage of food, gullet (cf. बहिःस्रोतस्). **-गन्धिः** dysentery, diarrhoea. **-ज, -जात** *a.* produced from food as the primitive substance. **-जम्** rice-gruel of three days. **-जा** *f.* a hickup. **-जलम्** food and water, bare subsistence. **-तेजस्** *a.* having the vigour caused by food. **-द, -दातृ, -दायिन्, -प्रद** *a.* **1** giving food; वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः Ms. 4. 229. **-2** epithet of Śiva. **-दा** N. of Durgā or Annapūrṇā. **-दासः** [अन्नेन पालितो दासः शाक. त.] a servant who works for food only, one who becomes a servant or slave by getting food only. **-देवता** the deity supposed to preside over articles of food. **-दोषः 1** sin arising from eating prohibited food; Ms. 5. 4. **-2** a defect in the food eaten; derangement of food or the humours of the body; आलस्यादन्नदोषाच्च मृत्युर्विप्राञ् जिघांसति Ms. 5. 4. **-द्वेषः** dislike of food, loss of appetite. **-पतिः** lord or possessor of food, epithet of Savitṛ, Agni, and Śiva. अन्नपतेऽन्नस्य नो देहि Tait. Saṁ. 11. 83; 34. 58. **-पाकः** cooking of food; digestion of food; (by the fire in the stomach). **-पू** *a.* purifying food, epithet of the Sun. **-पूर्ण** *a.* filled with, possessed of, food. (**-र्णा**) a form of Durgā (the goddess of plenty); °ईश्वरी N. of Durgā or a form of Bhairavī. **-पेयम्** = वाजपेयम् q. v. **-प्रलय** *a.* being dissolved into food after death. **-प्राशः, -प्राशनम्** the ceremony of giving a new-born child food to eat for the first time, one of the 16 *Saṁskāras* performed between the 5th and 8th month (usually in the sixth, Ms. 2. 34) with preliminary oblations to fire (Mar. उष्टावण); षष्ठेऽन्नप्राशनं मासि Ms. 2. 34; Y. 1. 12. **-ब्रह्मन्, -आत्मन्** *m.* Brahman as represented by food. **-भक्त** *a.* [अन्नार्थं भक्तः दासः] = अन्नदास q. v. **-भुज्** *a.* eating food, epithet of Śiva. **-मय** *a.* see below. **-मलम् 1** excrement, faeces; P. VI. 1. 148 Sk. **-2** spirituous liquor; सुरा वै मलमन्नानाम् Ms. 11. 93. **-रक्षा** precautions as to eating food. **-रसः** essence of food, chyle; food and drink, nutriment; नानाविधानन्नरसान् वन्यमूलफलाश्रयान्। तेभ्यो ददौ Rām. **-वत्** *a.* possessed of food; अन्नवान्त्सन् रफितायोपजग्मुषे Rv. 10. 117. 2. **-वस्त्रम्** = °आच्छादनम् q. v. **-विकारः 1** transformation of food, assimilation. **-2** disorder of the stomach caused by indigestion. **-3** seminal discharge (of man); semen itself; cf. अन्नाद्रेतः संभवति. **-विद्** *a.* acquiring food; कार्षीवणा अन्नविदो न विद्यया Av. 6. 116. 1. **-व्यवहारः** the law or custom relating to food, *i. e.* the custom of eating together or not with other persons. **-शेषः** leavings of food, offal. **-संस्कारः** consecration of food. **-होमः** a sacrifice (with 10 materials) connected with the Aśvamedha sacrifice.

अन्नमय *a.* (**-यी** *f.*) Consisting or made of food, composed of or containing boiled rice; °कोशः -षः the gross material body, the स्थूलशरीर, which is sustained by food and which is the fifth or last vesture or wrapper of the soul; see अन्न (2) above and also कोश; hence, also the material world, the coarsest or lowest form in which Brahman is considered as manifesting itself in the worldly existence. **-यम्** Plenty of food.

अन्नाद *a.* eater of food; अहमन्नादः Tait. Up. 1. 7.

अन्नावृध् [अन्नं वर्धते अनेन वृध्-करणे क्विप्, पूर्वपददीर्घः] Increasing food; त्वा पितृभृतो जनित्रीः अन्नावृधं प्रति चरन्ति अन्नैः Rv. 10. 1. 4.

अन्नंभट्टः N. of the author of the Tarkasaṅgraha. cf. काशीगमनमात्रेण नान्नंभट्टायते द्विजः।

अन्य *a.* [अन् अघ्न्यादि° य; अन्यः, -न्यस्मै, °स्मात्; *n.* अन्यत् &c.] **1** Another, different, other (भिन्न); another, other (generally); स एव त्वन्यः क्षणेन भवतीति विचित्रमेतत् Bh. 2. 40; अन्यदेव भागधेयमेते निर्वपन्ति Ś. 2; सर्वमन्यत् everything else; किमुतान्यहिंस्राः R. 2. 62; changed, altered; संप्रत्यन्ये वयम् Bh. 3. 66 quite different persons; oft. in comp. अन्यसङ्गात्, अनन्यपरायण, अनन्यसाधारण &c. **-2** Other than, different from, else than (with abl. or as last member of comp.); नास्ति जीवितादन्यदभिमततरमिह सर्वजन्तूनाम्

K. 35; कोऽस्ति धन्यो मदन्यः Bv. 4. 37; उत्थितं ददृशेऽन्यच्च कबन्धेभ्यो न किंचन R. 12. 49; किमन्यदस्याः परिषदः श्रुतिप्रसादनतः Ś. 1; oft. used in addition to ऋते or विना; ऋते समुद्रादन्यः को बिभर्ति वडवानलम् Pt. 5. 35; किं नु खलु मे प्रियादर्शनादृते शरणमन्यत् Ś. 3. **–3** Another person, one different from self (opp. स्व, आत्मीय); वासश्च धृतमन्यैर्न धारयेत् Ms. 4. 66. **–4** Strange, unusual, extraordinary; अन्य एव स प्रकारः K. 168; अन्या जगद्धितमयी मनसः प्रवृत्तिः Bv. 1. 69; धन्या मृदन्यैव सा S. D. **–5** Ordinary, any one; निरातङ्कः कन्यामन्योऽपि याचते Mv. 1.31; cf. इतर. **–6** Additional, new, more; अन्यान् दशसुवर्णान्प्रयच्छ Mk. 2 another ten (coins); अन्यदन्यन्नलिनदलशयनम् K. 157 new and new (changing every now and then); अन्यस्मिन् दिवसे another day; one of a number (with gen.); अन्यच्च moreover, besides, and again (used to connect sentences together); एक–अन्य the one-the other; एकः सख्यास्तव सह मया वामपादाभिलाषी। काङ्क्षत्यन्यो वदनमदिरां दौहृदच्छद्मनास्याः Me. 80; see under एक also; अन्य–अन्य one-another; अन्यः करोति अन्यो भुङ्क्ते one does, another suffers; अन्यन्मुखे अन्यन्निर्वहणे Mu. 5; अन्यदुप्तं जातमन्यत् Ms. 9. 40, 99; 8. 204; कर्णे लगति चान्यस्य प्राणैरन्यो वियुज्यते Pt. 1. 305; अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् Śi. 2. 62; अन्य–अन्य–अन्य &c. one, another, third, fourth &c., जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः। हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् Pt. 1. 135; मनस्यन्यद्वचस्यन्यत् कार्यमन्यद् दुरात्मनाम् H. 1. 97.; (in pl.) केचित्–अन्ये some-others; एके–अन्ये–तथान्ये (बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः। बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः॥) Ms. 10.70; 4.9; 12.123. [cf. L. *alius*; *Gr. allos* for *al jos*, Zend *anya*]. **–Comp.** **–अर्थ** *a.* having a different meaning, sense, or purpose. **–असाधारण** *a.* not common to others, peculiar. **–आश्रयण** *a.* going or passing over to another. **–उदर्य** *a.* born from another; नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ Rv. 7. 4. 8. (**–र्यः**) a step-mother's son, a half brother. (**–र्या** a half sister. **–ऊढा** *a.* married to another; another's wife. **–कारुका** a worm bred in excrement (शकृत्कीटः). **–क्षेत्रम्** **1** another field. **–2** another or foreign territory. अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति। पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति॥ **–3** another's wife. **–ग, –गामिन्** *a.* **1** going to another. **–2** adulterous, unchaste; वणिजां तु कुलस्त्रीव स्थिरा लक्ष्मीरनन्यगा Ks. 21. 56; 19. 27. **–गोत्र** *a.* of a different family or lineage. **–चित्त** *a.* having the mind fixed on something or some one else; see °मनस्. **–ज, –जात** *a.* of a different origin. **–जन्मन्** *n.* another life or existence, regeneration, metempsychosis. **–दुर्वह** *a.* difficult to be borne by others. **–देवत, –त्य, –दैवत्य** *a.* addressed or referring to another deity (as a Vedic Mantra). **–धर्मन्** *a.* having another or different property. (**–र्मः**) different property or characteristic. **–धी** *a.* whose mind is turned away from God. **–नाभि** *a.* belonging to another family. **–पदार्थः** **1** another substance. **–2** the sense of another word; °प्रधानो बहुव्रीहिः the Bahuvrīhi compound essentially depends on the sense of another word. **–पर** *a.* **1** devoted to another or something else. **–2** expressing or referring to something else. **–पुष्टा, –भृता** 'reared by another', epithet of the cuckoo, which is supposed to be reared by the crow (called अन्यभृत्); अप्यन्यपुष्टा प्रतिकूलशब्दा Ku. 1. 45; कलमन्यभृतासु भाषितम् R. 8. 59. **–पूर्वा** [अन्यः पतिः पूर्वो यस्याः] **1** a womon already promised or betrothed to another. **–2** a remarried widow (पुनर्भू) see अनन्यपूर्व. **–बीज, –बीजसमुद्भव, –समुत्पन्न** an adopted son (born from other parents), one who may be adopted as a son for want of legitimate issue. **–भृत्** *m.* a crow (rearing another, it being supposed to sit on the eggs of the cuckoo and to rear its young ones), cf. Ś. 5. 22. **–मनस्, –मनस्क, –मानस** *a.* **1** having the mind fixed on something else; inattentive. **–2** fickle, versatile, unsteady; अन्यमनसः स्त्रियः H. 1. 111 absentminded; possessed by a demon. **–मातृजः** a half-brother (born of another mother) असंसृष्टयपि वाऽऽदद्यात्संसृष्टो नान्यमातृजः Y. 2. 139. **–रङ्गः** the second court or theatre or a compound; Māna. 21. 144. **–राजन्, –राष्ट्रीय** *a.* subject to another king or kingdom (Ved.). **–रूप** *a.* having another form, changed, altered; पद्मिनीं वान्यरूपाम् Me. 85. (**–पम्**) another or changed form; °पेण in another form. **–लिङ्ग, –ङ्गक** *a.* following the gender of another word (i. e. the substantive), an adjective; ऊषवानूषरो द्वावप्यन्यलिङ्गौ Ak. **–वादिन्** *a.* **1** giving false evidence. **–2** a defendant in general. **–वापः** the cuckoo leaving the eggs in the nests of other birds. **–विवर्धित** *a.* = पुष्ट a cuckoo. **–व्रत** *a.* following other (than Vedic) observances, devoted to other gods, infidel. **–शाखः, –खकः** a Bārhmaṇa who has gone over to another school (of religion &c.); an apostate. **–संक्रान्त** *a.* fixed on or transferred to another (woman); °हृदयः आर्यपुत्रः M. 3, 4. **–संगमः** intercourse with another; illicit intercourse. **–साधारण** *a.* common to many others. **–स्त्री** another's wife, a woman not one's own. [In Rhetoric she is considered as one of three chief female characters in a poetical composition, the other two being स्वीया and साधारणी स्त्री. अन्या may be either a damsel or another's wife. The 'damsel' is one not yet married, who is bashful and arrived at the age of puberty. As "another's wife" she is fond of festivals and similar occasions of amusement, who is a disgrace to her family and utterly destitute of modesty, see S. D. 108-110]. °गः an adulterer. यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्... स राजा शक्रलोकभाक्; Ms. 8. 386. [Note: Some compounds under अन्य will be found under अनन्य.]

अन्यक *a.* Another, other (= अन्य).

अन्यत् *a.* (अन्य *n.*) Another &c. नैवास्ति लिखितादन्यत् स्मारकं व्यवहारिणाम् Sulhā. *-ind.* Again, moreover, besides &c. **–Comp.** **–अर्थ** **1** having a different meaning. **–2** referring to or expressing another sense. (**–र्थः**) a different meaning. **–आशा** desire of something else. **–आशिस्** *f.* another's blessing. **–आस्था** devotion or attachment to another. **–उत्सुक** *a.* longing for another. **–रागः** attachment to another.

अन्यतम *a.* [अन्य–डतम] (declined like a noun and not a pronoun) One of many, any one out of a large number (with gen. or in comp.); जपन्वान्यतमं वेदम् Ms. 11. 75; 6. 32, 4. 13; Y. 2. 22, 3. 253; अन्यतरान्यतमशब्दौ अव्युत्पन्ने प्रातिपदिके इति कैयटः).

अन्यतर *a.* (declined like a pronoun) One of the two (persons or things), either of the two (with gen.); तयोर्मुनिकुमारयोरन्यतरः K. 151; सन्तः परीक्ष्यान्यतरद् भजन्ते M. 1. 2. the one or the other; अन्यतरा युवयोरागच्छतु Ś. 3; Ms. 2. 111; 9. 171; other, different; अन्यतर–अन्यतर the one--the other; अन्यतरस्याम् (loc. of °रा) either way, in both ways, optionally; frequently used by Pāṇini in his Sūtras in the sense of वा or विभाषा; ह्क्रोरन्यतरस्याम्, आत्मनेपदेष्वन्यतरस्याम् &c. &c.

अन्यतरतः *adv.* On one of the two sides; °दन्त having teeth on one side.

अन्यतरेद्युः *adv.* [अन्यतरस्मिन्नहनि–एद्युस्] On either of the two days, on one day or on another, P. V. 3. 22.

अन्यतः *adv.* **1** From another; न चान्यतस्तस्य शरीररक्षा R. 2. 4; तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः U. 1. 13. **–2** On one side; अन्यतः–अन्यतः, एकतः–अन्यतः on the one side, on the other side; तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः Ki. 5. 2; एकवस्तु सकलानि निमित्तान्यन्यतो हि मनसः प्रतिपत्तिः Nīti. **–3** To another place, towards some other person or direction; गन्तव्यं वा ततोऽन्यतः Ms. 2. 200; अन्यतोऽपि नयने प्रेरयन्त्या Ś. 2. 2; आर्ये व्रजामोऽन्यतः R. 6. 82. **–4** From another ground or motive. **–5** On the other side; on the contrary. **–6** Otherwise; in another place, elsewhere. **–Comp. –अरण्यम्** Ved. a land which is woody here and there. Vāj. 30. 19. **–एत, –एतस्, –एनी** Ved. variegated or spotted on one side. **–घातिन्** *a.* striking in one direction. **–वात** *a.* suffering occasional wind (rheumatism). (**–तः**) a sort of eye-disease.

अन्यतस्त्यः [अन्यतो भवः, त्यप्] An enemy, adversary. स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी Bṛi. Up. 2. 1. 6. **–Comp. –जयिन्** *a.* overwhelming adversaries. Śat. Br. 14.

अन्यत्र *adv.* [अन्य–त्रल्] (oft. = अन्यस्मिन् with a subst. or adj. force) **1** Elsewhere, in another place (with abl.); अपत्याधिकारादन्यत्र लौकिकमपत्यमात्रं गोत्रम् P. IV. 2. 39 Com.; sometimes with विना; विना मलयमन्यत्र चन्दनं न प्ररोहति Pt. 1. 41; (with verbs of motion) to another place. **–2** On another occasion, at another time than; oft. (in comp.); मधुपर्के च यज्ञे च पितुर्दैवतकर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः Ms. 5. 41. **–3** Except, without, other than; यथा फलानां जातानां नान्यत्र पतनाद्भयम् । एवं नरस्य जातस्य नान्यत्र मरणाद्भयम् ॥ Rām. 2. 105. 17; Mv. 6. 8; R. 14. 32; Bg. 3. 9; Y. 1. 215; अन्यत्र नैमिषेयसत्रात् V. 5, Ms. 4. 164; oft. with the force of the nom. case; देवा अन्यत्रैवाश्विभ्यां सत्रं निषेदुः Kauṣ. Br. (अन्यत्र = अन्ये). **–4** Otherwise, in another way, in the other case, in the other sense; सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् Ak.; राजन्वती भूः, राजवान् अन्यत्र; चर्मण्वती नदी चर्मवती अन्यत्र P. VIII. 2. 12, 14 Sk. **–Comp. –मनस्, –चित्त** *a.* whose mind is directed to somthing else, inattentive. Śat. Br. 14.

अन्यथा *ind.* [अन्य–प्रकारार्थे था] **1** Otherwise, in another way or manner, in a different manner; यदभावि न तद्भावि भावि चेन्न तदन्यथा H. प्रस्ताविका 24; with अतः, इतः or ततः otherwise than, in a manner different from; अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते Ms. 5. 31; एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा Bg. 13. 11. अन्यथा–अन्यथा in one way, in another (different) way; योऽन्यथा सन्तमात्मानमन्यथा भाषते Ms. 4. 255; सत्त्वभङ्गभयाद्राज्ञां कथयन्त्यन्यथा पुरः । अन्यथा विवृतार्थेषु स्वैरालापेषु मन्त्रिणः Mu. 4. 8. अन्यथा कृ (*a*) to do otherwise, change or alter; न हि दैवं शक्यमन्यथा कर्तुमभियुक्तेनापि K. 62; न स्वभावोऽत्र मर्त्यानां शक्यते कर्तुमन्यथा Pt. 1. 258; Ś. 6. 14; (*b*) to act otherwise, violate, transgress, go against; त्वया कदाचिदपि मम वचनं नान्यथा कृतम् Pt. 4; (*c*) to destroy, undo, frustrate, baffle, defeat (hope, plan &c.), कर्तुमकर्तुमन्यथाकर्तुं समर्थ ईश्वरः; ममेच्छां मान्यथा कृथाः Ks. 22. 51; लाभं कुर्याच्च योऽन्यथा Y. 2. 195; (*d*) to make false, falsify; ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः Rām.; अमात्यः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा Ms. 9. 234 to do wrongly; °ग्रह्,–मन्,–संभावय्,–समर्थय्, –विकल्पय् &c. to take or think to be otherwise, to misunderstand, understand wrongly; अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् M. 1. 20; अलमस्मानन्यथा संभाव्य Ś. 1; किं मामन्यथा संभावयसि K. 147; Ś. 3. 19; जनोऽन्यथा भर्तृमतीं विशङ्कते Ś. 5. 17 suspects to be otherwise (than chaste), °भू or या to be otherwise, be changed or altered, be falsified; न मे वचनमन्यथा भवितुमर्हति Ś. 4; शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा Rām.; तयोर्महात्मनोर्वाक्यं नान्यथा याति सांप्रतम् Rām. **–2** Otherwise, or else, in the contrary case; व्यक्तं नास्ति कथमन्यथा वासन्त्यपि तां न पश्येत् U. 3; स्तेनोऽन्यथा भवेत् Ms. 8. 144; Y. 1. 86, 2. 288; on the other hand, on the contrary. **–3** Falsely, untruly; किमन्यथा भट्टिनी मया विज्ञापितपूर्वा V. 2; किमन्यथा भट्टिन्यै विज्ञापितम् M. 4; न खल्वन्यथा ब्राह्मणस्य वचनम् V. 3; यो न्यायमन्यथा ब्रूते स याति नरकं नरः Pt. 3. 107; H. 3. 15; Ms. 8. 90. **–4** Wrongly, erroneously, badly, as in अन्यथासिद्ध q. v. below; see under (1) also. **–5** From another motive, cause, or ground; दुर्वाससः शापादियं त्वया प्रत्यादिष्टा नान्यथा Ś. 7. [cf. L. *aliuta.*]. **–Comp. –अनुपपत्तिः** *f.* see अर्थापत्ति. **–कारः** changing, altering. (**–रम्**) *adv.* in a different manner, differently P. III. 4. 27. **–ख्यातिः** *f.* **1** erroneous conception of the Spirit. **–2** Name of a philosophical work. **–3** wrong conception in general (in phil.). In Sāṅkhya philosophy it means the assertion that something is not really what it appears to be according to sensual perception; title of a philosophical work. **–भावः** alteration, change, being otherwise, difference; एकस्या व्यक्तेः सर्वावयवावच्छेदेनान्यथाभावः कात्स्न्र्यम् P. V. 4. 53; Sk. change of view or mind; मयि °भावो न कर्तव्यः Ch. Up. **–वादिन्** *a.* speaking differently or falsely; speaking falsely or inconsistently; (in law) a prevaricator, prevaricating witness. **–वृत्ति** *a.* **1** changed, altered. **–2** affected, perturbed; disturbed by strong emotions; मेघालोके भवति सुखिनोप्यन्यथावृत्ति चेतः Me. 3. **–सिद्ध** *a* proved or demonstrated wrongly; (in Nyāya) said of a cause (कारण) which is not the true one, but only refers to accidental and remote circumstances (as the ass employed to fetch clay &c. in the case of a घट or jar) which do not invariably contribute to the result, see कारण; this अन्यथा° is said to be of 3 kinds in Tarka. K., but 5 are mentioned in Bhāṣā P. 19-22. **–द्धम्, –सिद्धिः** *f.* wrong demonstration; one in which arguments, not being true causes are advanced; an unessential cause, an accidental or concomitant circumstance. Bhāṣā P. 16. **–स्तोत्रम्** satire, irony; सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् (क्षेपं करोति) cf. यत्र विकृताकृतिरेव दर्शनीयस्त्वमसीत्युच्यते तदन्यथास्तोत्रम्। Mitākṣarā. Y. 2. 204.

अन्यथयति Den. P. To change, alter, to change into something totally different; धर्मश्च कर्तुमकर्तुमन्यथयितुमीश्वरस्य शिवस्य आज्ञानुल्लङ्घनम्। चोलचम्पू p. 13.

अन्यदा *ind.* **1** At another time, on another occasion, in any other case; अन्यदा भूषणं पुंसां क्षमा लज्जेव योषिताम् Śi 2. 44, R. 11. 73. **–2** Once, one day, at one time, once upon a time. अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः कश्मलं महदभिरम्भित इति होवाच Bhāg. 5. 8. 15. **–3** Sometimes, now and then.

अन्यदीय *a.* **1** Belonging to another. **–2** Being or existing in another.

अन्यर्हि *ind.* At another time (= अन्यदा).

अन्यादृक्ष्, –श्, –श *a.* [अन्य इव पश्यति, अन्यादृश्, कर्मकर्तरि क्स, क्विन्, कञ् वा P. III. 2. 60] **1** Of another kind, like another. **–2** Changed, unusual, strange; यात्राप्रतिनिवृत्तमन्यादृशं भवन्तमवधारयामि Māl. 1; अन्यादृशमेव भगवत्या वचनम् 2; being different or otherwise; न खलु अन्यादृशेषु युष्मादृश्यः पक्षपातिन्यो भवन्ति 4; अन्यादृश्येव क्षणमजनिष्ट Dk. 106, K. 309; अन्यादृशी रचना कस्यापि वलीमुखस्य Mv. 6 strange.

अन्यान्य *a.* See अन्योन्य; अन्यान्याश्चैव तनवो यथेष्टं प्रतिपद्यते Mb. 14. 19. 25.

अन्येद्युः *ind.* [अन्य–एद्युस् P. V. 3. 22] **1** On the other or following day; अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना R. 2. 26. **–2** one day, once.

अन्येद्युष्क *a.* [अन्येद्युर्भवः, कन्] Occurring every day, daily, diurnal; अन्येद्युष्कमहोरात्रादेककालं प्रवर्तते Suśr. **–ष्कः** A quotidian fever.

अन्योन्य *a.* [अन्य–कर्मव्यतिहारे द्वित्वं, पूर्वपदे सुश्च] One another, each other, mutual (treated like a pronoun). In many cases the use of this word corresponds to the use of the word 'each other' or 'one another' in English; अन्योन्यं ताडयतः Mk. 9 they strike each other (अन्यः अन्यं ताडयति). Thus अन्यः may be regarded as the subject and अन्यम् as the object of the verb, as in English. The second अन्य may, therefore, in many cases stand in the instr., gen., or loc. cases; अन्योन्यैराहताः सन्तः सस्वनुर्भीमनिःस्वनाः Rām.; अन्योन्यस्य व्यतिलुनन्ति P. I. 3. 16 Sk. But there are several instances, especially when अन्योन्य enters into compound, in which the first अन्य loses all its nominative force and becomes a sort of oblique case, or an irregular compound of अन्य and अन्य, see P. VIII. 1. 12 Sk.; अन्योन्यस्याव्यभीचारः Ms. 9. 101; oft. in comp. and translated by 'mutual', 'reciprocal', 'mutually'; °शोभाजननात् Ku. 1. 42; so °कलह, °दर्शन, &c. **–न्यम्** *ind.* Mutually. **–न्यम्** (In Rhet.) A figure of speech, the 'Reciprocal', in which two things do the same act to each other; अन्योन्यमुभयोरेकक्रियायाः करणं मिथः। त्वया सा शोभते तन्वी तया त्वमपि शोभसे॥ रजन्या शोभते चन्द्रश्चन्द्रेणापि निशीथिनी। S. D. 724. **–Comp.** **–अध्यासः** reciprocal attribution of identity (अन्योन्यतादात्म्यारोपः); जलव्योम्ना घटाकाशो यथा सर्वैस्तिरोहितः। तथा जीवे च कूटस्थः सोऽन्योन्याध्यास उच्यते॥ **–अपहृत** *a.* taken from one another, taken secretly. **–अभावः** mutual non-existence or negation; one of the two main kinds of अभाव; it is reciprocal negation of identity, essence, or respective peculiarity, and is equivalent to difference (भेद); तादात्म्यसंबन्धावच्छिन्नप्रातियोगिकोऽन्योन्याभावः, as घटः पटो न भवति; it exists between two notions which have no property in common. **–आश्रय** *a.* mutually dependent. (**–यः**) mutual or reciprocal dependence, support, or connection; reciprocal relation of cause and effect (a term in Nyāya). **–उक्तिः** *f.* conversation. **–कार्यम्** Sexual intercourse (मैथुन); अन्योन्यकार्याणि यथा तथैव न पापमात्रेण कृतं हिनास्ति Mb. 12. 141. 70. **–पक्षनयनम्** transposition of numbers from one side to another. **–भेदः** mutual dissension or enmity; so °कलह. **–मिथुनम्** mutual union. **–विभागः** mutual partition of an inheritance made by the sharers (without the presence of any other party). **–वृत्तिः** *f.* mutual effect of one thing upon another. **–व्यतिकरः,–संश्रयः** reciprocal action or influence; mutual relation of cause and effect.

अन्यङ्ग *a.* Ved. Spotless.

अन्या *a.* Ved. Not drying up, inexhaustible; इन्द्रं धेनुं सुदुघामन्याम् Rv. 8. 1. 10.

अन्याय *a.* [न. ब.] Unjust, improper; °दण्डः unjust punishment; **–यः 1** Any unjust or unlawful action; see न्याय; नरेष्वन्यायवर्तिषु Ms. 7. 16 acting unjustly, following evil courses; अन्यायेन unjustly, improperly; नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः Ms. 2. 110. **–2** Injustice, impropriety. **–3** Irregularity, disorder.

अन्यायिन् *a.* Unjust, improper.

अन्याय्य *a.* **1** Unjust, unlawful. अन्याय्यः परदारपृच्छाव्यवहारः Ś. 5. **–2** Improper, unbecoming, indecorous. **–3** Not authoritative.

अन्यून *a.* Not defective or deficient, complete, whole, entire; °अधिक neither deficient nor superfluous. **–Comp. –अङ्ग** *a.* not having a defective limb.

अन्योकस् *a.* Not residing in one's own house (dwelling in another's), Av.

अन्वक्ष *a.* [अनुगतः अक्षं इन्द्रियं गति समा.] **1** Visible, perceptible. **–2** Following, close on the heels of, immediately following. **–क्षम्** *ind.* **1** Afterwards, after; आरोह त्वं...सीतां चारोपयान्वक्षम् Rām 2. 52. 75. **–2** Immediately after, forthwith, directly; हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम् Y. 3. 21.

अन्वक्षरसन्धिः A kind of Vedic Sandhi, that of a vowel and consonant.

अन्वञ्च् *a.* [अनु–अञ्च्–क्विप्; nom. अन्वङ् *m.*, अन्वक् *n.* अनूची *f.*] **1** Going after, following; तस्मादिमे अन्वञ्चो मासा यन्ति Śat. Br.; त्वामन्वञ्चो वयं स्मसि Ait. Br. **–2** Lying lengthwise, horizontal; **अनूचि** *adv.* in the rear or behind, from behind; आगच्छतोऽनूचि गजस्य घण्टयोः Śi. 12. 34 (पृष्ठदेशे).

अभ्यर्ण *a.* [अभि-अर्द्-क्त, अभेश्चाविदूर्ये P. VII. 2. 25. Sk.] Near, proximate, adioining, being close or near (of space); approaching, drawing near (of time); अभ्यर्णमागस्कृतमस्पृशद्भिः R. 2. 32; आश्रम° भूमिः U. 4; Mu. 6; K. 69, 125, 208, 286; कर्णाभ्यर्ण Māl. 5. 13; Ratn. 3. 10; Bk. 3. 28. **–र्णम्** Proximity, vicinity; अन्धकारिणी वनाभ्यर्णे किमुद्भ्राम्यति Gīt. 7; अभ्यर्णे परिरभ्य निर्भरभरः प्रेमान्धया राधया Gīt. 1, Śi. 3. 21. य एष भ्राजतेऽभ्यर्णे Śiva. B. 10. 14.

अभ्यर्णता Proximity; (अंशुभिः) प्रतप्तमभ्यर्णतया विवस्वतः Śi. 12. 66.

अभ्यर्थ् 10 A. 1 To request, beg, solicit, ask, entreat (with two acc.); इमं सारंगं प्रियाप्रवृत्तिनिमित्तं अभ्यर्थये V. 4; मां अनभ्यर्थनीयमभ्यर्थयते Māl. 7; अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ R. 4. 58. –2 To long for, desire, woo, court; यदि सा तापसकन्यका अनभ्यर्थनीया Ś. 2.

अभ्यर्थनम्, –ना A request, an entreaty, petition, suit; °नाभङ्गभयेन Ku. 1. 52.

अभ्यर्थनीय, –र्थ्य *pot. p.* To be asked, requested or or desired, कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा R. 10. 40.

अभ्यर्थित *a.* Asked, insisted; काममभ्यर्थितोऽश्नीयात् Ms. 2: 189. **–तम्** A request; उभयाभ्यर्थितेनैतन्मया Y. 2. 88.

अभ्यर्थिन् *a.* One who begs, asks &c.

अभ्यर्दनम् Torturing, distressing.

अभ्यर्ध *a.* Ved. 1 Being on this side. –2 Near. –3 Increasing. **–र्धम्** Nearness. **–Comp.** **–यज्वन्** *m.* granting gifts, increasing the sacrificer's prosperity; सिषक्ति पूषा अभ्यर्धयज्वा Rv. 6. 50. 5.

अभ्यर्ह् 1, 10 P. To salute. honour, worship, pay one's respects or compliments; परशुरामो माल्यवन्तमभ्यर्हयति Mv. 2.

अभ्यर्हणा 1 Worship. –2 Respect, honour, reverence.

अभ्यर्हणीय *pot. p.* Respectable, venerable; °ता –शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् Ms. 9. 23 a position of honour; क्रियतेऽभ्यर्हणीयाय सुजनाय यथाञ्जलिः Śukra. 1. 164.

अभ्यर्हित *a.* 1 Honoured, revered, greatly respectable; अभ्यर्हितं च Vārttika on P. II. 2. 34. Kāsi. 209. –2 Fit, becoming, suitable; अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेणतपोधनानाम् Ki. 3. 11.

अभ्यलंकारः Decoration; Mb.

अभ्यलंकृत *a.* Decorated; Rām. 3.

अभ्यवकर्षणम् Extraction, drawing out.

अभ्यवकाशः An open space.

अभ्यवदान्य Ved. Not liberal.

अभ्यवपद् To protect; ततस्तामभ्यवपत्तुकामो यौगन्धरायणः Svapna.

अभ्यवमन् To despise, reject; न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते Ms. 4. 249.

अभ्यवहित Laid, allayed, put down (*e. g.* dust); पतितैरभ्यवहितं प्रणनाश महीरजः Rām. 2. 40. 33.

अभ्यवस्कन्द 1 P. To jump up or upon, attack.

अभ्यवस्कन्दः, –न्दनम् 1 Vigorously encountering an enemy, impetuous attack, marching against an enemy.

-2 Striking so as to disable an enemy. **-3** A blow in general. **-4** Overtaking, reaching up to. **-5** A fall.

अभ्यवहृ 1 P. **1** To throw, fling, cast. **-2** To collect, draw in, procure, obtain. **-3** To use as food or drink, eat; सक्तून् पिब धानाः खादेत्यभ्यवहरति P. III. 4. 5. Sk. *-Caus.* **1** To cause to throw down (in water). **-2** To cause to take or eat (as food), feed (one with something); शक्नोषि किमनेन शालिप्रस्थेन संपन्नमन्नमस्मानभ्यवहारयितुम् Dk. 131, 72, 132; to take or eat (oneself). **-3** To lay or put on (snares &c.). **-4** To attack; get one to oppose another.

अभ्यवहरणम् **1** Throwing away or down. **-2** Eating, taking food; throwing down the throat (कण्ठादधोनयनम् Mitā.)

अभ्यवहार *a.* Fit to eat; शुचीन्यभ्यवहाराणि मूलानि च फलानि च Rām. 4. 50. 35.

अभ्यवहारः Eating, taking food, eating, drinking &c. Śukra. 3. 30. **-2** Food; जम्भशब्दोऽभ्यवहारार्थवाची Kāśi.; °संवादापेक्षी M. 4; V. 2; Ratn. 2. **-मण्डपः** A dining hall.

अभ्यवहार्य *pot. p.* Fit to eat, eatable; कानि चाभ्यवहार्याणि तत्र तेषां महात्मनाम् Mb. 3. 160. 3. **-र्यम्** Food; सर्वत्रौदरिकस्य अभ्यवहार्यमेव विषयः V. 3.

अभ्यवे [°इ] 2 P. **1** To go down, descend, अवभृथमभ्यवैति Ait. Br. **-2** To perceive, understand.

अभ्यवायनम् Going down, descending.

अभ्यश् 5 A. (P. also in Ved.) **1** To pervade, reach to, get, gain; to make oneself master of.

अभ्यशनम् Pervading, reaching to, gaining.

अभ्याश *a.* Near, proximate. **-शः** **1** Reaching to, pervading. **-2** Proximate neighbourhood, vicinity (also written as अभ्यास q. v.); वायसाभ्याशे समुपविष्टः Pt. 2; सहसाभ्यागतां भैमीमभ्याशपरिवर्तिनीम् Mb., Dk. 62. **-3** Result, consequence. **-4** Prospect, hope of gaining; hence oft. used in the sense of 'quickly'.

अभ्यस् 4 P. **1** To practise, exercise; धन्यो वन्यमतङ्गजः परिचयप्रागल्भ्यमभ्यस्यति Māl. 9. 32; अभ्यस्यतीव व्रतमासिधारम् R. 13. 67; Ms. 11. 106. **-2** To repeat, perform repeatedly; मृगकुलं रोमन्थमभ्यस्यतु Ś. 2. 6; अभ्यस्यन्ति तटाघातम् Ku. 2. 50; K. 183. **-3** To learn, study, acquire or learn by practice, recite, read; वेदमेव सदाभ्यस्येत् Ms. 2. 166; 4. 147, 149; Y. 3. 204; K. 79. **-4** To throw down upon, heap one upon another, accumulate, lay on (Ved.). **-5** To throw or fling at, shoot or aim at (as arrows).

अभ्यसनम् **1** Repetition, repeated practice or exercise; ब्रह्मध्यानाभ्यसनविधिना Bh. 3. 41; स्वाध्यायाभ्यसनम् Bg. 17. 15. **-2** Constant study, close application (to anything); (तां) विद्यामभ्यसनेनेव प्रसादयितुमर्हसि R. 1. 88; अनभ्यसनशीलस्य विद्येव तनुतां गता Rām.

अभ्यसनीय, अभ्यस्य *a. pot. p.* To be repeated, studied; fit to be studied.

अभ्यस्त *p. p.* **1** Repeated, frequently practised, exercised; नयनयोरभ्यस्तमामीलनम् Amaru. 97; used or accustomed to; अनभ्यस्तरथचर्याः U. 5; not accustomed to the use of the chariot; °गुणा च वाणी Māl. 3. 11. **-2** Learnt, studied; शैशवेऽभ्यस्तविद्यानाम् R. 1. 8; Bh. 3. 89. **-3** (In Math.) Multiplied; अयुतं दशकृत्वोऽभ्यस्तं नियुतमुच्यते Nir. **-4** (In gram.) Reduplicated. **-स्तम्** Reduplicated base of a root.

अभ्यासः **1** Repetition in general; व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति S. B.; T. 4. 28; Y. 3. 322. cf. नाभ्यासक्रममीक्षते Pt. 1. 151; Ms. 12. 74; also अन्यायश्च कृतेऽभ्यासः। MS. 10. 3. 26 **-2** Repeated practice or exercise, contiuned practice or use; अविरतश्रमाभ्यासात् K. 30, Pt. 1. 133; अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते Bg. 6. 35, 44 by constant practice (to remain pure and unmodified); 12. 12; योग° Y. 3. 51 practice of concentration; hence sometimes used for 'concentration of mind upon one subject'; °निगृहीतेन मनसा R. 10. 23; so शर°, अस्त्र° &c. **-3** Habit, custom, practice; मिथ्योपपदात् कृञोऽभ्यासे P. I. 3. 71; तद् यथाभ्यासं अभिधीयताम् U. 1 therefore address me as is your wont; अमङ्गलाभ्यासरतिम् Ku. 5. 65; Y. 3. 68. **-4** Discipline in arms, exercise, military discipline. **-5** Reciting, study, repeated reading or learning by heart; काव्यज्ञशिक्षयाभ्यासः K. P. 1; K. 146, 200; Ms. 5. 4; वेद° is of 5 kinds:- वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा॥ Dakṣa. **-6** vicinity, proximity, neighbourhood (for अभ्याश); चूतयष्टिरिवाभ्यासे (शे) मधौ परभृतोन्मुखी Ku. 6. 2; (अभ्यासे-शे मधौ must mean here speaking to 'Madhu who was near her' *scil.* by having manifested himself before her, which fully preserves the simile of Pārvatī, herself silent, speaking to her lover who was near her through her friend); अर्पितेयं तवाभ्यासे सीता पुण्यव्रता वधूः U. 7. 17 given in your charge; Śi. 3. 40; अभ्यासा-शा-दागतः P. II. 1. 38 Sk. (ragarded as an Aluk Compound). **-7** (In gram.) Reduplication. **-8** The first syllable of a reduplicated base, reduplicative syllable; पूर्वोऽभ्यासः P. VI. 1. 4; अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् Sk. **-9** (In Math.) Multiplication. **-10** (In poetry) Repetition of the last verses or lines (as of a chorus); chorus, burden of a song. **-Comp.** **-गत** *a.* approached, gone near. **-परिवर्तिन्** *a.* wandering about or near. **-योगः** abstraction of mind resulting from continuous deep meditation; अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय Bg. 12. 9. **-लोपः** dropping of the reduplicative syllable. **-व्यवायः** interval caused by the reduplicative syllable; °येऽपि though separated by this syllable.

अभ्यासिन् *a.* Practising, exercising.

अभ्यसूयति Den. P. **1** To be angry with, bear malice against, envy, be jealous of (with acc.); न

मां योऽभ्यसूयति Bg. 18. 67; प्रहसन्ति स्म तां केचिदभ्यसूयन्ति चापरे Mb. -2 Not to like, detract from, calumniate; ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् Bg. 3. 32.

अभ्यसूय *a.* Angry, jealous.

अभ्यसूयक *a.* (**-यिका**) Jealous, envious; a detractor; calumniator; मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः Bg. 16. 18.

अभ्यसूया Envy, jealousy, disfavour, anger; शुक्राभ्यसूयाविनिवृत्तये यः R. 6. 74; रूपेषु वेशेषु च साभ्यसूयाः 7. 2, 9. 64; Me. 41, Ku. 3. 4.

अभ्यस्तम् *ind.* 1 [अस्तमभि] Towards sunset; °गम् -इ, -या to go down or set (as the sun) during or with reference to some act. -2 Repeated, again and again; अभ्यस्तं भौतिकं पश्यन् Mb. 12. 278. 16.

अभ्यस्तमयः Setting of the sun during or with reference to some act.

अभ्यस्तमित *a.* One on whom the sun has set while asleep.

अभ्याकर्षः Striking the breast with the flat of the hand as a sign of defiance (as by wrestlers &c). Mb. 1. 4.

अभ्याकाङ्क्षितम् 1 A false charge, groundless complaint. -2 A desire.

अभ्याकारम् *adv.* By drawing to oneself.

अभ्याकाश *ind.* Coverless (निरावरण) अहःसु सततं तिष्ठेदभ्याकाशं निशां स्वपन् Mb. 12. 35. 38.

अभ्याक्रामम् *ind.* By or in stepping near or mutually, in stepping rapidly.

अभ्याख्यात *a.* Falsely accused, traduced.

अभ्याख्यानम् A false charge; calumny, detraction.

अभ्यागम् 1 P. 1 To go near to, draw near, approach; visit; see अभ्यागत below; to come, arrive (as time). -2 To come to, fall into, go to any state; चिन्ताभ्यागतः fell to thinking.

अभ्यागत *p. p.* 1 Come near, approached, arrived; भो भवानभ्यागतोऽतिथिः Pt. 4; क्रमादभ्यागतं द्रव्यम् Y. 2. 119; तस्मिन्नभ्यागते काले Rām. -2 Come as a guest; सर्वत्राभ्यागतो गुरुः H. 1. 103; श्रोत्रियाय अभ्यागताय U. 4; Śi. 4. 68. **-तः** A guest, visitor; °क्रियया नियोजितः Pt. 2; K. 280; Śi. 3. 81.

अभ्यागमः 1 Coming or going near, arrival; a visit; तपोधनाभ्यागमसंभवा मुदः Śi. 1. 23; किं वा मदभ्यागमकारणं ते R. 16. 8; Mv. 2. 22 (v. l.) वसन्तमास° K. 308. -2 Vicinity, neighbourhood. -3 Arriving at or enjoying a result. -4 Rising, getting up. -5 Striking, killing. -6 Encountering, attacking. -7 War, battle. -8 Enmity, hostility.

अभ्यागमनम् Approach, arrival, visit; हेतुं तदभ्यागमने परीप्सुः Ki. 3. 4.

अभ्यागारिकः [अभ्यागारे तत्संबन्धिकर्मणि व्यापृतः ठन्] One who is diligent in supporting a family.

अभ्याघातः 1 An attack, assault, striking. -2 Persuading to steal; अभ्याघातेषु मध्यस्थान् शिष्याच्चौरानिव द्रुतम् Ms. 9. 272.

अभ्याघातिन् *a.* Attacking.

अभ्याचक्ष् 1 To look at. -2 To speak.

अभ्याचर् 1 P. 1 To approach. विशो अदेवीरभ्याचरन्ती Rv. 8. 96. 15. -2 To use, practise, perform.

अभ्याचारः Ved. Approaching (as an enemy); disturbing, attacking.

अभ्याज्ञायः Ved. [ज्ञा-घ] 1 Recognition. -2 Order, command.

अभ्यातन् 8 U. To take aim at, shoot or hurl (missiles) against.

अभ्यातानः Spreading over, stretching, expansion.

अभ्यात्म *a.* Directed towards oneself. **-त्मम्** *adv.* Towards oneself.

अभ्यादा 3 A. 1 To take, seize, snatch. न हीनतः परमभ्याददीत Mb. 1. 88. 8. -2 To put on, wear (garland &c.). -3 To take up (the conversation), to commence speaking (after another).

अभ्यात्त *p. p.* 1 Obtained, got. -2 Occupied or pervaded; epithet of the Supreme Being.

अभ्यादानम् 1 Beginning, commencement, first beginning; ओमभ्यादाने P. VIII. 2. 87 (°ने = आरम्भे Sk.).

अभ्याधा 3 U. To lay on, add (fuel &c.) to apply, throw under; अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् Ms. 8. 372; यथाग्निरभ्याहितं दहति Śat. Br.

अभ्याधानम् Laying on, adding (as fuel).

अभ्याहित *p. p.* 1 Laid down, put on; यथाद्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्ति Bṛi. Up. 2. 4. 10. °पशुः a sort of gift or present; P. VI. 3. 10 Sk. -2 Increased, full blown; यथा सौम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात् Chān. Up. 6. 7. 3.

अभ्यान्त See under अभ्यम्.

अभ्यापातः A calamity, misfortune, evil.

अभ्यामर्दः, -मर्दनम् War, battle, conflict, attack.

अभ्यायम् 1 P. 1 To stretch, extend, lengthen (sound), draw or pull (as a rudder). -2 To give. -3 To aim at. -4 To restrain. -5 To approach, visit (= अभ्यागम्).

अभ्यायंसेन्य *a.* Ved. One who allows himself to be drawn near (said of अश्विन् Rv. 1. 34. 1.)

अभ्यारम् *adv.* Near, at hand; by going near.

अभ्यारुह् 1 P. 1 To ascend, go up to, reach, get to (mostly Ved.).

अभ्यारूढ *p. p.* 1 Ascended, gone up to. –2 Surpassed, excelled.

अभ्यारोहः,–रोहणम् 1 Ascending, mounting, going up to. –2 Ascending in prayer or devotion, muttering holy prayers; अथातः पवमानानामेवाभ्यारोहः Bṛi. Up. 1. 3. 28. –3 Transition from one place or state to another. –4 Progress.

अभ्यारोहणीयः N. of a religious ceremony.

अभ्यावृत् 1 A. 1 To come up to, approach. –2 To come again, be repeated. –*Caus.* 1 To come down, approach. –2 To repeat (as सावित्री).

अभ्यावर्तः 1 Repetition. –2 A hymn the verses of which are repeated in singing (आवृत्तिस्तोत्रम्). **–र्तम्** *adv.* By repeating, repeatedly.

अभ्यावर्तिन् *a.* Recurring; आत्मीयास्ते ये पराञ्चः पुरस्तादभ्यावर्ती संमुखो यः परोऽसौ Śi. 18. 18.

अभ्यावृत्त *p. p.* Come near to, repeated. **–त्तः** The residue of sacrificial offerings (होमशेषद्रव्यम्).

अभ्यावृत्तिः *f.* Repetition, recurrence (so many times); see P. V. 4. 17, and Sk. thereon; see अनभ्यावृत्ति also.

अभ्याश–स see under अभ्यश्-स्.

अभ्यासद् 1 P. 1 To get, obtain, attain; स्वमिव पुरुषकारं शैलमभ्याससाद Ki. 5. 52. –2 To sit oneself in (acc.). –*Caus.* To attack, assail.

अभ्यासादनम् Attacking or facing an enemy.

अभ्याहन् 2 P. To strike, smite, wound, injure, kill, destroy; वृक्षस्य यो मूलेऽभ्याहन्यात् Ch. Up.

अभ्याहत *p. p.* 1 Struck, beaten. –2 Affected, smitten; अभ्याहतं कीर्तिविपर्ययेण (हृदयम्) R. 14. 33; मृत्युना °तः &c. –3 Impeded, obstructed; रक्षोभिरभ्याहतकर्मवृत्तिः Bk. 1. 17. –4 Faulty, erroneous; अनभ्याहतचित्तः स्यादनभ्याहतवाग्भवेत् Mb. 12. 245. 16.

अभ्याहननम् 1 Striking, hurting, killing. –2 Impeding, obstructing.

अभ्याहृ 1 P. 1 To bring towards, bring near; to give or hand over; गृहीत्वा फलमूलं च रामस्याभ्याहरन् बहु Rām. to carry off; पशुरभ्याहृतो राजन् प्रनष्टस्तव दुर्नयात् Rām. 1. 61. 7. –2 To rob, plunder.

अभ्याहारः 1 Bringing near or towards, conveying –2 Robbing.

अभ्याहार्य *pot. p.* To be eaten.

अभ्युक्त *a.* Said with reference to some object.

अभ्युक्ष् 1. 6 U. To sprinkle over.

अभ्युक्षणम् 1 Sprinkling over, wetting; परस्पराभ्युक्षणतत्पराणाम् (तासाम्) R. 16. 57. –2 Consecration by sprinkling; (प्रोक्षण, अभ्युक्षण and अवोक्षण are thus distinguished; उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्तितम्। न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्॥).

अभ्युचित *a.* Usual, customary.

अभ्युच्चयः [चि-अच्] 1 Increase, augmentation, growth. –2 Prosperity. –3 Addition; तथाभ्युच्चयो यदिदमिह भवतीति विज्ञायते अपरमपि भवतीति विज्ञानम्। ŚB. on MS. 10. 1. 1.

अभ्युच्छ्रित *a.* Uplifted, upraised; elevated by, distinguished for अभ्युच्छ्रिता कर्मभिरप्यवन्ध्यैः R. 16. 2.

अभ्युत्क्रुष्ट *p. p.* Praised with loud acclamations.

अभ्युत्क्रोशनम् Loud acclamation; °मन्त्र a hymn of applause.

अभ्युत्था 1 P. To rise for another, rise in honour of, rise to greet; नाभ्युत्तिष्ठन्ति गुरून् K. 108; Ś. 3; मामियमभ्युत्तिष्ठति देवी M. 5. 6; Śi. 4. 68.

अभ्युत्थानम् 1 Rising (from a seat) to do honour, rising in honour of; नाभ्युत्थानक्रिया यत्र Pt. 2. 62. –2 Starting, departure, setting out; arrangements for starting; अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशी। कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः॥ Rām. 6. 92. 62. –3 Rise (lit. and fig.), elevation, exaltation, prosperity, dignity, a position of dignity or authority; (तस्य) नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः R. 4. 3; यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् Bg. 4. 7 when impiety increases or is in the ascendant. –4 Sunrise.

अभ्युत्थायिन् *a.* Rising to greet or in honour of.

अभ्युत्थित *p. p.* 1 Risen, arisen, gone up. –2 Blazing, flaming (fire); R. 1. 53. –3 Elevated, exalted.

अभ्युत्पत् 1 P. To fly up to, jump up to, leap upon. –*Caus.* To cause to fly up to (acc.).

अभ्युत्पतनम् Springing or leaping against, sudden spring or leap, assault; अलक्षिताभ्युत्पतनो नृपेण R. 2. 27.

अभ्युदाहरणम् An example or illustration of a thing by its reverse.

अभ्युदि 2 P. [अभि+उद्-इ] 1 To rise (fig. also); go up (as the sun); एनांस्त्वभ्युदितान्विद्याद् यदा प्रादुष्कृताग्निषु Ms. 4. 104. –2 To rise over (one); तं चेदभ्युदियात्सूर्यः शयानं कामचारतः Ms. 2. 220, 219. –3 To come into existence, happen, originate. –4 To engage in combat with (one), encounter, (लोकवीरान्) को जीवितार्थी समरेऽभ्युदियात् Mb. –5 To prosper, thrive,

अभ्युदय *a*. Rising. **–यः 1** Rise (of heavenly bodies); sunrise. **–2** Rise, prosperity, good fortune, elevation, success; स्पृशन्ति नः स्वामिनमभ्युदयाः Ratn. 1 success; भवो हि लोकाभ्युदयाय तादृशाम् R. 3. 14; Ms. 3. 254; Bh. 2. 63; R. 12. 3, V. 5. **–3** A festival; any religious or festive celebration, festive occasion; °कालः joyous or festive occasion; Ś. 7; प्रतिषिद्धा पिबेद्या तु मद्यमभ्युदयेष्वपि Ms. 9. 84. **–4** Beginning, commencement. **–5** Occurrence, happening. **–6** Accomplishment of a desired object (which is the cause of festivity). **–7** The *tonsure* ceremony. **–8** A Śrāddha performed on account of child-birth (वृद्धिश्राद्धम्) **–Comp. –अर्थकम्** Śrāddha for prosperity or elevation. **–इष्टिः** *f*. N. of a particular expiatory sacrifice.

अभ्युदयिन् *a*. Rising, going up.

अभ्युदित *p. p.* **1** Risen; occurred. **–2** Elevated, risen to prosperity. **–3** Asleep at sunrise, over whom the sun has risen; सूर्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः Ms. 2. 221. **–4** Celebrated as a festival. **–ता** N. of a religious ceremony. **–तम्** Rising, sunrise.

अभ्युद्गम् 1 P. **1** To go forth to meet. **–2** To extend, spread.

अभ्युद्ग *a*. Rising, uprisen.

अभ्युद्गत *p. p.* **1** Gone forth to meet. **–2** Extended, spread; elevated.

अभ्युद्गमः, –मनम्, –गतिः *f*. **1** Going forth to meet or to do honour (to a guest or to a venerable person). **–2** Rising, occurring, originating.

अभ्युद्दृष्टम् Becoming visible (of a star). **–ष्टा** N. of a ceremony.

अभ्युद्धृत *a*. **1** Taken out, taken up; अभ्युद्धृतैर्जलैः Y. 1. 17. **–2** Got without solicitation. **–3** Got after a request.

अभ्युद्यम् 1 P. **1** To bring, offer. **–2** To lift up.

अभ्युद्यत *p. p.* **1** Raised, lifted up; as °आयुध, °शस्त्र, °कर &c. **–2** Prepared or ready, exerting oneself for (with inf., dat; loc. or in comp.); चण्डी चण्डं हन्तुमभ्युद्यता माम् M. 3. 21, प्रहर्तुमभ्युद्यतमात्मयोनिम् Ku. 3. 70; दिनकररथमार्गविच्छित्तयेऽभ्युद्यतं यच्चलच्छृङ्गम् Bri. S. 12. 7; Me. 59; Ms. 9. 302. **–3** Gone forth, risen, appearing forth or approaching; कुलमभ्युद्यतनूतनेश्वरम् R. 8. 15. **–4** Given or brought unsolicited.

अभ्युन्नत *a*. **1** Raised, elevated; अभ्युन्नता पुरस्तात् Ś. 3. 7. **–2** Projecting upwards; very high; अभ्युन्नताङ्गुष्ठनखप्रभा Ku. 1, 33.

अभ्युन्नतिः *f*. Great elevation or prosperity.

अभ्युपगम् 1 P. **1** (*a*) To go to or near, approach; परलोकमभ्युपगते (भर्तरि) विविशुः Śi. 9. 13. (*b*) To come to the help of; वयमभ्युपगच्छामः कृष्णेन त्वां प्रधर्षितम् Hariv. (*c*) To have recourse to. (*d*) To arrive at (a point of time); आषाढीमभ्युपगतो भरतः Rām. **–2** To obtain, get. **–3** To admit, grant, own; अभ्युपगतं तावदस्माभिरेवम् Ś. 5 we admit all this; Mu. 3. **–4** To assent to, agree to, undertake, promise; Dk. 73. –*Caus.* To induce or cause one to assent to or grant; मामभ्युपगमय्य Dk. 60, 118.

अभ्युपगत *p. p.* **1** Approached, agreed or assented to; granted; suffered; देव्या मद्वचनात्तथाभ्युपगतः पत्युर्वियोगस्तदा Ratn. 4. 20; promised &c. **–2** Inferred, probable. **–3** Similar.

अभ्युपगमः 1 Approach, arrival. **–2** Granting, admitting, accepting to be true. P. VIII. 3. 74 Sk.; confession (as of guilt); करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः Ratn. 2. 18. **–3** Undertaking, promising; निर्णय° M. 1; a contract, agreement, promise; क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते Ms. 9. 53. **–4** Probable ascertainment, belief; judgment, a view accepted; युष्माकमभ्युपगमाः प्रमाणं पुण्यपापयोः Mv. 1. 38. supposition, inference. **–5** Analogy, affinity. **–Comp. –सिद्धान्तः** an admitted proposition or axiom; Nyāyadarśana.

अभ्युपगमित *Caus. p. p.* Made to consent, obtained by free consent. **–तः** A slave for a fixed term.

अभ्युपपद् 4 A. **1** To deliver (from distress), protect; to console, comfort, take compassion or pity on, pity, favour; स सुहृद्यो विपन्नार्थं दीनमभ्युपपद्यते Rām. 6. 63. 27; रातिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः Ku. 4. 25; (कदा) तपः कृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम् 5. 61; U. 2; 3. 7; Mal. 4. **–2** To ask for help, seek protection, submit; अभ्युपपन्नवत्सलः Mk. 7. **–3** To furnish with.

अभ्युपपत्तिः *f*. **1** Approaching to assist, taking pity or compassion on, favouring; a favour, kindness; अभ्युपपत्त्या अस्या जीवितमवलम्बस्व Ś. 3; अनयाभ्युपपत्त्या Ś. 4; मम° निमित्तम् Mk. 1. **–2** Consolation. **–3** Protection, defence; ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् Ms. 8. 112, 349; 10. 62; आर्त° Dk. 39. **–4** An agreement, assent, promise. **–5** Impregnation of a woman (especially of a brother's widow as an act of duty); मात्रोरभ्युपपत्तिश्च धर्मोपनिषदं प्रति Mb. 1. 1. 114.

अभ्युपपन्न *a*. Protected, rescued; asked for protection or help; अभ्युपपन्नवत्सलः खलु तत्रभवानार्यचारुदत्तः श्रूयते Mk. 7.

अभ्युपपादनम् Protection &c.

अभ्युपस्थित *a*. Accompanied, assisted; निवासमकरोद्धीमान् सुग्रीवेणाभ्युपस्थितः Mb. 3. 280. 40.

अभ्युपाकृत *a*. Asked to take part in a ceremony.

अभ्युपाश्रयः Shelter, support; कोऽयं कस्य कुतो वापि किं कार्यं कोऽभ्युपाश्रयः Rām. 5. 48. 55.

अभ्युपे 2. P. [°उप–इ] **1** To go near, approach, arrive, enter; व्यतीतकालस्त्वहमभ्युपेतः R. 5. 14, 16, 22; त्रिरह्नोऽ

भ्युपयन्नपः Ms. 11. 259 entering the water *i. e.* bathing; Y. 3. 3. **-2** To go to or enter a particular state, attain to; सत्यं न तद्यच्छलमभ्युपैति H. 3. 54 so ब्राह्मणतां, वैश्यतां, सखित्वम् &c. **-3** To agree, (to do something), accept, promise, undertake; मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः Me. 40. अस्यै दास्यमभ्युपेतं मया Dk. 44, 55, 89, 138, 159. **-4** To admit, grant, own, acknowledge, Śi. 11. 67; श्रुत्यैव च तर्कस्याभ्युपेतत्वात् Ś. B.; Dk. 45. **-5** To approve, agree with, assent to. **-6** To obey, submit to, be faithful to; विरोध्य मोहात्पुनरभ्युपेयुषाम् Ki. 18. 42.

अभ्युपायः **1** A promise, an engagement, agreement. **-2** A means, an expedient, remedy; अस्मिन्सुराणां विजयाभ्युपाये Ku. 3. 19; यैरभ्युपायैरेनांसि मानवो व्यपकर्षति Ms. 11. 210.

अभ्युपायनम् A complimentary present; inducement, bribe.

अभ्युपेत्य *ind.* Having approached; having aggreed or promised. **-Comp. -अशुश्रूषा** one of the 18 titles of Hindu law, breach of contract or engagement between master and servant (where the servant does not work having agreed to do so).

अभ्युषः, अभ्यूषः, अभ्योषः [अभितः उ-ऊ-ष्यते अग्निना दह्यते, उ-ऊ-ष् बाहु° क] **1** A sort of cake or bread (Mar. पोळी or रोटी) (अर्धस्विन्नयवादेर्घृतादिना भर्जितयवादेर्वा घृतपक्वान्नस्य 'पोळी' इति ख्यातस्य नाम). **-2** Half parched food (in general).

अभ्यु (-भ्यू) ष्य, -षीय, अभ्योष्य, अभ्योषीय *a.* Belonging to, consisting of, or fit for, the above cake.

अभ्युषित *a.* [वस्-क्त] Dwelling near or with. **-तः** A servant who is in attendance.

अभ्यूढ *a.* [वह्-क्त] Brought near.

अभ्यूह् 1 U. **1** To cover over, clothe. **-2** (A.) To watch for; form a plot against. **-3** To infer, guess. **-4** To reason, argue, think over; Dk. 90. **-5** To supply an ellipsis.

अभ्यूहः [ऊह्-घञ्] **1** Arguing, reasoning, discussion. **-2** Deduction, inference, guess, coniecture; पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति Māl. 1. 14. **-3** Supplying an ellipsis **-4** Understanding.

अभ्येषणम् [इष्-घञ्] **1** Desiring, wishing. **-2** Going towards, attack.

अभ्र् 1 P. [अभ्रति, आनभ्र, अभ्रित] To go, wander about; वनेष्वानभ्र निर्भयः Bk. 4. 11; 14. 110.

अभ्रम् [अभ्र्-अच्; but more correctly अप्-भृ; अपो बिभर्ति भृ-क; अभ्रम् अब्भरणात् Nir. being filled with water] **1** A cloud; अग्निर्वै धूमो जायते धूमादभ्रमभ्राद् वृष्टिः Śat. Br.; अभ्रं वा अपां भस्म; धूमो भूत्वा अभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति Ch. Up. V. 10. 5. 6. (these quotations show the conception of the ancient Ṛiṣis about the formation of clouds). **-2** Atmosphere, sky; परितो विपाण्डु दधदभ्रशिरः Śi. 9. 3. See अभ्रंलिह &c. **-3** Talc, mica. (Mar. अभ्रक) **-4** Gold. **-5** Camphor. **6-** A kind of reed; Calamus Rotang (वेतस्, वेत्र). **-7** Cyperus Rotundus (मुस्ता). (Mar. नागरमोथा) **-8** (In arith.) A zero or cypher. [cf. L. *imber*; *Gr. ombros, appros*; Zend *awra*, Pers. *abr*] **-Comp. -अवकाशः** clouds as the only shelter; fall of rain. **-अवकाशिक, -काशिन्** *a.* exposed to the rain (and so practising penance), not seeking shelter from the rain; अभ्रावकाशा वर्षासु हेमन्ते जलसंश्रयाः Mb. 12. 244. 10; ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः Ms. 6. 23. **-उत्थः** 'sky born', the thunderbolt of Indra. **-कूटम्** a peak of a (mountain-like) cloud. **-गङ्गा** the heavenly river; K. 50. **-घनः** a mass of clouds; वर्षात्ययेन रुचमभ्रघनादिवेन्दोः R. 13. 77. **-जा** *a.* Ved. born from clouds, caused by vapours, यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीन्त्सचतां पर्वतांश्च Av. 1. 12. 3. **-नागः** one of the elephants supporting the globe; N. of Airāvata. **-पथः** **1** atmosphere. **-2** balloon. **-पिशाचः, -चकः** 'sky-demon', epithet of Rāhu. **-पुष्पः** N. of a cane (Mar. वेत) Calamus Rotang. See अभ्र (6). (**-ष्पम्**) **1** water. **-2** 'a sky flower', anything impossible, a castle in the air. **-प्रुष् (ट्)** *f.* sprinkling of clouds, rain.-अभ्रप्रुषो न वाचा प्रुषा वसु Rv. 10. 77. 1. **-मांसी** N. of a plant (जटामांसी). **-मातङ्गः** Indra's elephant, Airāvata. **-माला, -वृन्दम्** a line, succession, or mass of clouds; मयूरकेकाभिरिवाभ्रवृन्दम् R. 7. 69. 13. 76, 16. 25; मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् Me. 65. **-रोहम्** the *lapis lazuli* (लाजवर्त, आकाशमणि) **-लिप्ती** **1** sky covered with a few clouds. **-2** a woman smeared with *mustā* grass. **-वर्ष** *a.* Ved. rained upon, sprinkled with water. (**-र्षः**) down-pour of rain. **-वाटिकः, -का** N. of a tree (आम्रातक; Mar. अंबाडा). **-विलायम्** *ind.* just as clouds melt away; विच्छिन्नाभ्रविलायं वा विलीये नगमूर्धनि Ki. 11. 79.

अभ्रंलिह *a.* [अभ्रं लेढि स्पृशति; खश् मुमागमश्च वहाभ्रेलिहः P. III. 2. 32] 'Cloud-licking', touching or scraping the clouds (very high); अभ्रंलिहाग्राः प्रासादाः Me. 66; प्रासादमभ्रंलिहमारुरोह R. 14. 29.; K. 270; Śi. 5. 65. **-हः** Wind.

अभ्रकम् [स्वार्थे कन्] Talc, mica; said to be produced from Pārvatī's menstrual discharge. **-Comp. -भस्मन्** *n.* calx of talc. **-सत्त्वम्** steel.

अभ्रंकष *a.* [अभ्रं कषति पीडयति तुङ्गत्वात्; खच् मुमागमश्च सर्वकूलाभ्रकरीषेषु लिहः P. III. 2. 42] Touching or scraping the clouds, very high; आदायाभ्रंकषं प्रायान्मलयं फलशालिनम् Bk.; K. 33; Dk. 110; Mv. 6. 7. (v. l.) **-षः** **1** Wind, air; अभ्रंकषो वायुः Sk. **-2** A mountain.

अभ्रयन्ती *f.* **1** Forming clouds, bringing rainy weather. **-2** Name of one of the seven Kṛittikās; Yv. Ts.

अभ्रायते Den. A. To create clouds, make cloudy; अभ्रं करोति अभ्रायते Sk.

अभ्रित *a.* [अभ्राणि अस्य संजातानि; अभ्र-इतच् तारकादिगण] Overcast with clouds, clouded; ददर्श काले दिवमभ्रितामिव R. 3. 12.

अभ्रिय *a.* [अभ्रे भवः घञ्;] Belonging to or produced from clouds, sky **–यः** Lightning, **–यम्** A mass of thunder-clouds.

अभ्रयः ‘ One who is clothed only by the air ’, an ascetic who is stark-naked.

अभ्रम *a.* Not mistaking, steady, clear. **–मः** Composure, steadiness.

अभ्रमुः *f.* The female elephant of the east, the mate of Airāvata, Indra’s elephant, सलीलयातानि न भर्तुरभ्रमोर्न (प्रशशंस) Śi. 1. 52. **–Comp. –प्रियः, –वल्लभः** Airāvata.

अभ्रातृव्य *a.* Without a rival or enemy., अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि Rv. 8. 21. 13.

अभ्रान्त *a.* Composed, steady.

अभ्रान्तिः *f.* Composure, steadiness.

अभ्रिः, –भ्री *f.* [अभ्रति गच्छति मलं यस्मात् or येन, अभ्र–इन्] **1** A wooden scraper or sharp-pointed stick (for cleaning a boat). **–2** A spade, hoe in general, अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः Ms. 11. 134. **–Comp. –खातम्** ‘ dug up with a spade ’, a ploughed field.

अभ्रेषः Non-deviation, fitness, propriety. P. III. 3. 37.

अभ्व *a.* **1** Huge, large (महत् Nir.). **–2** Mighty strong or powerful. **–3** monstrous, immense, terrible; आ यो नो अभ्व ईषते Rv. 1. 39. 8. **–भ्वम्** Immense power, immensity. **–2** Monstrosity, hugeness; (the great pervading principle of the universe; water; a cloud; embarrassed state, calamity; a monster; अरीरमत् पतयत् कच्चिदभ्वम् Rv. 6. 71. 5; closeness; offspring, given by B. and R.)

अम् *ind.* **1** Quickly. **–2** A little. cf. also अं सुखं कश्मलं दुःखं पूर्णं दूरं गतं वरम् Enm.

अम् 1 P. [अमति, अमितुम्, अमित Ved. pres. आमिति; अमीति] **1** To go; to go to or towards. **–2** To serve, honour. **–3** To sound. **–4** To eat. **–5** To be pernicious or dangerous; वराहमिन्द्र एमुषम् Rv. 8. 77. 10. 10 P. or *Caus.* (आमयति) **1** To come upon, attack, afflict with sickness or pain from disease. **–2** To be ill or be afflicted or diseased. –With सम् Ved. 1 A. **1** to convince oneself of, ascertain. **–2** to ally or connect oneself with. **–3** To fix or settle oneself.

अम *a.* Unripe (as fruit). **–मः 1** Going. **–2** Pressure, weight; strength, power (बलम्). **–3** Fright, terror. **–4** Sickness, disease. **–5** A servant, follower, an attendant. **–6** Vital air, life-wind (प्राण). **–7** This self. **–8** Unmeasured state. **–मा 1** Soul. –2 Unmeasured state.

अमवत् *a.* Ved. **1** Violent, strong, stormy (winds); powerful (sound also). **–2** Persevering, constant. **–3** Capable, fit, proper. **–4** Attended by ministers. **–5** Attended by diseases. **–6** Possessed of self. *–ind.* Voilently, impetuously; य आश्वश्वा अमवद् वहन्त Rv. 5. 58. 1.

अमतः [अम्–अतच् Uṇ. 3. 110.] **1** Sickness, disease. **–2** Death. **–3** Time. **–4** Dust, particle of dust.

अमतिः [अम्–अति Uṇ. 4. 59.] **1** Time. **–2** The moon. **–3** (Ved.) Form, shape (Nir.). **–4** Want, poverty. *a.* poor, indigent; अनापिरज्ञा असजात्यामतिः Rv. 10. 39. 6. **–अमतीवत्** *a.* Ved. **1** Evil-minded, wicked (दुष्ट, अप्रशस्तबुद्धिमत् Sāy.). **–2** Poor, indigent; न मे स्तोतामतीवा न दुर्हितः स्यादग्ने न पापया Rv. 8. 19. 26.

अमङ्गल,–ल्य *a.* **1** Inauspicious, evil, ill; R. 12. 43; °अभ्यासरतिम् Ku. 5. 65; अमङ्गल्यं शीलं तव भवतु नामैकमाखिलम् Puṣpadanta. **–2** Unlucky, unfortunate. **–लः** The castor-oil tree (एरण्ड). **–लम्** Inauspiciousness, ill-luck; evil; oft. used in dramatic literature; शान्तं पापं प्रतिहतममङ्गलम्; cf. God forbid.

अमण्ड *a.* **1** Without decoration or ornaments. **–2** Without froth or scum (as boiled rice). **–ण्डः** The castor oil tree (एरण्ड) Ricinus communis.

अमण्डित *a.* unadorned.

अमत *a.* **1** Not felt, not perceptible by the mind, unknown. **–2** Disliked, not agreed to, see under अम् also. **–Comp. –परार्थता** ‘ an unaccepted second sense ’, one of the faults of a word (शब्ददोष); अमतः प्रकृतविरुद्धः परार्थो यत्र; *e. g.* in राममन्मथशरेण ताडिता &c. (R. 11. 20) the second sense suggestive of शृङ्गाररस is opposed to the proper *rasa* of the passage which is either वीर or बीभत्स; K. P. 7.

अमति *a.* Evil-minded, wicked, depraved. **–तिः** A rogue, cheat. **–तिः** *f.* **1** Ignorance, unconsciousness, absence of knowledge, intention, or fore-thought; अमत्यैतानि षड् जग्ध्वा Ms. 5. 20; 4. 222. For some of the other senses see under अम्. **–Comp. –पूर्व** *a.* unconscious, unintentional.

अमत्र *a.* Ved. [अम्-अत्रन् Uṇ. 3. 105.] Overpowering (enemies), strong or disposed to march on (गमनशील); स्वरिरमत्रो ववक्षे रणाय Rv. 1. 61. 9. **–त्रम्, –त्रकम्** [अमति भुङ्क्ते अन्नमत्र, आधारे अत्रन्] **1** A pot, vessel, utensil. उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकम् Bhāg. 10. 9. 7. अन्येषां चाप्यमत्राणां सौवर्णानामनेकशः Śiva. B. 29. 59. **–2** Strength, power.

अमत्रिन् *a.* Ved. **1** Strong, powerful. **–2** Having a drinking vessel.

अमत्सर *a.* Unenvious, disinterested; यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः Ms. 3. 231.

अमद *a.* **1** Free from intoxication, grave, serious. **–2** Sorrowful.

अमदनः Name of Śiva. Bhaviṣya P.

अमत्त *a.* Sober, sane.

अमधव्य *a.* Not sweet, not worthy of the sweetness of Soma.

अमनस्, –अमनस्क *a.* 1 Without the organ of desire, thought &c. –2 Devoid of intellect (as a child). –3 Inattentive, careless. –4 Having no control over the mind. –5 Devoid of affection. *n.* (**–नः**) 1 Not the organ of desire, non-perception. –2 Inattention. *m.* The Supreme Being. –**Comp.** **–गत** *a.* Unknown, unthought of. **–नीत, –ज्ञ** *a.* Disapproved, condemned; reprobate. **–योगः** Absence of concentration of mind, inattention. **–हर** *a.* displeasing, disagreeable.

अमनस्विन् *a.* 1 Unintelligent. –2 Inhuman (as a demon).

अमीनः [अम्–अनिः, अमति गच्छत्यत्र Uṇ 2. 101] Motion (गतिः); way.

अमनाक् *ind.* Not a little, greatly, very much.

अमनुष्य *a.* 1 Not human, not manly. –2 Not frequented by man. **–ष्यः** 1 Not a man; नामनुष्ये भवत्यग्निः Rām. 2. 93. 22. –2 A demon, fiend (= रक्षःपिशाचादि Sk. on P. II. 4. 23). **–ता** Unmanliness.

अमन्तु *a.* Ved. 1 Unwise, foolish. –2 Guiltless, innocent. –3 Despising.

अमन्त्र, –न्त्रक *a.* 1 Not accompanied by Vedic verses, not requiring the repetition of Vedic texts, as a ceremony &c.; सायं त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत् Ms. 3. 121, 2. 66. –2 Not entitled to Vedic verses, such as a Śūdra, a female &c.; निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः Ms. 9. 18. –3 Not knowing Vedic texts; अव्रतानाममन्त्राणाम् Ms. 12. 114. –4 Not accompanied by the use of spells or incantations, as a cure &c.; अनया कथमन्यथावलीढा न हि जीवन्ति जना मनागमन्त्राः Bv. 1. 111. –**Comp.** **–ज्ञ** *a.* Not knowing Vedic texts or hymns; Ms. 3. 129. **–तन्त्र** *a.* Without the use of spells or the magical feats attendant on them, without the use of magical arts; अमन्त्रतन्त्रं वशीकरणम् Pt. 1. 70. **–विद्** *a.* Not knowing Vedic hymns.

अमन्द *a.* Not slow or dull, active, intelligent; मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः M. 2. 8. –2 Sharp, strong, violent (wind &c.). –3 Not little, much, excessive, great, violent; अमन्दमददुर्दिन U. 5. 5; अमन्दमिलदिन्दिरे निखिलमाधुरी मन्दिरे Bv. 4. 1; °दष्टौष्ठकरावधूननम् Ki. 8. 6 violently bit. **–न्दः** N. of a tree.

अमन्यमान *a.* Ved. 1 Not understanding; offering no homage; अमन्यमानाँ अभि मन्यमानैः Rv. 1. 33. 9. –2 Not being aware of; अमन्यमानाञ्छर्वा जघान Rv. 2. 12 10.

अमन्युत *a.* Ved. Not bearing ill-will towards another; अमन्युता नो वीरुधो भवन्तु Av. 12. 3. 31.

अमम *a.* Without egotism, without any selfish or worldly attachment, devoid of personal ties or desires; शरणेष्वममश्चैव वृक्षमूलनिकेतनः Ms. 6. 26 **–मः** The twelfth Jaina saint of a future उत्सर्पिणी.

अममता, –त्वम् Indifference, disinterestedness.

अमम्रि *a.* Ved. Immortal; अमम्रिर्भवामृतोऽतिजीवो Av. 8. 2. 26.

अमर *a.* [मृ–पचाद्यच् न. त.] Undying, immortal, imperishable; अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् H. Pr. 3, Ms. 2. 148. अजरोऽमरोऽमृतः Bṛi. Up. 4. 4. 25. **–रः** 1 A god, deity. –2 N. of a Marut. –3 N. of a plant Euphorbia Tirucalli (स्नुहीवृक्ष; Mar. शेर). Tiaridium Indicum (हस्तिशुण्ड ?; Mar. सुरुंडी). –4 Quick-silver. –5 Gold. –6 A species of pine. –7 The number 33. (that being tbe number of Gods.) –8 N. of Amarasiṁha, see below; of a mountain. –9 Mystical signification of the syllable उ. –10 A heap of bones. **–रा** 1 The residence of Indra (cf. अमरावती). –2 The naval string; umbilical cord. –3 The womb. –4 A house-post (स्थूणा). –5 N. of several plants; इन्द्रवारुणी, वटी, महानीली, घृतकुमारी, स्नुही, गुडूची, दूर्वा. **–री** The same as अमरा. –**Comp.** **–अङ्गना, –स्त्री** a celestial nymph, heavenly damsel; मुषाण रत्नानि हरामराङ्गनाः Śi. 1. 51. **–अद्रिः** 'mountain of the gods'; हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितम् Bhāg. 10. 59. 2. N. of the mountain Sumeru. **–अधिपः, –इन्द्रः, –ईशः, –ईश्वरः, –पतिः, –भर्ता, –राजः** &c. 'The lord of the gods', epithets of Indra; प्रेमदत्तवदनानिलः पिबन्नत्यजीवदमरालकेश्वरौ R. 19. 15. शान्तं पापं न वः किंचित् कुतश्चिदमराधिप Rām. 2. 74. 22. sometimes of Śiva and Viṣṇu also, **–आचार्यः, –गुरुः, –इज्यः,** 'preceptor of the gods', epithets of Bṛihaspati. **–आपगा, –तटिनी, –सरित्** *f.* the heavenly river, an epithet of the Ganges; °तटिनीरोधसि वसन् Bh. 3. 123. **–आलयः** the abode of the gods, heaven, तत्रामरालयमरालमरालकेशि N. **–उत्तम** *a.* the best of the gods. **–उपम** *a.* God-like. **–कण्टकम्** N. of the part of the Vindhya range which is near the source of the river Narmadā. **–कोटः** 'the fortress of the immortals', N. of the capital of a (modern) Rajaput state. **–कोशः, –षः** N. of the most popular Sanskrit lexicon called after the author अमरसिंह. °कौमुदी Title of a commentary on अमरकोश. **–गुरुः** 1 Bṛihaspati. –2 The planet Jupiter. **–चन्द्रः** Name of the author of Bālabhārata. **–(रं)जयः** Conquering the gods. Bhaviṣya P. **–जः** N. of a tree, a kind of खदिर. **–तरुः, –दारुः** 1 a celestial tree, a tree in the paradise of Indra; अमरतरुकुसुमसौरभसेवनसंपूर्णसकलकामस्य Bv. 1. 28. –2 देवदारु –3 the wish-yielding tree. **–दत्तः** Name of a lexicographer, of a prince. Ks. **–द्विजः** a Brāhmaṇa who lives by attending a temple or idol; or one who superintends a temple. **–पुरम्** 1 the residence of the gods, celestial paradise. –2 N. of various other towns. **–पुष्पः, –ष्पकः** 1 N. of several plants (केतक, चूत). –2 N. of a kind of grass. –3 the wish-yielding tree (कल्पवृक्ष). **–पुष्पिका** N. of a plant (अधःपुष्पीवृक्ष); a kind of anise. **–प्रख्य, –प्रभ** *a.*

like an immortal. **–प्रभुः** one of the 1000 names of Viṣṇu. **–माला** N. of a lexicon. (said to be composed by the same author as that of Amarakośa.) **–रत्नम** a crystal. **–राजः** N. of Indra. **–लोकः** the world of the gods, heaven; °ता heavenly bliss; तेषु सम्यग्वर्तमानो गच्छत्यमरलोकताम् Ms. 2. 5. **–वल्लरी** N. of a plant (आकाशवल्ली). **–सिंहः** N. of the author of *Amarakośa*; he was a Jaina and is said to have been one of the 9 gems that adorned the court of king Vikramāditya. The dates of many of these 'gems' are still doubtful. **–स्त्री** An Apsaras or a nymph of heaven.

अमरणम् Not dying, immortality.

अमरता, –त्वम् The state of the gods, immortality.

अमरावती [अमर–वत्, र being changed to रा by P. VI. 3. 119] **1** Abode of the gods, residence of Indra (said to be above Meru or the sun's orb; cf. Ki. 7; 2); ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती K. P. 1. **–2** N. of a modern town in Berar, Amravati.

अमरिष्णु, –अमर्त *a.* Ved. Immortal.

अमर्त्य *a.* Immortal, divine, imperishable; °भावेऽपि R. 7. 53; °भुवनम् heaven; °ता immortality. **–र्त्यः** A god. **–Comp.** **–आपगा** the celestial river, epithet of the Ganges; Vikr. 18. 104. **–भुवनम्** The heaven. **–वधूः** An Apsaras or a nymph of heaven; लेभे परां द्युतिममर्त्यवधूसमूहः Ki. 6. 46.

अमरी A goddess; अमरीकबरीभारभ्रमरीमुखरीकृतम् Kuval.

अमरुः, –अमरुकः N. of a king and poet who composed 100 verses which are usually known by the name अमरुशतक; प्रज्ञानवानमरुकस्य कवेः प्रसारश्लोकाञ्छतं विवृणुतेऽर्जुनवर्मदेवः Amaru.

अमर्दित *a.* Unthreshed, untrodden, unsubdued.

अमर्मन् *a.* Ved. Not a vital organ or part of the body, having no joint or vital part. येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म Rv. 3. 32. 4. **–Comp.** **–जात** *a.* not produced in a vital organ. **–वेधिन्** *a.* not injuring the vital parts; mild, soft. **–वेधिता** *f.* The state of not inflicting severe injury on others, absence of acrimony (one of the thirtyfive Vāg-guṇas of a Tīrthaṅkara).

अमर्याद *a.* [न. ब.] **1** Exceeding due limits or bounds, transgressing every bound, disrespectful, improper; मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति सर्वदा Pt. 1. 142; तादृशं त्वममर्यादं कर्म कर्तुं चिकीर्षसि Rām. **–2** Boundless, infinite. **–दा** Transgression of due limits or bounds, impropriety of conduct, forwardness, disrespect, violation of due respect.

अमर्ष *a.* Not enduring or bearing. **–र्षः 1** Non-endurance, tolerance, impatience; अमर्षप्रभवो रोषः सफलो मे भविष्यति Rām. 5. 62. 33. अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः Ki. 1. 33; jealousy, jealous anger; किं नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः U. 5. In Rhet. अमर्ष is one of the 33 minor feelings or व्यभिचारिभाव. See S. D.; R. G. thus defines it: परकृतावज्ञादिनानापराधजन्यो मौनवाक्पारुष्यादिकारणभूताश्चित्तवृत्तिविशेषोऽमर्षः. **–2** Anger, passion, wrath; पुत्रवधामर्षोद्दीपितेन गाण्डीविना Ve. 2; हर्षामर्षभयोद्वेगैः Bg. 12. 15. सामर्ष angry, indignant; सामर्षम् angrily. **–3** Impetuosity, violence. **–4** Determination of purpose. **–र्षा** Intolerance; यत्र सङ्गीतसन्नादैर्नदद्‌गुहममर्षया Bhāg. 8. 2. 6. **–Comp.** **–ज** *a.* arising from anger or impatience. **–हासः** an angry laugh, sarcastic sneer.

अमर्षण, –र्षित, –र्षिन्, –र्षवत् *a.* **1** Impatient, intolerant, unforgiving; विशेषात्परिपूर्णस्य याति शत्रोरमर्षणः आभिमुख्यम् Pt. 1. 326. **–2** Angry, indignant, passionate; हृदि क्षतो गोत्रभिदप्यमर्षणः R. 3. 53; अभिमन्युवधामर्षितैः पाण्डुपुत्रैः Ve. 4. **–3** Impetuous, determined.

अमल *a.* [न. ब.] **1** Free from dirt or impurities, pure, undefiled, stainless, spotless; कपालमेवामलशेखरश्रीः । (बभूव) Ku. 7. 32, 33; लोकानमलान् प्रतिपद्यते Bg. 14. 14. अमलाः सुहृदः Pt. 2. 171 pure, sincere. **–2** White, bright, shining; कर्णावसक्तामलदन्तपत्रम् Ku. 7. 23; R. 6. 80. **–ला 1** N. of the goddess Lakṣmī. **–2** The navel cord. **–3** N. of a tree (Mar. आंवळा) Emblica Officinalis Gaertn; also of a plant (सातलावृक्ष) also *n.* in this sense. यथा वै द्वे वामलके Ch. Up. 7. 3. 1. **–लम् 1** Purity. **–2** Talc. **–3** The Supreme Spirit. **–Comp.** **–आत्मन्** *a.* Of pure or undefiled mind. **–गर्भः** N. of a Bodhisattva. **–पतत्रिन्** *m.* (**त्री**) the wild goose; माधुर्यादमलपतत्रिणां कुलानि Śi. 8. 12. **–रत्नम्, –मणिः** a crystal.

अमलयति Den. P. To make pure or spotless, brighten; अमलयतीह वनान्तमिन्दुलेखा Ki. 5. 44.

अमलिन *a.* Clean, spotless, pure (morally also); कुलममलिनं न त्वेवायं जनो न च जीवितम् Māl 2. 2.

अमलानकम् Globe-amaranth. (Mar. मखमाल)

अमवत् See under अम.

अमविष्णु *a.* **1** Going in different directions, up and down. **–2** Immovable; अनातुरा अजराः स्थामविष्णवः Rv. 10. 94. 11.

अमसः [अम्–असच्] **1** Disease. **–2** Stupidity. **–3** A fool. **–4** Time.

अमसृण *a.* Not soft or bland, harsh, violent, strong, intense.

अमस्त *n.* Curds.

अमा ***a.*** [न मा–क] Measureless. *–ind.* Ved. **1** At home, in the house; कामश्चरताममाभूत् Rv. 2. 38. 6. **–2** In this world, here below (इहलोके). **–3** With, near, close to; अमैवासां तद्भवति Bṛi. Up. 1. 5. 20. **–4** Together with, in conjunction or company with, as in अमात्य, अमावास्या q. v.; अमाकृ to draw near, have near oneself. अमा सह समीपे च Nm. *–f.* **1** The day of the new moon, the day of the conjunction of the sun and moon;

अमायां तु सदा सोम ओषधीः प्रतिपद्यते Vyāsa. -2 The sixteenth digit of the moon. -3 The fifteenth digit also. *m.* The soul. -**Comp.** -**अक्त** *a.* Ved. met, come together. -**अन्तः** The end of the day of new moon. -**इष्ट** *a.* Sacrificed at home. -**जुर्** *f.* Living at home during life, growing old at home; अमाजुरश्चिद्भवथो युवं भगो Rv. 10.39. 3; being without husband in the same dwelling with her parents, as a maiden (पितृषद्); अमाजूरिव पित्रोः सचा सती Rv. 2. 17. 7 -**पर्वन्** *n.* The sacred time of अमा, day of new moon. -**हठः** Name of a snake-demon; Mb.

अमांस *a.* 1 Without flesh, not containing flesh. -2 Lean, thin, weak, enfeebled. -**सम्** Not flesh, anything but flesh. -**Comp.** -**ओदनिक** *a.* (-**की** *f.*) Not relating to a preparation of rice with meat.

अमात् *ind.* Ved. 1 From near, at hand. *a.* Not measuring, boundless; प्रमदादमानिव पुरे महीयसि Śi. 13. 2.

अमातृ, -तृक *a.* Motherless; Dk. 2. 5.

अमातृभोगीण *a.* Not fit for the use of a mother.

अमात्यः [अमा सह वसति, अमा-त्यप्, अव्ययात्त्यप् P. IV. 2. 104. Vārt. अमेहक्वतसित्रेभ्य एव] 1 One living with or near another, an inmate of the same house or family (Ved.). -2 A companion or follower of a king, minister; तस्यामात्या गुणैरासन्निक्ष्वाकोः सुमहात्मनः Ram. 1.7.1; अमात्याः सर्व एवैते कार्याः स्युर्न तु मन्त्रिणः Kau. A. 1. 8. -**अमात्यिका** *f.* M. Bh. on P. VII. 3. 1. -**Comp.** -**उत्पात्तिः** *f.* Creation of ministers Kau. A. 1. 8. अमात्यपुत्रैः सवयोभिरन्वितः R. 3. 28.

अमात्र *a.* [नास्ति मात्रा इयत्ता यस्य] 1 Boundless, immeasurable; अमात्रं त्वा धिषणा तित्विषे Rv. 1. 102. 7. -2 Not whole or entire. -3 Not elementary. -4 Having the measure or quantity of the letter अ. -**त्रम्** 1 Non-measure. -2 Not a measure or quantity. -**त्रः** The Supreme Spirit.

अमात्रवत्त्वम् 1 Spirit, spiritual essence. -2 Defect, deficiency.

अमाननम्, -ना Disrespect, insult; disobedience.

अमानव *a.* 1 Not human; animal. -2 Superhuman.

अमानस्यम् Pain (मानसे साधु न भवति).

अमानिन् *a.* Modest, humble.

अमानिता, -त्वम् Modesty, humility. अमानित्वमदाम्भित्वम् Bg. 13. 7.

अमानुष *a.* (-**षी** *f.*) 1 Not human, not belonging to man, supernatural, unearthly, superhuman; आकृतिरेवानुमापयत्यमानुषताम् K. 132, °आकृतिः K. 131, 132, 258; °शक्तित्वम् 103; °गीतध्वनिम् 126 an unearthly melody. -2 Inhuman, monster-like; ill-disposed towards man. -3 Tenantless, desolate; °षं वनम् 135. -**षः, -षी** One not a man, an irrational animal; Ms. 9. 284, स्त्रीणामशिक्षितपटुत्वममानुषीषु संदृश्यते Ś. 5. 22.

अमानुष्य *a.* Not human, superhuman &c. -°**ष्यम्** Inhuman state; अमानुष्यं समापन्नान् दासकर्मण्यवस्थितान् Mb. 5. 160. 113.

अमाम (मा) सी = अमावसी or अमावस्या q. v.

अमाय *a.* 1 Not cunning or sagacious, guileless, sincere, honest. -2 Immeasurable. -**या** 1 Absence of fraud or deceit, honesty, sincerity. -2 (In Vedānta Phil.) Absence of delusion or error, knowledge of the supreme truth. -**यम्** The Supreme Spirit (ब्रह्म).

अमायिक, -मायिन् *a.* Guileless; honest, sincere, true.

अमारः Not dying.

अमार्ग *a.* Pathless, -**र्गः** Not a road, absence of road; a bad road.

अमावसुः N. of a prince (a descendent of Purūravas); Mb. Hariv.

अमावस्या, -वास्या, -वसी, -वासी (also written अमामसी-मासी) [अमावस् -ण्यत्, अमा सह वसतः चन्द्रार्कौ अस्यां सा. अमावस्यदन्यतरस्याम् P. III. 1. 122 Sk.] 1 The day of new moon, when the sun and moon dwell together or are in conjunction; the 15th day of the dark half of every lunar month; सूर्याचन्द्रमसोः यः परः सन्निकर्षः साऽमावस्या Gobhila; अमावास्यायां दीक्षित्वा Ch. Up. 5. 2. 4. -2 A sacrifice offered at that time. -3 The sacrificial oblation.

अमावास्य, -स्यक *a.* [अमावस्या, वुन्-अच् अमावास्याया वा P. IV. 3. 30-31; अमावास्यायां जातः] Born or produced on the night of new moon.

अमित *a.* 1 Unmeasured, boundless, unlimited, infinite, great, immense; मितं ददाति हि पिता मितं भ्राता मितं सुतः। अमितस्य हि दातारं भर्तारं का न पूजयेत् Rām. 2. 37. 30. -2 Neglected, disregarded. -3 Unknown. -4 Unpolished. -**Comp.** -**अक्षर** *a.* not having a fixed number of syllables; prosaic. -**अशनः** Powerful devourer, epithet of परमेश्वर; of Viṣṇu. -**आभ** *a.* Of great lustre, of unbounded splendour. (-**भः**) a class of divinities mentioned in V. P. -**आयुः** N. of a Dhyānibuddha. -**ओजस्** *a.* of unbounded energy, all-powerful, Almighty; स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः Ms. 1. 4. -**क्रतु** *a.* of unbounded wisdom or energy. -**गतिः** N. of a Vidyādhara, Ks. N. of a Jaina author. -**तेजस्, -द्युति** *a.* of unbounded lustre or glory. -**ध्वजः** N. of a son of Dharmadhvaja; V. P. -**रुचिः** N. of a deity (Buddhistic). -**विक्रमः** 1 of unbounded valour; अनन्तवीर्यामितविक्रमस्त्वम् Bg. 11. 40. -2 a name of Viṣṇu. -**वीर्य** *a.* of immense strength.

अमित्रः [न मित्रम्; by Uṇ. 4. 173 fr. अम् to go against; अमेर्द्विषति चित्; अमित्रः शत्रुः] Not a friend, an enemy, adversary, a foe, rival, opponent; स्याताममित्रौ मित्रे च सहजप्राकृतावपि Śi. 2. 36; तस्य मित्राण्यमित्रास्ते 101; Dk. 109, 171; M. 1; प्रकृत्यमित्रा हि सतामसाधवः Ki. 14. 21; Ms. 7. 83; 12. 79; 2. 239. **-त्रा** An enemy; °युध् Ved. subduing one's enemies. **-Comp. -खाद्** *a.* Devouring one's enemies, epithet of Indra. **-घात, -घातिन्, -घ्न, -हन्** Killing enemies. **-जित्** *a.* Conquering one's enemies; अमित्रजिन्मित्रजिदोजसा यत् N. 1. 13; N. of a son of Suvarṇa. **-दम्भन** *a.* Ved. hurting one's enemies. बृहस्पते भीमममित्रदम्भनम् Rv. 2. 23. 3. **-स (सा) ह** *a.* enduring or overpowering one's enemies, epithet of Indra; शास इत्था महाँ अस्यमित्रसाहो अस्तृतः Av. 1. 20. 4. **-सेना** a hostile army; अमित्रसेनामभिजञ्जभानो Av. 5. 20. 6.

अमित्रकम् An unfriendly act; राजानमिममासाद्य सुहृच्चिह्नममित्रकम् Rām. 6. 65. 7.

अमित्रता, -त्वम् Enmity; Pt. 2. 98; तदास्य मित्राण्यपि यान्त्यमित्रताम् Mk. 1. 53.

अमित्रयति Den. P., **अमित्रायते** A. To act like an enemy, act hostilely towards, hate; हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते Bh. 3. 111.

अमित्रिन् *a.* Hostile, inimical; मा कस्मै धातमभ्यमित्रिणे Rv. 1. 120. 8.

अमित्रीय, -त्र्य *a.* Hostile, inimical; विश्वा वृत्रममित्रिया शवोभिः Rv. 6. 17. 1.

अमिथित *a.* Ved. Not reviled, not provoked; को नु मर्या अमिथितः सखा सखायमब्रवीत् Rv. 8. 45. 37.

अमिथ्या *adv.* Not falsely, truly; तामूचेतुस्त प्रियमप्यमिथ्या R. 14. 6.

अमिन् *a.* Sick, diseased.

अमिन *a.* Ved. Inviolable (अहिंस्य); immense (?).

अमिनत् *a.* Ved. **1** Not hurting; unhurt. **-2** Unalterable; यजत्रैरमिनती तस्थतुरुक्षमाणे Rv. 4. 56. 2.

अमिलातकम् Globe-amaranth. See अमलानकम्.

अमिश्र, -श्रित *a.* Unmixed, unblended; not shared by others.

अमिष *a.* [न. ब.] Free from guile or deceit. **-षम्** [अम् भोगे-कर्मणि इषन्] **1** An object of worldly enjoyment, luxury. **-2** Honesty, absence of fraud or deceit. **-3** Flesh.

अमीत *a.* Unhurt; °वर्णाः of unhurt or unextinguishable or unaltered colour; समना समानीरमीतवर्णा उषसश्चरन्ति Rv. 4. 51. 9.

अमीवा [अम्-वन्-ईडागमः निपातः] Ved. **1** Affliction, sickness, disease. **-2** Distress, terror. **-3** A demon, tormenting spirit. **-वः** An enemy, one who afflicts or torments; **-वम् 1** Affliction, distress, pain, injury, कच्चिद् बुधः स्वस्त्यनमीव आस्ते Bhāg. 3. 1. 32. कुठारैश्चिच्छिदुः क्रुद्धाः स्मरन्तोऽमीवमस्य तत् Bhāg. 4. 28. 26.

अमुक *pron. a.* [अदस्-टेरकच् उत्वमत्वे Tv.] A certain person or thing, so and so (to be used when a person or thing is referred to without a name); मतं मेऽमुकपुत्रस्य यदत्रोपरिलेखितम् Y. 2. 86–87; उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना । लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् 88.

अर्वन् *a*. [ऋ–वनिप्] **1** Going, moving, running. **–2** Mean, unworthy, censurable (गर्ह्य Uṇ. 4. 112; कुत्सित 5. 54). *m*. (अर्वा, अर्वन्तौ, अर्वन्तः &c.) **1** A horse; चित्रध्वजपताकाग्रैरभेन्द्रस्यन्दनार्वभिः Bhāg. 10. 75. 11; अर्वासुरान् Bṛi. Up. 1. 1. 2. श्लथीकृतप्रग्रहमर्वतां व्रजाः Śi. 12. 31. **–2** An epithet of a horse or its driver. **–3** One of the ten horses of the moon. **–4** Indra. **–5** A short span (गोकर्णपरिमाण). **–ती** **1** A mare. **–2** A bawd, procuress. **–3** A nymph. **–Comp.** **–वसुः** one of the principal seven rays of the Sun. **–वाहः** A horseman; आगच्छन् गुरुतरगर्वमर्ववाहैः Śiva. B. 24. 64. and 25. 9.

अर्वश *a*. Possessed of coursers, quick. इन्द्रो देवेभिर्वशेभिरर्वशः Rv. 10. 22. 6.

अर्वाच् *a*. [अवरे काले देशे वा अञ्चति पृषो° अर्वादेशः] **1** Coming hitherward (opp. पराञ्च). **–2** Turned towards, coming to meet anyone. **–3** Being on this side (as the bank of a river); (opp. पर). **–4** Being below or behind (in time or place). **–5** Following, subsequent.

-क् *ind.* 1 Hitherward, on this side. -2 From a certain point. -3 Before (in time or place); यत्सृष्टेरर्वाक् सलिलमयं ब्रह्माण्डमभूत् K. 125; अर्वाक् संवत्सरात्स्वामी हरेत परतो नृपः Y. 2. 173, 113; 1. 254; Ms. 8. 30; 5. 59. -4 On the lower side, behind, downwards (opp. ऊर्ध्वम्. -5 Afterwards, subsequently. -6 (With loc.) Within, near; एते चार्वागुपवनभुवि छिन्नदर्भाङ्कुरायाम् Ś. 1. 15. **-Comp.** **-कालः** posterior time. **-कालिक** *a.* belonging to proximate time, modern; °ता modernness, posterity of time; तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च Ms. 12. 96. **-कूलम्** the near bank of a river. **-तन** *a.* Being on this side of, not reaching up to, posterior; प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् Bhāg. 5. 3. 4. **-बिल** *a.* Ved. having the hole or mouth hitherward; अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः Bṛi. Up. 2. 2. 3. **-वसु** *a.* offering riches. Vāj. 15. 19. (**-सुः**) 1 rain. -2 a cloud. **-सामन्** *n.* Ved. epithet of three days during which the Soma sacrifice is performed. **-स्रोतस्** *m.* N. of a creation of beings in which the current of nutriment tends downwards, or where the men are addicted to sensual enjoyments.

अर्वाके *ind.* In the proximity of, near. अर्वाके अस्ति भेषजम् Rv. 8. 9. 15.

अर्वाचीन *a.* [अर्वाच्-ख] 1 Turned towards; favouring; turned towards unfavourbly; अर्वाचीनासो वनुषे युयुज्रे Rv. 6. 25. 3. -2 Being on this side, below. -3 Born afterwards, posterior. -4 Modern, recent. -5 Reverse, contrary; °ता state of being posterior or recent; state of being contrary. **-नम्** *ind.* (With abl.) 1 On this side of. -2 Thenceforward. -3 Less than. -4 Later than; यदूर्ध्वं पृथिव्या अर्वाचीनमन्तरीक्षात् Śat. Br.

अर्वावत् *a.* [अवरकालोऽस्त्यस्य मतुप् पृषो॰] Later, modern. *-f.* Proximity.

अर्वावसु N. of the Hotṛi of the Gods (देवानां होता).

अर्वुक [अर्व्-हिंसने बाहु॰ उकञ्] N. of a tribe or people in the south mentioned in the Mahābhārata and conquered by Sahadeva; N. of kings living in the southern forest.

अर्श *a.* Bringing misfortune, sinful; indecent. **-र्शः** 1 Damage, hurt. -2 = अर्शस् q. v.

अर्शस् *n.* [ऋ-असुन् व्याधौ शुट् च Uṇ. 4. 195] Piles; नाशयित्री बलासस्यार्शसऽउपचितामासि Vāj. 12. 97. **-Comp.** **-घ्न** *a.* destroying piles. (**-घ्नः**) 1 N. of the plant शुरण (Mar. सुरण), so called because it is said to cure piles. -2 one part of buttermilk with three parts of water. (**-घ्नी**) 1 N. of the plant Curculigo Archioides Lin. (Mar. देवडंगरी). -2 the marking nut plant (भल्लातक). **-युज्** *a.* afflicted with piles. **-हित** *a.* curing piles. (**-तः**) the marking nut plant; (Mar. बिब्बा).

अर्शस *a.* [अर्शस्-मस्त्वर्थे-अच् by अर्श आदिभ्योऽच् P. V. 2. 127.] Afflicted with piles; Ms. 3. 7.

अर्शिन् *a.* [अर्शमस्त्यस्य इनि] Afflicted with piles.

अर्शसान *a.* [ऋश्-असानुच् सुट् च] Striving to hurt, malicious. **-नः** 1 Fire. -2 N. of a demon.

अर्षण *a.* [ऋष् गतौ ल्युट्] Flowing, movable. **-णम्** Going, moving. **-णी** 1 Means of moving, conveyance. -2 A piercing or pricking pain; मूर्धानं प्रत्यर्षणीः Av. 9.8.13.

अर्ह् 1 P. [अर्हति, अर्हितुम्, आनर्ह, अर्हित] (epic A. as रावणो नार्हते पूजाम् Rām.) 1 To deserve, merit, be worthy of (with acc. or inf.); किमिव नायुष्मानमरेश्वरान्नार्हति Ś. 7; so दण्डम्, प्रायश्चित्तम्, वधम् &c. -2 To have a right to, be entitled to, be allowed to do anything (with acc.); ननु गर्भः पित्र्यं रिक्थमर्हति Ś. 6; न स्त्री स्वातन्त्र्यमर्हति Ms. 9. 3; also with inf. न स तल्लब्धुमर्हति Ms. 8. 147; 11. 7, 18. -3 To be obliged or required to do a thing, oft. implying duty or obligation; नान्यत्स्त्री दातुमर्हति Y. 2. 49; इमां प्रसादयितुमर्हसि R. 1. 88. -4 To be fit or deserve to be done; अर्थना मयि भवद्भिः कर्तुमर्हति N. 5. 112; Dk. 137. -5 To be equal to, be worth, न ते गात्राण्युपचारमर्हन्ति Ś. 3. 17 are not equal to; सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् Ms. 2. 86; 3. 131. -6 To be able, translatable by, 'can'; न मे वचनमन्यथा भावितुमर्हति Ś. 4; विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति Bg. 2. 17; अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति H. Pr. 30 cannot get. -7 To worship, honour; see *caus.* below. -8 (Used with inf. in the second pers. and sometimes in the third) अर्ह् represents a mild form of command, advice or courteous request, and may be translated by 'pray', 'deign', 'be pleased to', will be pleased to'; द्वित्राण्यहान्यर्हसि सोढुमर्हन् R. 5. 25 pray wait &c. नार्हसि मे प्रणयं विहन्तुम् 2. 58; तं सन्तः श्रोतुमर्हन्ति 1. 10 will be pleased or be good enough to listen to it; Ku. 6. 32; Ms. 1. 2; Bg. 10. 16, 2. 17; R. 1. 72; 1. 88; 3. 46. *-Caus.* or 10 P. To honour, worship. राजार्जिहत्तं मधुपर्कपाणिः Bk. 1. 17; Ms. 3. 3. 119.

अर्ह *a.* 1 Respectable, worthy of respect, deserving; अर्हाविभोजयन् विप्रो दण्डमर्हति माषकम् Ms. 8. 392. -2 Worthy of, having a claim to, entitled to, with acc., inf., or in comp; नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः Ms. 9. 144; संस्कारमर्हस्त्वं न च लप्स्यसे Rām.; तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान् Bg. 1. 37. प्रदक्षिणक्रियार्हायाम् R. 1. 76; so मान°, वध°, दण्ड° &c. -3 Being required, obliged, or allowed (with inf.). -4 Becoming, proper, fit; केवलं यानमर्हं स्यात् Pt. 3; with gen. also; स भृत्योऽर्हो महीभुजाम् Pt. 1. 87-92; or in comp.; तदर्हेण प्रायश्चित्तेन 1. 275; so नृप°, यज्ञ° Ak. -5 Worth (in money), costing; see below. -6 Capable, powerful; न त्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसा Rām. 5. 22. 20. **-र्हः** [अर्ह्-घञ्] 1 N. of Indra. -2 N. of Viṣṇu. -3 Price (as in महार्ह); महार्हशय्यापरिवर्तनच्युतैः Ku. 5. 12; (महानर्हो यस्याः Malli.). रत्नैर्महार्हैस्तुतुषुर्न देवाः Subhāṣ. -4 Fitness, propriety. -5 Motion, course (गति).

–र्हा Worship, adoration; Ki. 2. 58; प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः R. 1. 76. **–6** Gold; Nighaṇṭa.

अर्हणम्, –णा [अर्ह्-भावे-ल्युट्] **1** Worship, adoration, honour, treating with respect or veneration; अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे R. 1. 55; Śi. 15. 22; 14. 58; R. 11. 23; Ms. 3. 54. **–2** A present of honour, requisites for worship; तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः Bhāg. 9. 11. 29. **–3** A precious jewel; मलिनं यथार्हणमसंस्कृतम् Bhāg. 3. 21. 47.

अर्हणा *ind.* Ved. According to what is due; according to one's means; केतुरर्हणा Rv. 1. 127; नृचक्षसो अनिमिषन्तो अर्हणाः Rv. 10. 63. 4.

अर्हणीय *pot. p.* Fit to be worshipped, adored.

अर्हत् *a.* [अर्ह-शतृ] **1** Worthy, deserving, deserving respect, respectable, adorable; त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः Ś. 5. 15; R. 5. 25; 1. 55; Ku. 6. 56; Ms. 3. 128. **–2** Praised, celebrated (स्तुत, ख्यात). **–3** Worthy of, deserving, entitled to (mostly Ved.). *m.* **1** A Buddha; the highest rank in Buddhist hierarchy. **–2** A superior divinity with the Jainas; सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः। यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥; see the word जैन also. **–त्तम** *a.* most worthy or venerable; अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् Ms. 3. 128.

अर्हन्त *a.* (अर्ह्-बा० झ) Worthy, deserving. **–न्तः 1** A Buddha. **–2** A Buddhist mendicant. **–3** N. of Śiva.

अर्हन्तिका N. of a Buddhist nun. Dk.

अर्हन्ती The quality of being fit to be worshipped, veneration, adoration; श्रौत्रार्हन्तीचणैर्गुण्यैः Sk.

अर्ह्य *pot. p.* [अर्ह्-ण्यत्] **1** Worthy, respectable. **–2** Fit to be praised. **–3** Right, fit, proper. **–4** Fit to be obtained.

अर्हरिष्वाणि *a.* Ved. Making enemies cry aloud; exultant. न इयर्ति रेणुं बृहदर्हरिष्वणिः Rv. 1. 56. 4.

अल् 1 U. (अलति-ते अलितुम्, अलित) **1** To adorn. **–2** To be competent or able. **–3** To prevent, ward off; see अलम्.

अलकः [अल-क्वुन्, अलति भूषयति मुखम्] **1** A curl lock of hair, hair in general; ललाटिकाचन्दनधूसरालका Ku. 5. 55; अस्पृष्टालकवेष्टनौ R. 1, 42; 4. 54; अलकभङ्गतां गतः K. 4; अलके बालकुन्दानुविद्धम् Me. 67 (the word is *n.* also, as appears from a quotation of Malli.: स्वभाववक्राण्यलकानि तासाम्). **–2** Curls on the fore-head; ...अलकः पुरोलम्बनकुन्तले Nm. **–3** Saffron besmeared on the body. **–4** mad dog (for अलर्क). **–का** A girl from eight to ten years of age. **–2** N. of the capital of Kubera (situated on a peak of the Himālaya above the peak of Meru, inhabited also by Śiva), and of the lord of the Yakṣas; अलकामतिवाह्यैव Ku. 6. 37; विभाति यस्यां ललितालकायां मनोहरा वैश्रवणस्य लक्ष्मीः Bv. 2. 10; गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम् Me. 7. **–Comp. –अधिपः, –पतिः, –ईश्वरः** 'lord of Alakā', N. of Kubera; अत्यजीवदमरालकेश्वरौ R. 19. 15. **–अन्तः** the end of a curl or ringlet; Śi. 4. 9; उद्गृहीतालकान्ताः प्रेक्षिष्यन्ते पथिकवनिताः Me. 8. **–आह्वयः** Bergera Kaenigii (Mar. कढीनिंब). **–नन्दा 1** N. of the Gaṅgā, or a river falling into it. ईक्षयालकनन्दाया विधूताशेषकल्मषः Bhāg. 11. 29. 42. **–2** a girl from eight to ten years of age. **–प्रभा** N. of the capital of Kubera. **–प्रियः** N. of a tree (पीतसाल; Mar. आसणा). **–संहतिः** *f.* rows of curls; विलुलितालकसंहतिरामृशन्मृगदृशां श्रमवारि ललाटजम् Śi. 6. 3.

अलकम् *ind.* In vain, for nothing; Rv. 10. 71. 6.

अलक्तः, –क्तकः [न रक्तोऽस्मात्, रस्य लत्वम्, स्वार्थे कन् Tv.] The red resin of certain trees, red lac or sap (formerly used by women to dye certain parts of their body, particularly the soles of the feet and lip) (Mar. अळिता); (दन्तवाससा) चिरोज्झितालक्तकपाटलेन Ku. 5. 34, 68; 7. 58; बिम्बाधरालक्तकः M. 3. 5; अलक्तकाङ्कां पदवीं ततान R. 7. 7; स्त्रियो हृतार्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्त्यजन्ति Mk. 4. 15. **–Comp. –रसः** red lac, juice; अलक्तरसरक्ताभावलक्तरसवार्जितौ। अद्यापि चरणौ तस्याः पद्मकोशसमप्रभौ Rām. 2. 60. 18. **–रागः** the red colour of *alakta*.

अलक्षण *a.* **1** Having no signs or marks. **–2** Having no characteristic or distinguishing marks, undefined, undistinguished; आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् Ms. 1. 5. **–3** Having no good marks, inauspicious, unfortunate, ill-omened; क्लेशावहा भर्तुरलक्षणाहम् R. 14. 5. **–4** Incomprehensible; सैषा विष्णोर्महामायाऽबाधयाऽलक्षणा यया Bhāg. 12. 6. 29. **–णम् 1** A bad or inauspicious sign; आचारो हन्त्यलक्षणम् Ms. 4. 156. **–2** That which is no definition, a bad definition.

अलक्षित *a.* **1** Unseen, unperceived, unobserved; अलक्षितोपस्थित H. 1; अलक्षिताभ्युत्पतनो नृपेण R. 2. 27. **–2** Uncharacterized; not marked. **–Comp. –अन्तक** *a.* suddenly dead. **–उपस्थित** *a.* one who has approached unobserved.

अलक्ष्य *a.* **1** Invisible, unknown, unobserved. **–2** Unmarked. **–3** Having no particular marks. **–4** Insignificant in appearance. **–5** Having no pretence, free from fraud. **–6** Not लक्ष्य or secondary (as meaning). **–Comp. –गति** *a.* moving invisibly. **–जन्मता** unknown birth, obscure origin; वपुर्विरूपाक्षमलक्ष्यजन्मता Ku. 5. 72. **–लिङ्ग** *a.* disguised, *incognito*. **–वाच्** *a.* addressing words to no visible object; नीलकण्ठ व्रजसीत्यलक्ष्यवाच् Ku. 5. 57.

अलक्ष्मन् *a.* With inauspicious signs; अपसव्यं ग्रहाश्चक्रुरलक्ष्माणं दिवाकरम् Mb. 6. 102. 12.

अलक्ष्मीः *f.* **1** Evil fortune, bad luck, distress, poverty; कामान् दुग्धे विप्रकर्षत्यलक्ष्मीम् U. 5. 30. **–2** The goddess of misfortune.

अलगर्दः [Ety. ?] A water-serpent, the black variety of the Cobra de Capello (also written अलगर्थ). **–र्दा** A large poisonous leech.

अलग्न *a.* 1 Not joined or connected. –2 Not devoted to; हरेरङ्घ्रियुग्मे मनश्चेदलग्नम् Udb.

अलग्ल *a.* 1 Speaking unconnectedly. –2 Stammering.

अलघु (**घु–घ्वी** *f.*) 1 Not light, heavy, big, weighty (as breasts, hips &c.); आयासादलघुतरस्तनैः Śi. 8. 1; 7. 5. –2 Not short, long (in prosody). –3 Serious, solemn. –4 Intense, violent, very great. **–Comp.** **–उपलः** a rock. **–ऊष्मन्** *m.* intense heat. **–प्रतिज्ञ** *a.* solemnly pledged or promised.

अलाघवम् Absence of meanness or niggardliness; R. 9. 16.

अलङ्घनम् Not surmounting, not transgressing, not passing over or beyond.

अलङ्घनीय *a.* Insurmountable, impassable, inaccessible, beyond the reach of; त्रिदशपरिपक्षस्यालङ्घनीये कृते स्वः V. 2 proof against injury; V. 4, Ki. 14. 37.

अलङ्घनीयता 1 Impassableness, insurmountableness, inaccessibility; अलङ्घनीयताहेतुरुभयं तन्मनस्विनि Śi. 2. 48. –2 Inviolability; respectability. –3 Authoritative or absolute rule, superiority.

अलङ्घ्य *a.* 1 Not to be transgressed, overcome &c.; या देवसेनेव परैरलङ्घ्या Śi. 3. 64. –2 Beyond the reach of, impossible to be done; किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् Ki. 13. 7. –3 Difficult to secure or attain. unattainable; न हि जयिनां तपसामलङ्घ्यमस्ति Ki. 10. 6. 13; Śi. 8. 57; °ता state of being proof against an attack or injury; न जहाति महौजस्कं मानप्रांशुमलङ्घ्यता Ki. 11. 63.

अलजः A kind of bird; Vāj. 24. 34.

अलजी Inflammation of the eye; a sort of disease of the joints; Av. 9. 8. 20.

अलज्ज *a.* Shameless. **–ज्जा** 1 Boldness. –2 Impudence.

अलञ्जरः, –ञ्जुरः [अलं सामर्थ्यं जृणाति, जॄ–अच्, पृषो॰ उत् Tv.] An earthen jar.

अलतिः [अल्–बा॰ अतिच्] Commencement of the notes of a song.

अलब्ध *a.* Unobtained, **–Comp.** **–अभीप्सित** *a* disappointed in one's desired object. **–नाथ** *a.* friendless, without a patron.

अलभ्य *a.* Unobtainable, unattainable; अलभ्यशोकाभिभवेयमाकृतिः Ku. 5. 43.

अलम् [अल्–अच्] 1 The sting in the tail of a scorpion. –2 Yellow orpiment; cf. आल.

अलम् *ind.* [अल्–बाहु॰ अम्] 1 (*a*) Enough, sufficient for, adequate to (with dative or inf.); तस्यालमेषा क्षुधितस्य तृप्त्यै R. 2. 39; Ku. 6. 82; अन्यथा प्रातराशाय कुर्याम त्वामलं वयम् Bk. 8. 98; Śi. 2. 40, 106, 110; K. 133; Bh. 3. 22; Ms. 11. 76; R. 2. 39, 9. 32; 15. 64; Me. 6, 90. (*b*) A match for, equal to (with dat.); दैत्येभ्यो हरिरलम् Sk.; अलं मल्लो मल्लाय Mbh. –2 Able, competent (with inf.); अलं भोक्तुम् Sk.; वरेण शमितं लोकानलं दग्धुं हि तत्तपः Ku. 2. 56; V. 3. 10; with loc. also: त्रयाणामपि लोकानामलमस्मि निवारणे Rām. –3 Away with, enough of, no need of, no use of (having a prohibitive force), with instr. or gerund; अलमन्यथा गृहीत्वा M. 1. 20; अलमलं बहु विकत्थ्य M. 1; आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् Śi. 2. 40; अलं महीपाल तव श्रमेण R. 2. 34; Ku. 5. 82; अलमियद्भिः कुसुमैः Ś. 4. so many flowers will do; Śi. 10. 75; sometimes used, though less correctly, with the inf. in the same sense; अलमात्मानं खेदयितुम् Ve. 2. 3; अलं सुप्तजनं प्रबोधयितुम् Mk. 3. –4 (*a*) Completely, thoroughly; अर्हस्येनं शमयितुमलं वारिधारासहस्रैः Me. 55; त्वमपि विततयज्ञः स्वर्गिणः प्रीणयाऽलम् Ś. 7. 34; R. 10. 80; K. 169; Śi. 3. 58; 4. 39. (*b*) Greatly, excessively, to a high degree; तुदन्ति अलम् K. 2; यो गच्छत्यलं विद्विषतः प्रति Ak.; Mv. 6. 40; इत्यलमन्वशान् मुनिर्माम् Ki. 13. 13. again and again, pressingly. –5 In vain. –6 Surely, verily. –7 In the sense of अस्ति and भूषण also. अलं भूषणपर्याप्तिशक्तिवारणवाचके Nm. **–Comp.** **–कर्मीण** *a.* [अलं समर्थः कर्मणि ख] competent to do any act; skilful, clever. **–कामता** The state of complete satiation; समिद्ध-शरणाऽऽदीप्ता देहेऽलंकामतेश्वरा Bk. 10.–7. **–कुमारि** *a.* [अलं कुमार्यै] sufficient to support a maiden (धनम्); P. I. 2. 44. **–कृ, –कार** &c. see separately below. **–गामिन्** *a.* [अलं पर्याप्तं गच्छति, णिनि] going after, following in due or proper manner; अनुग्वलंगामी P. V. 2. 15. **–जीविक** *a.* [अलं जीविकायै चतु.] sufficient for livelihood. **–जुष्** *a.* अलं जुष्यते कर्मणि बाहु° क] sufficient, adequate to eating. **–तम** *a.* able, sufficient, having power. **–तराम्** *ind.* 1 Exceedingly; मुहुर्गलद्भिस्तरलैरलंतरामरोदि Ku. 15. 28. –2 Very much better or easier; इष्टं कर्तुमलंतराम् Śi. 2. 106. **–धन** *a.* [अलं प्रभूतं धनमस्त्यस्य अच्] possessing sufficient wealth, rich; निरादिष्टधनश्चेत्तु प्रतिभूः स्यादलंधनः Ms. 8. 162. **–धूम** *a.* [अलमत्यर्थो धूमः] thick smoke, volume of smoke. **–पशुः** [अलं यज्ञे निरर्थः पशुः] a bad or useless animal (for sacrifice). (*–a.*) able to keep cattle. **–पुरुषीण** *a.* [अलं समर्थं पुरुषाय; स्वार्थे ख] 1 fit for a man, becoming a man. –2 sufficient for a man. (**–णः**) a man who is chief of the opposite warriors in a battle. **–बल** *a.* 1 strong enough, having sufficient power. –2 an epithet of Śiva. **–बुद्धिः** 1 sufficient sense. –2 false notion (मिथ्याबुद्धि). **–भूष्णु** *a.* [अलं सामर्थ्ये भू–ग्स्नु] able, competent; विनाप्यस्मदलंभूष्णुरिज्यायै तपसः सुतः Śi. 2. 9.

अलंकृ 8 U. 1 To prepare, make ready [Ved.]. –2 To ornament, decorate, grace; तत्र च शयनीयमलंचकार

K. 207; कतमो वंशोऽलंकृतः S'. 1. **-3** To prevent from, impede (with gen.).

अलंकरणम् **1** Decoration, ornamenting; तस्मिन्हरिः स्पृहां चक्रे वक्षोऽलङ्करणे मणौ Bhāg. 8. 8. 5. **-2** An ornament (lit. and fig.); सृजति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः Bh. 2. 92. **-3** Preparation.

अलंकरिष्णु *a.* Fond of ornaments. **-2** Decorating, skilled in decorating. **-3** Ornamented. **-ष्णुः** An epithet of S'iva.

अलंकर्तृ *a.* A decorator, skilled in decoration.

अलंकारः **1** Decoration, act of decorating or ornamenting. **-2** An ornament (fig. also); अलंकारः स्वर्गस्य V. 1; अनुत्सेकः खलु विक्रमालंकारः *ibid.* **-3** A figure of speech of which there are three kinds: -शब्द°, अर्थ°, and शब्दार्थ°; शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत्॥ S. D. 631; उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातु चित्। हारादिवदलंकारास्तेनुप्रासोपमादयः॥ K. P. 8. cf. also काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते। अलंकरिष्णवस्ते च शब्दमर्थमुभौ त्रिधा॥. **-4** The whole seience of Rhetoric. अलंकारः शास्त्रभेदे मण्डने...। Nm. **-Comp** **-चन्द्रिका** a commentory on Kuvalayānanda. **-मण्डपः** The dressing room of idols. **-शास्त्रम्** the science and art of rhetoric, poetics. **-सुवर्णम्** gold used for ornaments. **-सूरः** N. of a kind of meditation in Buddhism. **-हीन** *a.* unadorned.

अलंकारकः Ornament, decoration; एवं प्रयत्नं कुर्वीत... सर्वालंकारकेषु च Ms. 7. 220.

अलंकृतिः *f.* **1** Decoration. **-2** An ornament; कर्णालंकृति Amaru. 13. **-3** A rhetorical ornament, a figure of speech; तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि K. P. 1; यो विद्वान् मन्यते काव्यं शब्दार्थावनलंकृती। असौ न मन्यते कस्मादनुष्णमनलं कृती॥; Chandr. 1; सालंकृतिः श्रवणकोमलवर्णराजिः Bv. 3. 6 (where अ° has senses 2 and 3.).

अलंक्रिया Adorning, ornamenting, decoration (fig. also); प्रशमस्तस्य भवत्यलंक्रिया Ki. 2. 32.

अलमकः A frog (see अनिमकः).

अलम्पट *a.* Not libidinous, chaste. **-टः** Women's apartments.

अलम्बुषः **1** Vomiting. **-2** The palm of the hand with the fingers extended. **-3** Prahasta, the minister of Rāvaṇa. **-4** A demon killed by Ghaṭotkacha. **-5** A gourd (Mar. भोपळा); रिपुं निहत्याभिननन्द वै तदा ह्यलम्बुषं पक्वमलम्बुषं यथा Mb. 7. 109. 36. **-षा** **1** N. of a nymph or of a class of nymphs. **-2** A kind of plant (लज्जालु; Mar. लाजाळू). **-3** A barrier, a line of water drawn to prevent entrance (अन्याप्रवेशार्थं दत्ता जलरेखा).

अलम्बुसा N. of a country.

अलय *a.* [नास्ति लयः अवस्थानं यस्य] **1** Houseless, vagrant, moving about; S'i. 4. 57. **-2** Without destruction or loss, imperishable. **-यः** **1** Non-destruction, permanence. **-2** Birth, production.

अलर्कः **1** A mad dog or one rendered furious. **-2** A fabulous animal like a hog with eight legs. अष्टपादं तीक्ष्णदंष्ट्रं सूचीभिरिव संवृतम्। रोमभिः सन्निरुद्धाङ्गमलर्कं नाम नामतः Mb. 12. 3. 13. **-3** A kind of worm. **-4** N. of a plant (श्वेतार्क; Mar. पांढरी रुई).

अलपस् *n.* Merit. (अरपस्?)

अलले *ind.* A word of no import, occurring in the dialect of the Pis'āchas (mostly used in dramas).

अलवण *a.* Saltless, not salty; (P. V. 1. 121.). संस्कृतासंस्कृताः पक्वा लवणालवणास्तथा। प्रजायन्ते यथा भावास्तथा चित्तं निरुध्यते॥ Mb. 13. 114. 14.

अलवालम् A basin for water at the root of a tree; see आलवाल.

अलस् *a.* Not shining.

अलस *a.* [न लसति व्याप्रियते, लस्-अच्] **1** Inactive, without energy, lazy, idle, indolent. शठो नैष्कृतिकोऽलसः Bg. 18. 28. **-2** Tired, fatigued, languid; मार्गश्रमादलसशरीरे दारिके M. 5; Amaru. 4, 88; खेदालसेव K. 143, 197, 211, 62, 98; S'i. 8. 7; V. 3. 2; Dk. 20. S'i. 13. 48; 9. 39; U. 1. 24; Ki. 10. 60, V. 5; गमनमलसम् Māl. 1. 17. **-3** Soft, gentle. **-4** Slow, dull (as in gait or motion); श्रोणीभारादलसगमना Me. 84; तस्याः परिस्फुरितगर्भभरालसायाः U. 3. 28. **-सः** **1** A sore or ulcer between the toes. (Mar. चिखली). **-2** A kind of tree. **-3** N. of a sage. **-4** N. of a small poisonous animal. **-सा** N. of a plant (हंसपदा). **-Comp.** **-ईक्षणा** a woman with languishing looks.

अलसक *a.* Indolent, idle. **-कः** Flatulence, intumescence of the abdomen, with constipation and wind; प्रयाति नोर्ध्वं नाधस्तादाहारो न च पच्यते। आमाशयोऽलसीभूतस्तेन सोऽलसकः स्मृतः॥

अलस्य *a.* Idle, lazy.

अलसिका Feeling of exhaustion due to Cholera.

अलसेलुका N. of a plant (Mar. तांबडी लाजाळू).

अलाञ्छन *a.* Spotless.

अलाण्डुः N. of a small noxious insect or other animal; Av. 2. 31. 2. 3. (v. l. अलगण्डु) Satawalekar ed.

अलातः,-तम् [ला-क्त, न. त.] A firebrand, half-burnt wood; निर्वाणालातलाघवम् Ku. 2. 23. coal; °सदृशेक्षणा Rām.; °चक्रप्रतिमम् V. 5. 2. **-Comp.** **-शान्तिः** *f.* N. of the fourth chapter of Gauḍapāda's Commentary on the Māṇḍūkyopaniṣad.

अलातृण *a.* Ved. **1** Disposed to afflict or injure very much. **-2** Not granting anything; miserly; अलातृणासो विदथेषु सुष्टुताः Rv. 1. 166. 7. **-णः** A cloud.

अलाबुः,–बूः *f.* [न–लम्बते; न-लम्ब्-उ-णित् नलोपश्च वृद्धिः Tv] The bottle-gourd. **–बु** (*n.*) **1** A vessel made of gourd. **–2** A fruit of the gourd which is very light and floats in water; किं हि नामैतत् अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्त इति Mv. 1; Ms. 6. 54. **–Comp. –कटम्** the dust or down (रजः) of the bottle-gourd. **–पात्रम्** a jar made of the bottle-gourd; Av. 8. 10. 29. **–वीणा** A lute of the shape of a gourd.

अलाबुमय *a.* Made of a bottle; यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च Y. 3. 60.

अलाभ *a.* [न. ब.] Without gain or profit. **–भः** Non-acquirement; मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः Ms. 2. 43; 2. 184; 6. 57; **–2** Loss; Ms. 9. 331, 11, 80; सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ Bg. 2. 38.

अलाय्य Ved. **1** Going forward (to meet). **–2** An assailing enemy, an assailant. **–3** Epithet or Indra; अलाय्यस्य परशुर्ननाश Rv. 9. 67. 30.

अलारम् A door.

अलासः Inflammation and abscess at the root of the tongue. Suśr.

अलास्य *a.* Devoid of dancing, idle, unengaged; मृदङ्गशब्दापगमादलास्याः R. 16. 14.

अलिः [अल्–इन् Uṇ. 4. 138] **1** A black bee. **–2** A scorpion. **–3** A crow. **–4** The (Indian) cuckoo. **–5** The sign of the zodiac called वृश्चिक. **–6** Spirituous liquor. cf.......अलिः पङ्क्तौ च वृश्चिके। भृङ्गे वयस्यां भूमौ स्यात्...। Nm. **–Comp. –कुलम्** a flight or number of bees; °सङ्कुल full of a swarm of bees; अलिकुलसङ्कुलकुसुमनिराकुलनवदलमालतमाले Gīt. 1; °सङ्कुलः the *kubja* plant. **–जिह्वा, –ह्विका** [अलिरिव क्षुद्रा जिह्वा] the uvula, soft palate. **–दूर्वा** N. of a plant (मालादूर्वा). **–पत्रिका, –पर्णी** N. of a tree (वृश्चिकपत्राख्यवृक्षः; Mar. खाजकुयली). **–प्रिय** *a.* pleasing to the bees. (**–यः**) the red lotus. (**–या**) the trumpet flower. **–माला** a flight of bees. **–मोदा** N. of a plant (गणिकारी). **–विरावः, –रुतम्** song or hum of a bee. **–वल्लभः** =°प्रिय q. v.

अलिन् *m.* [अल्-इनि] **1** A scorpion. **–2** A bee; मलिनिमाऽलिनि माधवयोषिताम् Śi. 6. 4. अभिषिषेच मरन्दरसामृतैर्नवलता बलतापनरत्नभम् (अलिनम्) Rām. ch. 4. 12. **–नी 1** A swarm of bees; अरमतालिनी शिलीन्ध्रे Śi. 6. 72; अलिनीजिष्णुः कचानां चयः Bh. 1. 5.

अलिंशः Ved. A kind of demon; मा गृधदलिंश Av. 8. 6. 1.

अलिकम् [अल्यते भूष्यते अल्–कर्मणि इकन्] The forehead; (ललाटमलिकं गोधिः AR.) किमत्र जातं तव चुम्बितेऽलिके कपोलयोर्वा कलवाणि भण्यताम्। U. 2. 33. अलिकेन च हेमकान्तिना Bv. 2. 171; Vb. 3. 6. **–Comp. –लेखा** An impression or mark upon the forehead; K.

अलिक्लवः A kind of carrion bird; मा शरीराणि कर्तमलिक्लवेभ्यो Av. 11. 2. 2.

अलिगर्दः A kind of snake.

अलिङ्ग *a.* **1** Having no characteristic marks, having no marks; said of the Supreme Being; एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिङ्गमलिङ्गमीश्वरम् Bhāg. 1. 6. 26. अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च Kaṭh. 6. 8. **–2** Having bad marks. **-3** (In gram.) Having no gender; **–ङ्गः** An epithet of the Supreme Being; अलिङ्गात्प्रकृतिर्लिङ्गैरुपालभ्यति सात्मजैः Mb. 12. 305. 26. **–ङ्गम्** Absence of marks.

अलिङ्गिन् *m.* An impostor, a pretended ascetic.

अलिञ्जरः A water-jar; see अलञ्जर Mb. 3.

अलिन *a.* [अल्–बाहु° इनन्] Greatly advanced in penance (तपोभिरतिवृद्ध). **–नः** N. of a tribe; Rv. 7. 18. 7.

अलिन्दः, –अलिन्दकः [अल्यते भूष्यते, अल्–कर्मणि–किंदच्] **1** A terrace before a housedoor; मुखालिन्दतोरणम् M. 5, Dk. 74. **–2** A place (like a square) at the door. **–3** (pl.) N. of a country or its inhabitants; or its ruler also.

अलिपकः **1** A cuckoo. **–2** A bee. **–3** A dog.

अलिप्सा Freedom from desire or cupidity.

अलिमकः = अनिमक q. v.

अलिम्पक, –बक see अनिमक.

अलीक *a.* [अल्–बीकन् Uṇ. 4. 25 निपातः] **1** Unpleasing, disagreeable; आ मे शृणुतासिता अलीकाः Av. 5. 13. 5. **–2** Untrue, false, pretended; °मुग्धः K. 84; अलीककोपकान्तेन K. 147; °वचन Amaru. 27, 37, 48. **–3** Little, not much, few. **–कम्** The forehead; दिशामलीकालकभङ्गतां गतः K. 4. **–2** Anything displeasing; यद्यथा स महाराजो नालीकमाधिगच्छति Rām. 2. 52. 26. falsehood, untruth. गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया Ms. 11. 55. सज्जनस्य हृदयं नवनीतं यद् वदन्ति कवयस्तदलीकम्। अन्यदेहविलसत्परितापात् सज्जनो द्रवति नो नवनीतम् ॥ Subhāṣ. **–3** Heaven. **–4** Sorrow; अलीकं मानसं त्वेकं हृदयं मम Rām. 2. 19. 6. अलीकं त्वप्रिये स्वर्गे सङ्घेऽनृतललाटयोः **–Comp. –मत्स्य** a kind of dish resembling the taste of fish ('mock-fish'). **–सुप्त, सुप्तक** *a.* pretended sleep; Ks.

अलीकायते Den. A. to be deceived.

अलीकिन् *a.* **1** Disagreeable, unpleasant. **–2** False, deceiving.

अलीक्य *a.* False.

अलीगर्दः A snake; see अलिगर्द.

अलुः [अल्–उन्] A small water pot.

अलुक् [नास्ति विभक्तेः लुक् लोपो यत्र] A compound in which the case terminations are not dropped but retained; *e. g.* सरासिजम् आत्मनेपदम् जनुषान्धः &c.

अलुप्त *a.* **1** Not cut off, undiminished. –2 Not destroyed, preserved; भवेदलुप्तश्च मुनेः क्रियार्थः R. 2. 25. **–Comp. –महिमन्** *a.* Of undimished glory.

अलुब्ध *a.* Moderate, content, not covetous; °त्वं contentment; non-covetousness.

अलूक्ष *a.* Soft (Ved. for अरूक्ष). अलूक्षा धर्मकामाः स्युः T. Up. 1. 11. 4.

अले, अलेले *ind.* Unmeaning words in the dialect of the Piśāchas chiefly introduced in plays.

अलेपक *a.* Stainless. **–कः** An epithet of the Supreme Spirit.

अलेश *a.* Not little, much, large, **–शम्** *ind.* Not at all.

अलेशौज *a.* Firm, steady.

अलोक *a.* **1** Not having space (Ved.). **–2** That which cannot be seen, as in लोकालोक इवाचलः R. 1. 68 (न लोक्यत इत्यलोकः Malli.); see लोकालोक also. **–3** Having no people. **–4** One who does not go to any other world after death (not having performed meritorious deeds). **–5** Beyond space (लोकातीत परब्रह्म); पश्यतां सर्वलोकानामलोकं समपद्यत Bhāg. 6. 12. 35. **–कः, –कम्** **1** Not the world. **–2** End of, destruction of the world; absence of people; रक्ष सर्वानिमाँल्लोकान् नालोकं कर्तुमर्हसि Rām. **–3** The immaterial or spiritual world. **–4** The nether world (पाताल). **–5** A *Ritvij* or any such priest. **–6** One who is not a seer or observer. **–का** A kind of bird. **–Comp. –व्रतम्** Religious practice like ब्रह्मचर्य; चरन्त्यलोकव्रतमव्रणं वने Bhāg. 8. 3. 7. **–सामान्य** *a.* extraordinary, uncommon; °गुणस्तनूजः Māl. 1. 10.

अलोकनम् Invisibility, disappearance.

अलोकनीय *a.* Invisible.

अलोकित *a.* Unseen.

अलोक्य *a.* **1** Not securing the other world or heaven; unusual, unallowed; न हैवालोक्यताया आशास्ति Bṛi. Up. 1. 3. 28; यथास्योद्विजते वाचा नालोक्यां तामुदीरयेत् Ms. 2. 161. **–2** Of dark nature; राजधर्मास्तथाऽलोक्यां निक्षिपन्त्यशुभां गतिम् Ms. 12. 65. 7. °ता unfitness for heaven.

अलोपाङ्ग *a.* Not defective in a single limb.

अलोभः **1** Freedom from covetousness, moderation. **–2** Non-confusion; right process.

अलोभिन् *a.* Not wanting or desiring anything.

अलोमक, –अलोमिक *a.* Hairless; नालोमिकाम् (उद्वहेत्) Ms. 3. 8.

अलोल *a.* **1** Tranquil, unagitated. **–2** Firm, steady. **–3** Not fickle. **–4** Not thirsty, free from desire. **–5** N. of a metre of 14 syllables.

अलोलु *a.* Indifferent to sensual objects; °त्वम् indifference to sensual objects; दया भूतेष्वलोलुप्त्वम् Bg. 16. 2. (v. l. अलोलत्वम्).

अलोलुप *a.* **1** Free from desire; भ्रष्टा संवर्तको वह्निः सर्वस्यादिरलोलुपः Mb. 3. 3. 23. **–2** Not greedy or covetous, apathetic, indifferent to sensual objects.

अलोहित *a.* Bloodless, not red; अलोहितमस्नेहम् Bṛi. Up. 3. 8. 8. **–तम्** Nymphæa Rubra, a red lotus.

अलौकिक *a.* (**–की** *f.*) **1** Not current in the world, not relating to this world, uncommon, supernatural. **–2** Unusual, rare. **–3** Not current in the usual language, peculiar to the sacred writings, not used in classics, Vedic; अधिहरि हरि ञि इत्यलौकिकम्. **–4** Theoretical; °त्वम् rare occurrence of a word; अलौकिकत्वादमरः स्वकोषे न यानि नामानि समुल्लिलेख । विलोक्य तैरप्यधुना प्रचारमयं प्रयत्नः पुरुषोत्तमस्य Trik. 1. **–Comp. –संनिकर्षः** proximity not common to the world (of three kinds).

अल्कः **1** A tree. **–2** A member of the body.

अल्प *a.* [अल्–प] **1** Trifling, unimportant, insignificant (opp. महत् or गुरु); अल्पविद्यः Ms. 11. 36. **–2** Small, little, minute, scanty (opp. बहु); अल्पस्य हेतोर्बहु हातुमिच्छन् R. 2. 47; 1. 2; अल्पकुचान्तरा V. 4. 49. **–3** Mortal, of short existence; अथ यदल्पं तन्मर्त्यम् Ch. Up. **–4** Young. **–5** Seldom, rare. **–ल्पः** A class of buildings; Kāmikāgama, 45. 53–54. **–ल्पम्** Very little. **–ल्पम्, –ल्पेन, –ल्पात्** *adv.* **1** A little. **–2** For a slight reason; प्रीतिरल्पेन भिद्यते Rām. 4. 32. 7. **–3** Easily, without much trouble or difficulty. **–Comp. –अच्तर** (comparative) A word consisting of a smaller number of syllables (than another) अल्पाच्तरन् P. II. 2. 34. **–अल्प** *n.* very little or minute, little by little; तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाऽऽब्दिकः करः Ms. 7. 129; °भासम् Me. 83. **–असु** = °प्राण q. v. **–आकाङ्क्षिन्** *a.* desiring little, contented or satisfied with little. **–आयुस्** *a.* shortlived; Ms. 4. 157. (**–युः**) *m.* **1** a young one, cub. **–2** a goat. **–आरम्भः** a small or gradual beginning; अल्पारम्भः क्षेमकरः. **–आहार, –आहारिन्** *a.* eating little, moderate in diet, abstemious. (**–रः**) taking little food, moderation, abstinence in food. **–इच्छु** *a.* moderate in wishes, seeking little. **–इतर** *a.* **1** other than small, large. **–2** other than few, many; as °राः कल्पनाः many or various ideas. **–ईशाख्य** *a.* Named after an insignificant chief or master, or low origin. **–ऊन** *a.* slightly defective, not quite complete. **–उपायः** small means. **–कार्यम्** a small matter. **–केशी** **1** N. of a plant (भूतकेशी; Mar. जटामांसी, निर्गुडी). **–2** the root of a sweet flag. **–क्रीत** *a.* bought for a small sum, cheap. **–गोधूमः** A kind of wheat (Mar. जोडगहू or खपल्या गहू) **–गन्ध** *a.* having little scent or odour. (**–न्धम्**) a red lotus. **–चेष्टित** *a.* inert. **–च्छद, –च्छाद** *a.* scantily clad; दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया Mk. 1. 37. **–ज्ञ** *a.* knowing little, shallow, superficial. **–तनु** *a.* **1** of short stature, dwarfish, short. **–2** weak, thin. **–3** having small bones. (**–नुः**) a kind of tree. **–दक्षिण** *a.* defective in presents (as a ceremony), not liberal in sacrificial gifts; न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथंचन;

हन्त्यल्पदक्षिणो यज्ञः Ms. 11. 39. 40. –**दृष्टि** *a.* narrow-minded, short-sighted. –**धन** *a.* of little wealth, not affluent or rich, poor; Ms. 3. 66; नाल्पधनो यजेत् 11. 40. –**धी** *n.* weak-minded,, having little, sense, foolish. –**नासिकः** A small vestibule; Māna. 34. 106. –**पत्रः** 1 N. of a plant (a species of the Tulsi). –2 a tree having a few leaves. (Mar. शोपा, मुसळी). –**पद्मम्** a red lotus. –**पशु** *a.* Ved. having a small number of cattle. अनपत्यमल्पपशुं वशा कृणोति पुरुषम् Av. 12. 4. 25. –**पुण्य** *a.* Whose religious merit is small; Rām. Mbh. –**पुष्पिका** N. of a flower-plant (Mar. पिवळी कण्हेर). –**प्रजस्** *a.* having few descendants or subjects. नित्यमसिच् प्रजामेधयोः P. V. 4. 122. –**प्रभाव** *a.* of small weight or consequence, insignificant, unimportant; °त्वम् insignificance. –**प्रमाण, –प्रमाणक** *a.* 1 of little weight or measure. –2 of little authority, resting on little evidence. (–**णः,–णकः**) common cucumber. –**प्रयोग** *a.* of rare application or use, rarely used. –**प्राण, –असु** *a.* having little power or strength, having short breath, asthmatic; °णश्च क्रियासु भवति Suśr. (–**णः**) 1 slight breathing or weak aspiration. –2 (in gram.) a name given to the unaspirated letters of the alphabet (in pronouncing which little effort is required); अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः Sk. *i. e.* the vowels, semivowels, nasals and the letters क् च् ट् त् प् ग् ज् ड् द् ब्. –**बल** *a.* weak, feeble, having little strength. –**बाध** *a.* causing little annoyance or inconvenience, not very harmful; न निषेध्योऽल्पबाधस्तु Y. 2. 156. –**बुद्धि, –मति** *a.* weak-minded, unwise, silly, ignorant; Ms. 12. 74. –**भाग्य** *a.* unfortunate. –**भाषिन्** *a.* speaking little, taciturn. –**मध्यम** *a.* slender-waisted. –**मात्रम्** 1 a little, a little merely. –2 a short time, a few moments. –**मारिषः** [अल्पः मारिषः शाक° कर्मधा°] a kind of amaranth (शाक) Amaranthus Polygamus (Mar. तांदुळजा). –**मूर्ति** *a.* small-bodied, diminutive, dwarfish. (–**र्तिः** *f.*) a small figure or object. –**मूल्य** *a.* of small value, cheap. –**मेधस्** (see Kāś. on P. V. 4. 122.) *a.* of little understanding, ignorant, silly. पुरुषस्याल्पमेधसः Kaṭh. Up. 1. 8; तद्भवत्यल्पमेधसाम् Bg. 7. 23. –**वयस्** *a.* young in age, youthful. –**वर्तिका** N. of a bird (Mar. गांजीण). –**वादिन्** *a.* speaking little, taciturn. –**विद्य** *a.* ignorant, ill-taught, uneducated; Ms. 11. 36. –**विषय** *a.* 1 of limited range or capacity; क्व चाल्पविषया मतिः R. 1. 2. –2 engaged in trifling matters. –**शक्ति** *a.* of little strength, weak, feeble. –**शमी** a small tree like शमी. –**सत्त्व** *a.* Having little strength or courage; Ks. –**सरस्** *n.* a basin, a small pond (one which is shallow or dry in hot seasons). –**सार** *a.* Of little value; द्रव्याणामल्पसाराणां स्तेयम् Ms. 11. 164.

अल्पक *a.* (–**ल्पिका** *f.*) 1 Small, little, minute. –2 Contemptible, mean; Śi. 16. 28; नाग्निपरिशुद्धिमपि अल्पकाः प्रतिपद्यन्ते U. 4. –**कम्** Little. –**कः** N. of a plant (यवास; Mar, धमासा),

अल्पता, –त्वम् 1 smallness, minuteness; Bh. 3. 47. –2 Smallness of intellect, folly; Ki. 6. 37. –3 Inferiority, insignificance.

अल्पंपच *a.* Cooking little, stingy, niggardly. –**चः** A miser.

अल्पशः *ind.* 1 In a low degree, slightly, a little; बहुशो ददाति आभ्युदयिकेषु, अल्पशः श्राद्धेषु P. V. 4. 42. Com.; P. II. 1. 38. –2 Separately. –3 Seldom, now and then.

अल्पित *a.* [अल्प कृतार्थे णिच् कर्मणि–क्त] 1 Diminished. –2 Lowered in estimation, disparaged; मृषा न चक्रेऽल्पितकल्पपादपः N. 1. 15.

अल्पिष्ठ *a.* [अतिशयेन अल्पः इष्ठन्] Least, smallest, very small.

अल्पीकृ 8 U. To make small, diminish, reduce in number, commute.

अल्पीभूत *a.* Become small, diminished, reduced in number.

अल्पीयस् *a.* [अतिशयेन अल्पः ईयसुन्] Smaller, less; very small.

अल्लकम् Seed of Coriander (कुस्तुम्बरी, Mar. धने) –**का** The plant coriander.

अल्ला (Ety. ?) 1 A mother (Voc. अल्ल) अम्बार्थनद्योर्ह्रस्वः P. VII. 3. 107. –2 The Supreme Goddess. –3 See अल्लकम्. –**ल्लः** The Supreme God etc. (अल्लोपनिषत्).

अव् 1 P. [अवति, आव, आवीत्, अविष्यति, अवितुम्, अवित or ऊत] 1 To protect, defend; सह नाववतु Tait 2.1.1. यमवतामवतां च धुरि स्थितः R. 9. 1; प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः Ś. 1. 1. –2 To please, satisfy, give pleasure to; do good to; विक्रमसेन मामवति नाजिते त्वयि R. 11. 75; न मामवति सद्वीपा रत्नसूरपि मेदिनी. 1. 65. –3 To like, wish, desire, love. –4 To favour, promote, animate. (In the Dhātupaṭha several other meanings are assigned to this root, but they are very rarely used in classical literature; *e. g.* गति, कान्ति, अवगम, प्रवेश, श्रवण, स्वाम्यर्थ or सामर्थ्य, याचन, क्रिया, दीप्ति, अवाप्ति, ग्रहण, व्याप्ति, आलिङ्गन, हिंसा, आदान, दहन, भाव, भाग, and वृद्धि). –*Caus.* To consume, devour. -With **अनु** to encourage, inspire. –**उद्** 1 to regard, attend to. –2 to wait for. –3 to promote, impel. –**उप** 1 to cherish, behave friendly towards. –2 to encourage. –**सम्** 1 to satisfy, satiate. –2 to protect, maintain. [cf. L. *aveo*].

अवः Favour; अग्नेरवेण मरुताम् Rv. 1. 128. 5.

अवन *a.* [अव्-ल्युट्] Protecting, defending; अनवनी नवनीपवनावलिः Śi. 6. 37. –**नम्** Protection &c.

अव *ind.* (the initial अ is sometimes dropped, as in पूर्वापरौ तोयनिधी वगाह्य Ku. 1. 1) 1 (As a preposition) Away, off, away from, down; कृत्वा मुखान्यवशुचः श्वसनेन

शुष्यत् Bhāg. 10. 29. 29. **–2** (As a prefix to verbs) It expresses (*a*) determination; अवधृ, अवसो; (*b*) diffusion, pervasion; अवकॄ, -कीर्ण; (*c*) disrespect; अवज्ञा, अवमन्; (*d*) littleness; व्रीहीनवहन्ति; (*e*) support, resting upon; अवलम्ब्; (*f.*) purification, अवदात; (*g*) depreciation, discomfiture; अवहन्ति शत्रून् (पराभवति); (*h*) commanding; अवक्लृप्; (*i*) depression, bending down; अवतॄ, अवगाह् (*j*) knowledge; अवगम्, अवइ. **–3** As the first member of Tat. compounds it means अवकृष्ट; अवकोकिलः = अवकुष्टः कोकिलया Sk.

अवतरम् *ind.* Farther away; अव स्वेदघशंसोऽवतरमव क्षुद्रामिव स्रवेत् Rv. 1. 129. 6.

अवंशः A bad family, wrong family; °पतितो राजा Chāṇ. 81. **–शम्** That which has no pillars or support, the ether; अवंशे द्यामस्तभायद् Rv. 2. 15. 2.

अवकट *a.* [अव–स्वार्थे–कटच् अवात्कुटारच्च P. V. 2. 30] **1** Downwards; backwards. **–2** Opposite, contrary. **–टम्** Contrariety, opposition.

अवकटिका Dissimulation.

अवकरः [कॄ–अप्] Dust, sweepings; अवकरनिकरं विकिरती Bh. 2. 124.

अवकर्ण् 10 P. To hear; सहसावकर्ण्य निरियाय संसदः Śi. 15. 67.

अवकर्णनम् Hearing; K. 108.

अवकर्षणम् Drawing with strength, removing a thing from one place to another.

अवकलित *a.* **1** Seen, observed. **–2** Known. **–3** Taken, received. **–4** Wicked, perverse.

अवका A grassy plant (शैवाल) growing in marshy land. **–Comp. –अद** *a.* eating moss. **–उल्ब** *a.* covered or surrounded with अवका plants.

अवकाश् 1, 4. A. To be visible, to be manifest. *–Caus.* To cause to look at.

अवकाशः **1** Occasion, opportunity; ताते चापद्वितीये वहति रणधुरां को भयस्यावकाशः Ve. 3. 7; उत्तरावकाशमपाहरन्त्या K. 204, 265; साहाय्यदानावकाशः DK. 96; M. 3. 13; M. 2; oft. used with लभ् in the sense of 'to get an opportunity or scope for action'; लब्धावकाशोऽविध्यन्मां तत्र दग्धो मनोभवः Ks. 1. 41. **–2** (*a*) Place, space, room; अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ R. 4. 58; अन्यमवकाशमवगाहे V. 4; Ms 3. 207; यथावकाशं नी to take to its proper place, R. 6. 14; अस्माकमस्ति न कथंचिदिहावकाशः Pt. 4. 8; अवकाशो विविक्तोऽयं महानद्योः समागमे Rām.; सदोषावकाश इव ते वाक्यशेषः V. 3 your unfinished sentence shows that there is room to find fault. (*b*) Footing, admission, scope, access, entrance; (छाया) शुद्धे तु दर्पणतले सुलभावकाशा Ś. 7. 32; oft. used in these senses with लभ्; लब्धावकाशा मे प्रार्थना, लब्धावकाशो मे मनोरथः Ś. 1; शोकावेगदूषिते मे मनसि विवेक एव नावकाशं लभते Prab.; also with कृ or दा 'to make room for', 'admit', 'give way to'; असौ हि दत्त्वा तिमिरावकाशम् Mk. 3. 6; तस्माद्देयो विपुलमतिभिर्नावकाशोऽधमानाम् Pt. 1. 366; शयने दत्तोऽवकाशः Amaru. 21; अदत्तावकाशो मत्सरस्य K. 45 not swayed by malice; Ms. 9. 271; Y. 2. 276; ददौ च निजचित्तेऽपि सोऽवकाशं मनोभुवः Ks. 20. 71; K. 132, 141, 207; Ratn. 2. 13; अवकाशं रुध् to obstruct, hinder or impede; नयनसलिलोत्पीडरुद्धावकाशाम् (निद्राम्) Me. 92. **–3** Interval, intermediate space or time. **–4** An aperture, opening. **–5** A glance cast on anything. **–6** N. of certain verses during the recitation of which the eyes must be fixed upon certain objects.

अवकाशवत् *a.* Spacious.

अवकाश्य *a.* Admitted in the recitation of the *Avakāśa* verses.

अवकीर्ण,–र्णिन् See under अवकॄ.

अवकीलकः A peg or plug set inside; क्षुत्पिपासावकीलकम् Mbh. 14. 45. 3.

अवकुञ्चनम् **1** Bending, curving, contraction. **–2** A kind of disease.

अवकुटार *a.* [अव–स्वार्थे अतिशये वा कुटारच्] Very deep, downwards, backwards. **–रम्** Deformity. See अवकट.

अवकुट्टित *a.* **1** Vexed, inflammed. **–2** Cut off.

अवकुण्ठनम् **1** Investing, surrounding. **–2** Attracting, engaging.

अवकुण्ठित *a.* **1** Invested, surrounded. **–2** Attracted.

अवकुत्स् 10 U. To blame, revile, condemn.

अवकुत्सित *p. p.* Blamed, reviled &c. **–तम्** Blame, censure.

अवकूल् To singe, to burn; Suśr.

अवकृत *a.* Directed downwards (as a root).

अवकृत् 6 P. To cut off or away. *–Caus.* To cause to cut off.

अवकर्तः A part cut off, a strip; वस्त्रावकर्तेन संवीता Nala. 10. 22.

अवकर्तनम् **1** Cutting off, excision; वस्त्रार्धस्यावकर्तनम् Nala. 10. 16. **–2** Battle field; एकमुक्त्वा तु गांधारी कुरूणामवकर्तनम्। अपश्यत्तत्र तिष्ठन्ती सर्वं दिव्येन चक्षुषा Mb. 11. 16. 1.

अवकर्तिन् *a.* Cutting off or out; चर्म°यशश्चर्मावकर्तिनः (अन्नमादत्ते) Ms. 4. 218.

अवकृष् 1 P. **1** To draw off or away, to pull off, drag down or pull down. **–2** To extract, take out.

अवकर्षणम् **1** Taking or pulling out, extraction. **–2** Expulsion.

अवकृष्ट *p. p.* **1** Drawn away or down, pulled down. **–2** Removed. **–3** Expelled, turned out or away.

-4 Inferior, low, degraded, outcast (opp. उत्कृष्ट or प्रकृष्ट); पादावकृष्टो राजन्ये तथाधर्मो विधीयते Mb. 12. 35. 32. °जातिः Ns. 8. 177; प्रतिकर्तुं प्रकृष्टस्य नावकृष्टेन युज्यते Rām. **−ष्टः** A servant who performs the lowest menial duties (such as sweeping &c.). (संमार्जनशोधनविनियुक्त); पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम् Ms. 7. 1. 126.

अवकृ 6 P. **1** To bestow, pour upon, to shower upon, cover with, fill; Śi. 11. 62; (तं) अवाकिरन् बाललताः प्रसूनैः R.2. 10, 4. 27; लाजाञ्जलिभिरवकीर्यमाणः K. 86; Ki. 6. 2; अवकीर्योत्तरीयाणि Mb. spreading on the ground; तीर्थानि अवकीर्णानि तपस्विभिः Mb. filled with; Y. 3. 281; Me. 56. **−2** To pour out, throw out; सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् Ms. 6. 48. **−3** To shake off, throw off, leave. **−4** (*Atm.*) (Used reflexively) (*a*) To extend, spread itself; अवकिरते हस्ती स्वयमेव Sk. (*b*) To fall asunder. (*c*) To pass away, fall off. (*d*) To become faithless or untrue.

अवकीर्ण *p. p.* **1** Scattered, filled, covered over; किमैपति रजोभिरौर्वरैरवकीर्णस्य मणेर्महार्घता Śi. 16. 27. **−2** Coarsely pounded. **−3** Destroyed; अवकीर्णो हि समरे वीरो दुष्प्रज्ञया तदा Mb. 15. 16. 11. **−4** Violated (as the vow of a ब्रह्मचारी), degraded. **−5** Declining, dilapidating; दृष्ट्वा तथाऽवकीर्णं तु राष्ट्रम् Mb. 9. 41. 16.

अवकीर्णिन् *a.* [अवकीर्णमनेन इष्टा° इनि] Violating the vow or engagements of continence. *m.* (**−र्णी**) A religious student who has committed an act of incontinence (such as sexual intercourse) against his vow of celibacy; अवकीर्णी भवेद् गत्वा ब्रह्मचारी तु योषितम्। गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति ॥ Y. 3. 280; Ms. 3. 155, 11. 118-9; °व्रतम् penance for an act of incontinence.

अवक्लृप् 1 A. **1** To correspond with, to answer. **−2** To be right or fit, to be possible; इतश्च न प्रधानस्य प्रवृत्तिरवकल्पते Ś. B. 2. 2. 8. **−3** To help to, to serve, to accomplish, result in (with dat.); शरीरिणां संसृतयेऽवकल्पते Bhāg. *−Caus.* **1** To put in odrer, to prepare; to make ready; संभारानवकल्पय Mb. **−2** To use or employ becomingly. **−3** To consider as possible; नावकल्प्यमिदं ग्लायेद्यत्कृच्छ्रेषु भवानपि Bk. 19. 17; यत्तत्रभवान्वृषलं याजयेन्नावकल्पयामि P. III. 3. 147 Sk.

अवकल्पित *p. p.* Corresponding with; right, fit.

अवक्लृप्तिः *f.* **1** Considering as possible, possiblity, probability; क्वेव भोक्ष्यसे अनवक्लृप्तावेव Sk. (अनवक्लृप्तिरसंभावना). **−2** Suitableness.

अवकेश *a.* Having the hair hanging down. यस्ते मदोऽवकेशो विकेशो Rv. 6. 30. 2.

अवकेशिन् *a.* **1** Unfruitful, barren (as a tree). **−2** [अवसन्नाः केशा विद्यन्ते अस्य इनि] Having small or very few hair. *m.* A fruitless tree. अपकारपरस्यापि प्रयास्यत्यवकेशिताम् Śiva. B. 15. 21. द्वितीयो ह्यवकेशी स्यात् प्रथमस्तु फलेग्रहिः *ibid.* 16. 27.

अवकोकिल *a.* [अवक्रुष्टः कोकिलया] Drawn or called down to by a cuckoo.

अवक्तव्य *a.* **1** Not fit to be uttered, improper. **−2** Censurable (as a saying). **−3** False. **−4** Indescribable, inexpressible.

अवक्त्र *a.* Having no opening (as a vessel, wound &c.).

अवक्र *a.* Not crooked, straight; (fig.) honest, upright.

अवक्रक्षिन् [अव−कृष् णिनि पृषो] Dashing down, overcoming; अवक्रक्षिणं वृषभं यथा जुरम् Rv. 8. 1. 2.

अवक्रन्द् 1 U. To cry out, roar.

अवक्रन्द *a.* Crying slowly, roaring, neighing. **−न्दः** A cry; क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा Vāj. 22. 7.

अवक्रन्दनम् Crying out, weeping aloud.

अवक्रम् 1 U., 4 P. **1** To step down or away, run away, escape, withdraw. **−2** To tread down, overcome; अवक्रामन्दाः प्रपदैरामित्रान् Rv. 6. 75. 7. वज्रेणैवेनमवक्रामति Śat. Br. **−3** To descend, come down. *−Caus.* To cause to go down.

अवक्रम Descending, descent.

अवक्रान्तिः *f.* **1** Descending, descent. **−2** Approach.

अवक्रामिन् *a.* Ved. Running away, escaping; बन्धमिवावक्रामी गच्छ Rv. 5. 14. 10.

अवक्रिया Neglect, omission, non-performance of prescribed acts.

अवक्री 9 U. **1** To purchase. **−2** To let out, hire. **−3** To bribe, buy off.

अवक्रयः **1** Price. **−2** Wages, hire, farm rent. **−3** Letting out to hire, leasing; Y. 2. 238. **−4** A tax or tribute (to be paid to the king), duty (राजग्राह्यं द्रव्यम् Sk.).

अवक्रुश् 1 P. To call down to; to revile.

अवक्रुष्ट *p. p.* Sounded ill or badly, reviled, censured.

अवक्रोशः **1** Discordant noise. **−2** A curse. **−3** Abuse, censure.

अवक्लिन्न *a.* Wet, thoroughly wet.

अवक्लेदः Trickling, descent of moisture. **−2** Ichor.

अवक्लेदनम् Trickling, falling (as dew or moisture).

अवक्वणः A discordant note.

अवक्वाथः Imperfect digestion or decoction.

अवक्षामः Ved. Propitiatory offering; satisfaction of claims, compensation.

अवक्षि 1, 5, 9, P. To remove, carry off, destroy. *−Pass.* To waste away, decay.

अवक्षयः **1** Destruction, decay, waste, loss; लब्धं रक्षेदवक्षयात् H. 2. 8. **−2** A kind of malady.

अवक्षयणम् Means of extinguishing (fire &c.); as in अङ्गार° याज्ञवल्क्यस्त्वाꣳस्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति Bṛi. Up. 3. 9. 18.

अवक्षीण *p. p.* Wasted, emaciated. **-णम्** Loss, destruction.

अवक्षिप् 6 U. 1 To fling away, to throw or cast off; सूक्ष्मवस्त्रमवक्षिप्य मुनिवस्त्राण्यवस्त ह Rām.; to hurl. **-2** To cause to fly down or away. **-3** To reprimand, revile anyone, censure, slander; मदलेखामवक्षिप्य K. 317; अवाक्षिपद्वासुदेवम् Mb. अयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजा अवक्षिपेत् Kau. A. 1. 10. **-4** To grant, yield. *-Caus.* To cause to fall down.

अवक्षिप्त *p. p.* 1 Thrown down; badly thrown. **-2** Said sarcastically, imputed, insinuated. **-3** Reviled, censured, blamed.

अवक्षेपः 1 Blaming, reviling. **-2** Objection.

अवक्षेपणम् 1 Throwing down, considered as one of the five kinds of *karman*, q. v. **-2** Contempt, despising; अवक्षेपणे कन् P. V. 3. 95. **-3** Censure, blame; P. I. 3. 32; VI. 2. 195. **-4** Overcoming, subduing. **-णी** Rein, bridle.

अवक्षु 2 P. To sneeze upon.

अवक्षुत *p. p.* 1 Sneezed upon; द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् Ms. 4. 213. **-2** Spit upon or defiled; अवक्षुतावरुदितं तथा श्राद्धे च वर्जयेत् Mb. 13. 91. 41.

अवखण्ड् 10 P. 1 To cut down, break into pieces. **-2** To waste away, wear away; अर्धयाममात्रावखण्डितायां विभावर्याम् K. 49 when the night had advanced only half a watch. **-3** To destroy, annihilate.

अवखण्डनम् Dividing, destroying.

अवखातम् [निम्नः खातः] A deep ditch.

अवखादः [अवज्ञातः निन्दितः खादः खाद्यम्] Bad or contemptible meal; an unworthy oblation. *a.* Devouring, destroying; नात्रावखादो अस्ति वः Rv. 1. 41. 4.

अवगण् 10 P. To disregard, not to heed, disrespect, despise, slight; पर्वतीय इति मावजीगणः Ki. 13. 67; अवगणितखलीनाकर्षणः Pt. 5.

अवगणनम् 1 Disobedience, disrespect, contempt, disregard. **-2** Censure, blame. **-3** Insult, mortification. **-4** Defeat.

अवगण *a.* Separated from one's companions, isolated, solitary, alone.

अवगणित *a.* Disregarded, despised.

अवगण्डः A boil or pimple upon the face or cheeks.

अवगथ *a.* [निपातः Uṇ. 2. 9] Bathed early in the morning (प्रातःस्नात).

अवगदितः 1 Having exception. **-2** Censured, blamed.

अवगम् 1 P. To go down, descend; अञ्जः समुद्रमवजग्मुरापः Rv. 1. 32. 2. **-2** To come to, visit, go near. **-3** To reach, obtain. **-4** (*a*) To know, learn, understand, think, believe; कृतापराधमिवावगच्छति आत्मानम् K. 203; मामेवमवगच्छति V. 2; कथं शान्तमित्यभिहिते श्रान्त इत्यवगच्छति मूर्खः Mk. 1; न खल्ववगच्छामि, परस्तादवगम्यत एव Ś. 1. तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् Bg. 10. 41; R. 8. 88; Bk. 5. 81. (*b*) To consider, regard, look upon. **-5** To assure oneself, be convinced. *-Caus.* 1 To bring near; अथेममिहावगमय Av. 3. 3. 6. **-2** To inform oneself of, find out, know, तावदेतेभ्यः प्रियाप्रवृत्तिरवगमयितव्या V. 4. **-3** To inform, cause to know, teach; पुरुषविशेषमवगमयति Mu. 5; सर्वमिदं पित्रोरवगमय्य Dk. **-4** To indicate, show; संनाहोऽयं साहसमवगमयति Dk. 96; Bk. 10. 53, 62.

अवगत *p. p.* 1 Gone away or down. **-2** Known, learnt, understood; sometimes used actively; तदैव ध्यानादवगतोऽस्मि Ś. 7 I learn; ऊढपूर्वां तद्दुहितरमवगतोऽहम् *ibid.* came to know. **-3** Assented, promised. **-4** Well-known (प्रसिद्ध); मामप्यवगतं धर्माद् व्यतिक्रान्तपुरस्कृतम् Rām. 4. 18. 48.

अवगतिः *f.* 1 Knowledge, perception, comprehension. **-2** True or determinate knowledge; ब्रह्मावगतिर्हि पुरुषार्थः; ब्रह्मावगतिस्त्वप्रतिज्ञाता Ś. B.

अवगमः,-गमनम् 1 Going near, descending. **-2** Understanding, comprehension, perception, knowledge, being acquainted with. **-3** True or determinate knowledge; प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् Bg. 9. 2.

अवगम्य *a.* Intelligible.

अवगल् 1 P. To fall down, slip down; सौवर्णं वलयमवागलत्करा्ग्रात् Śi. 8. 34.

अवगादः A small wooden basin for baling water out of a boat.

अश्वयति Den. P. To wish for horses.

अश्वया A desire to get horses.

अश्वयु *a.* [अश्वोऽस्त्यस्य युच्] **1** Having horses. **–2** Desiring horses.

अश्वलः [अश्वं लाति ला–क.] N. of a sage, the Hotṛi-priest of Janaka; अथ ह जनकस्य वैदेहस्य होताऽश्वलो बभूव Bṛi. Up. 3. 1. 2.

अश्वस्यति Den. P. To wish for a stallion.

अश्वायति Den. P. To wish for horses.

अश्विक *a.* [P. IV. 4. 10] Drawn or carried by horses.

अश्विन् *a.* [अश्व–अस्त्यर्थे इनि] Possessed of horses, consisting of horses; Ṛv. 4. 2. 5 *m.* A cavalier, a horse-tamer. **–नौ** (du.) **1** The two physicians of the gods who are represented as the twin sons of the Sun by a nymph in the form of a mare; cf. त्वाष्ट्री तु सवितुर्भार्या वडवारूपधारिणी । असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ ॥ [According to Vedic conception they are the harbingers of Uṣas or the dawn; they are young, beautiful, bright, swift &c.; and, according to Yāska, they represent the transition from darkness to light, when the intermingling of both produces that inseparable duality expressed by the twin nature of these deities; according to different interpretations quoted in the Nirukta they were 'heaven and earth', 'day and night', 'two kings, performers of holy acts' which may be traced to their dual and luminous nature. Mythically they were the parents of Nakula and Sahadeva and the physicians of the gods and are called *Gadāgadau, Svarvaidyau, Dasrau, Nāsatyau, Vādaveyau, Abdhijau* &c. They were celebrated for their active benevolence and curative power which they showed in restoring the sage Chyavana, when grown old and decrepit, to youth, and prolonged his life.] **–2** Two horses. **–3** (In astr.) The twins of the zodiac.

अश्विनी [अश्वस्तदुत्तमाज्ञाकारोऽस्त्यस्य इनि ङीप्] **1** The first of the 27 Nakṣatras or lunar mansions (consisting of three stars). **–2** A nymph considered in later times as the mother of the Aśvins, the wife of the Sun, who concealed herself in the from of a mare. **–Comp. –कुमारौ, –पुत्रौ, –सुतौ** the twin sons of Aśvinī, the Sun's wife.

अश्विमत् *a.* Containing the word Aśvin (such as a Mantra). P. IV. 4. 126.

अश्विय *a.* Referring to horses. **–या** Ved (pl.). A troop of horses.

अश्वीन *a.* [अश्व–ख] Distant, a day's journey for a horse.

अश्वीय *a.* [अश्व-छ] **1** Belonging or relating to a horse, agreeable to horses. **–यम्** [अश्वानां समूहः P. IV. 2. 48] A number of horses, cavalry; अश्वीयानामुच्चकैरुच्चलन्तः Śi. 18. 5; K. 222.

अश्व्य *a.* [अश्व-यत्] **1** Belonging to a horse. **–2** Consisting of horses. **–श्व्यम्** A number of horses. **–3** Possession of horses. **–श्व्यः** 'son of Aśva', N. of Vaśa; याभिर्वशमश्व्यं प्रेणिमावतम् Ṛv. 1. 112. 10.

अश्वन्त *a.* See अश्मन्त. 1 Unlucky, inauspicious. –2 Unbounded, unlimited. **–न्तः** 1 Death. –2 A field. –3 Fireplace. –4 Termination, limit.

अश्वस्तन, –स्तनिक *a.* 1 Not of to-morrow, of to-day. –2 One who makes no provision for the morrow; त्र्यैहेहिको वापि भवेदश्वस्तनिक एव वा Ms. 4. 7.

अष् 1 U. [अषति–ते, अषितुम्] 1 To shine. –2 To go, move. –3 To receive, take (trans.).

अषडक्ष=अषडक्षीण. The ending ईन is स्वार्थे; *i. e.* both अषडक्ष and अषडक्षीण mean the same thing.

अषडक्षीण *a.* Not seen by six eyes, known or determined by two persons only, (to the exclusion of a third); [°णो मंत्रः द्वाभ्यामेव कृत इत्यर्थः P. V. 4. 7 Sk.] **–णम्** A secret.

अषतर् *a.* Ved. More accessible or acceptable; वा कर्मांषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते Rv. 1. 173. 4.

अषाढ *a.* Ved. 1 Not to be overcome, invincible; अषाळ्हाय सहमानाय वेधसे Rv. 2. 21. 2. –2 Born under the constellation Āṣāḍha [P. IV. 3. 34]. अथाजिनाषाढधरः प्रमाथी. **–ढः** 1 The month Āṣāḍha commencing with the Sun's entrance into Gemini (usually written आषाढ). –2 A staff made of the wood of Palāśa, carried by a religious student or ascetic. –3 N. of the Malaya mountain. **–ढा** 1 N. of a constellation, the twentieth (पूर्वाषाढा) and twenty-first (उत्तराषाढा) lunar mansions; Av. 19. 7. 4.

अषाढकः The month of Āṣāḍha.

अष्टन् *num. a.* [अश–व्याप्तौ कनिन् तुट् च Uṇ. 1. 154.] (nom., acc. अष्ट-ष्टौ) Eight. It often occurs in comp. as अष्टा with numerals and some other nouns; as अष्टादशन्, अष्टाविंशतिः, अष्टापद &c. [cf. L. *octo*; Gr. *okto*; Zend *astani* Pers. *hasht.*]. **–Comp.** **–अक्षर** *a.* consisting of eight letters or parts; अष्टाक्षरं ह वा एकं गायत्र्यै पदम् Bṛi. Up. 5. 14. 1. (**–रः**) N. of a metre. **–अङ्ग** *a.* consisting of eight parts or members. (**–ङ्गम्**) 1 the eight parts of the body with which a very low obeisance is performed; °पातः, –प्रणामः, साष्टाङ्गनमस्कारः a respectful obeisance made by the prostration of the eight limbs of the body; साष्टाङ्गपातं प्रणनाम fell prostrate on the ground in reverence; (जानुभ्यां च तथा पद्भ्यां पाणिभ्यामुरसा धिया । शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः). cf. also उरसा शिरसा दृष्ट्या वचसा मनसा तथा । पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥ The eight limbs of the body in नमस्कार. –2 the 8 parts of yoga or concentration; यमो नियमश्चासनं च प्राणायामस्ततः परम् । प्रत्याहारो धारणा च ध्यानं सार्धं समाधिना । अष्टाङ्गान्याहुरेतानि योगिनां योगसिद्धये ॥ –3 materials of worship taken collectively, namely, water, milk, ghee, curds, दर्भ, rice, barley, mustard seed. –4 the eight parts of every medical science; (*they* are:— शल्यम्, शालाक्यम्, कायचिकित्सा, भूतविद्या, कौमारभृत्यम्, अगदतन्त्रम्, रसायनतन्त्रम्, and वाजीकरणतन्त्रम्.) –5 the eight parts of a court; 1 the law, 2 the judge, 3 assessors, 4 scribe, 5 astrologer, 6 gold, 7 fire, and 8 water. –6 any whole consisting of eight parts. –7 a die, dice. –8 The eight functions of intellect (बुद्धि) are शुश्रूषा, श्रवण, ग्रहण, धारणा, चिन्तन, ऊहापोह, अर्थविज्ञान and तत्त्वज्ञान; बुद्ध्या ह्यष्टाङ्गया युक्तं त्वमेवार्हसि भाषितुम् Rām. 6. 113. 24. °अर्घ्यम् an offering of eight articles. °धूपः a sort of medical incense removing fever. °मैथुनम् sexual enjoyment of 8 kinds'; the eight stages in the progress of a love suit; स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥ °**वैद्यकम्** It is constituted of द्रव्याभिधान, गदनिश्चय, कायसौख्य, शल्यादि, भूतनिग्रह, विषनिग्रह, बालवैद्यक, and रसायन. °हृदयम् N. of a medical work. **–अधिकाराः** जलाधिकारः, स्थलाधिकारः, ग्रामाधिकारः, कुललेखनम्, ब्रह्मासनम्, दण्डविनियोगः, पौरोहित्यम्. **–अध्यायी** N. of Pāṇini's grammatical work consisting of 8 Adhyāyas or chapters. **–अन्नानि** The eight types of food भोज्य, पेय, चोष्य, लेह्य, खाद्य, चर्व्य, निःपेय, भक्ष्य. **–अर** *a.* having a wheel with 8 spokes. **–अस्त्रम्** an octagon. **–अस्त्रः** A kind of single-storeyed building octangular in plan. **–अस्त्रिय** *a.* octangular. **–अह् (न्)** *a.* lasting for 8 days. **–आदिशाब्दिकाः** the first eight expounders of the science of words (grammar); इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥ **–आपाद्य** Multiplied by eight. अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम् । Ms. 8. 337. **–उपद्वीपानि** स्वर्णप्रस्थ, चन्द्राशुक्र, आवर्तन, रमणक, मन्दरहरिण, पाञ्चजन्य, सिंहल, and लङ्का. **–कपाल** *a.* (°ष्टा°) prepared or offered in 'eight' pans. (**–लः**) a sacrifice in which ghee is offered in eight pans. **–कर्ण** *a.* one who has the number eight as a mark burnt in his ears (P. VI. 3. 115). (**–र्णः**) eight-eared, an epithet of Brahmā. (**–कर्मन्** *m.*), **–गतिकः** a king who has 8 duties to perform; (they are:— आदाने च विसर्गे च तथा प्रैषनिषेधयोः । पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे ॥ दण्डशुद्ध्योः सदा रक्तस्तेनाष्टगतिको नृपः । **–कुलम्** (Probably) Village jury. (Bh. List No. 1267). **–कुलाचलाः** Eight principal mountains; नील, निषध, विन्ध्याचल, माल्यवान्, मलय, गंधमादन, हेमकूट, and हिमालय. (**–मर्यादागिरयः**) हिमालय, हेमकूट, निषध, गन्धमादन, नील, श्वेत, शृङ्गवार, and माल्यवान्. **–कृत्वस्** *ind.* eight times. चतुर्नमो अष्टकृत्वो भवाय Av. 11. 2. 9. **–कोणः** 1 an octagon. –2 a kind of machine. **–खण्डः** a title of a collection of several sections of the Ṛigveda. **–गन्धाः** Eight fragrant substances (Mar. चन्दन, अगरु, देवदार, कोळिंजन, कुसुम, शैलज, जटामांसी, सुर-गोरोचन). **–गवम्** [अष्टानां गवां समाहारः] a flock of 8 cows. **–गाद्** *m.* 1 a fabulous animal supposed to have eight legs. –2 a spider. **–गुण** *a.* eightfold; अन्नादष्टगुणं चूर्णम्; दाप्योऽष्टगुणमत्ययम् Ms. 8. 400. (**–णम्**) the eight qualities which a Brāhmaṇa should possess; दया सर्वभूतेषु, क्षान्तिः, अनसूया, शौचम्, अनायासः, मङ्गलम्, अकार्पण्यम्, अस्पृहा चेति ॥ Gautamasūtra. °आश्रय *a.* endowed with these eight qualities. **–घ्न (°ष्टा°)**

चत्वारिंशत् *a.* forty-eight. **–तय** *a.* eight-fold. **–तारिणी** the eight forms of the goddess तारिणी; ताराचोग्रा महोग्रा च वज्रा काली सरस्वती । कामेश्वरी च चामुण्डा इत्यष्टौ तारिण्यो मताः ॥. **–तालम्** A kind of sculptural measurement in which the whole height of an idol is generally eight times that of the face. **–त्रिंशत्** –(°ष्टा°) *a.* thirty-eight. **–त्रिकम्** [अष्टावृत्तम् त्रिकम्] the number 24. **–दलम्** **1** a lotus having eight petals. **–2** an octagon. **–दशन्** (°ष्टा°) see above after अष्टातय. **–दिश्** *f.* [कर्म० स. संज्ञात्वान्न द्विगुः दिक् सङ्ख्ये संज्ञायाम् P. II. 1. 50.] the eight cardinal points; पूर्वाग्नेयी दक्षिणा च नैर्ऋती पश्चिमा तथा । वायवी चोत्तरैशानी दिशा अष्टाविमाः स्मृताः ॥. °करिण्यः the eight female elephants living in the eight points; करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् । ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ॥ Ak. °पालाः the eight regents of the cardinal points; इन्द्रो वह्निः पितृपतिः (यमः) नैर्ऋतो वरुणो मरुत् (वायुः) । कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ Ak. °गजाः the eight elephants guarding the 8 quarters; ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ Ak. **–देहाः** (पिण्डब्रह्माण्डात्मकाः) Gross and subtle bodies; स्थूल, सूक्ष्म, कारण, महाकारण, विराट्, हिरण्य, अव्याकृत, मूलप्रकृति. **–द्रव्यम्** the eight materials of a sacrifice; अश्वत्थोदुम्बुरप्लक्षन्यग्रोधसमिधस्तिलाः । सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः ॥ **–धातुः** the eight metals taken collectively; स्वर्णं रूप्यं च ताम्रं च रङ्गं यशदमेव च । शीसं लौहं रसश्चेति धातवोऽष्टौ प्रकीर्तिताः ॥ **–नागाः** (Serpents) अनन्त, वासुकि, तक्षक, कर्कोटक, शङ्ख, कुलिक, पद्म, and महापद्म. **–नायिकाः** (of श्रीकृष्ण) रुक्मिणी, सत्यभामा, जाम्बवती, कालिन्दी, मित्रवृन्दा, याज्ञजिती, भद्रा, and लक्ष्मणा. (of इन्द्र) उर्वशी, मेनका, रम्भा, पूर्वचिती, स्वयंप्रभा, भिन्नकेशी जनवल्लभा and घृताची (तिलोत्तमा). (In Erotics) वासकसज्जा, विरहोत्कण्ठिता, स्वाधीनभर्तृका, कलहान्तरिता, खण्डिता, विप्रलब्धा, प्रोषितभर्तृका, and अभिसारिका. **–पक्ष** *a.* Having eight side-pillars; अष्टपक्षां दशपक्षां शालाम् Av. 9. 3. 21. **–पद, –द्** (°ष्ट° or °ष्टा°) *a.* **1** eight-footed. **–2** a term for a pregnant animal. **–पदः** (°ष्टा°) **1** a spider. **–2** a fabulous animal called Śarabha. **–3** a worm. **–4** a wild sort of jasmin. **–5** a pin or bolt. **–6** the mountain Kailāsa (the abode of Kubera). (**–दः, –दम्**) [अष्टसु धातुषु पदं प्रतिष्ठा यस्य Malli.] **1** gold; आवर्जिताष्टापदकुम्भतोयैः Ku. 7. 10; Śi. 3. 28. **–2** a kind of chequered cloth or a board for drafts, dice-board (Mar. पट); °परिचयचतुराभिः K. 196. °पत्रम् a sheet of gold. **–प (पा)दिका** N. of a plant. **–पदी** (°ष्ट–ष्टा°) **1** wild sort of jasmin (Mar. वेलमोगरी); श्यामान्वारणपुष्पांश्च तथाऽष्टपदिका लताः Mb. 13. 54. 6. **–2** a variety of metre, often used in Jayadeva's Gītagovinda. **–पलम्** a kind of medicinal preparation of ghee. **–पाद्य** *a.* (°ष्टा°) eight-fold. **–पुत्र** *a.* Having eight sons; अष्टयोनिरदितिरष्टपुत्रा Av. 8. 9. 21. **–(देह)–प्रकृतयः** पञ्चमहाभूतानि, मनः, बुद्धिः and अहङ्कारः. **–प्रधानाः**, वैद्य, उपाध्याय, सचिव, मन्त्री, प्रतिनिधि, राजाध्यक्ष, प्रधान and अमात्य. (of शिवाजी) प्रधान, अमात्य, सचिव, मन्त्री, डबीर, न्यायाधीश, न्यायशास्त्री and सेनापति. **–भावाः** (*a*) स्तम्भ, स्वेद, रोमाञ्च, वैस्वर्य, कम्प, वैवर्ण्य, अश्रुपात, and प्रलय (*b*) कम्प, रोमाञ्च, स्फुरण, प्रेमाश्रु, स्वेद, हास्य, लास्य, and गायन. **–भैरवाः** (शिवगणाः) असिताङ्ग, संहार, रुरु, काल, क्रोध, ताम्रचूड, चन्द्रचूड, and महाभैरव, (इतरे– कपाल, रुद्र, भीषण उन्मत्त, कुपित इत्यादयः). **–भोगाः** अन्न, उदक, ताम्बूल, पुष्प, चन्दन, वसन, शय्या, and अलंकार. **–मङ्गलः** a horse with a white face, tail, mane, breast and hoofs. (**–लम्**) [अष्टगुणितं मङ्गलं शा. क. त.] a collection of eight lucky things; according to some they are:— मृगराजो वृषो नागः कलशो व्यञ्जनं तथा । वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम् ॥ according to others लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः । हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥ **–मङ्गलघृत** Ghee mixed with Orris-root (Mar. वेखंड), Costus Arabicus (कोष्ट), ब्राह्मी Siphonanthus Indica, mustard, सैन्धव, पिप्पली, and (Mar. उपळसरी). **–मधु** Eight Kinds of honey माक्षिक, भ्रामर, क्षौद्र, पोतिका, छात्रक, अर्घ्य, औदाल, दाल. **–महारसाः** Eight रसs in Āyurveda, namely वैक्रान्तमणि, हिंगूळ, पारा, हलाहल, कान्तलोह, अभ्रक, स्वर्णमाक्षी, रौप्यमाक्षी. **–महारोगाः** वातव्याधि, अश्मरी, कुष्ट, मेह, उदक, भगन्दर, अर्श, and संग्रहणी. **–महासिद्धयः** (*n.*) अणिमा, महिमा, लघिमा, प्राप्ति, प्राकाश्य, ईशिता, वशिता, and प्राकाम्य. (*b*) अणिमा, महिमा, लघिमा, गरिमा, प्राप्ति, प्राकाम्य, ईशिता and वशिता. **–मातृकाः** ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, कौबेरी, and चामुण्डा. **–मुद्राः** सुरभी, चक्र, ध्यान, योनि, कूर्म, पङ्कज, लिङ्ग and निर्याण. **–मानम्** one kudava. **–मासिक** *a.* occurring once in 8 months. **–मुष्टिः** *a.* measure called कुञ्चि; अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलः । हेमाद्रिः **–मूत्राणि** Urines of a cow, a sheep, a goat, a buffallo, a horse, an elephant, a camel, an ass. **–मूर्तिः** the 'eight-formed', an epithet of Śiva; the 8 forms being, the 5 elements (earth, water, fire, air and ether), the Sun and the Moon and the sacrificing priest; cf. Ś. 1. 1–या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री । ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् । यामाहुः सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः । प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥; or briefly expressed, the names in Sanskrit (in the above order) are:— जलं वह्निस्तथा यष्टा सूर्याचन्द्रमसौ तथा । आकाशं वायुरवनी मूर्तयोऽष्टौ पिनाकिनः ॥. °धरः 'having 8 forms', Śiva. **–मूर्तयः** Eight kinds of idols शैली, दारुमयी, लौही, लेप्या, लेख्या, सैकती, मनोमयी, and मणिमयी **–योगिन्यः** (Friends of पार्वती) (*a*) मङ्गला, पिङ्गला, धन्या, भ्रामरी, भाद्रिका, उल्का, सिद्धा, and सङ्कटा. (*b*) मार्जनी, कर्पूरतिलका, मलयगान्धिनी, कौमुदिका, भेरुण्डा, मातालि, नायकी and जया (शुभाचारा) (sometimes सुलक्षणा and सुनन्दा). **–रत्नम्** the eight jewels taken collectively; the title of a collection of 8 Ślokas on morality. **–रसाः** the 8 sentiments in dramas &c.; शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ K. P. 4 (to which is sometimes added a 9th Rasa called शान्त; निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः *ibid.*); °आश्रय *a.* embodying or representing the eight sentiments; V. 2. 18. **–लवणानि** अजमोदा, आम्लवेतस, एलची (cardamom), Black salt (Mar. पादेलोण), Garcinia Mangostona (Mar. आमसोल), Cinnamomum aromaticum (Mar. दालचिनी), Black peppar (Mar. मिरीं). **–लोहकम्** a class of 8 metals; सुवर्णं रजतं

ताम्रं सीसकं कान्तिकं तथा । वङ्गं लौहं तीक्ष्णलौहं लौहान्यष्टाविमानि तु ॥ **–वर्गः** 1 a sort of diagram (चक्र) showing the good or bad stars of a person. –2 the 8 classes of letters; (अवर्ग, क°, च°, ट°, त°, प°, य°, श°,). –3 a class of three principal medicaments, Namely ऋषभ, जीवक, मेद, महामेद, ऋद्धि, वृद्धि, काकोली, and क्षीरकाकोली cf. जीवकर्षभकौ मेदौ काकोल्याद्वृद्धिवृद्धिकी. **–वक्रः** (ष्टा) See below. **–वर्ष** *a.* Eight years old; त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः Ms. 9. 94. **–वसु** The eight वसुs in the present मन्वन्तर are (*a*) धर, ध्रुव, सोम, आप, अनिल, अनल, प्रत्यूष, प्रभास. (*b*) द्रोण, प्राण, ध्रुव, अर्क, अग्नि, दोष, वसु, विभावसु. **–वायनानि** हरिद्रा, पूगीफल, दक्षिणा, शूर्प, कङ्कण, काचमणि, धान्य, वस्त्र (Mar. खण). **–विनायकाः** The eight Gaṇapatis at मोरगांव (Dist. Poona), पाली (Dist. कुलाबा), मढ (near Karjat, dist. कुलाबा), थेऊर (near लोणी, dist. Poona), जुन्नर (dist. Poona), ओझर (near जुन्नर, Dist. Poona). रांजणगांव (Poona-Nagar Road). सिद्धटेक (near दौंड, Dist. Ahmednagar). **–विवाहाः** ब्राह्म, दैव, आर्ष, गान्धर्व, राक्षस, प्राजापत्य, आसुर, पैशाच. **–विध** *a.* [अष्टविधाः प्रकाराः अस्य] eight-fold, of eight kinds. **–विंशतिः** *f.* (°ष्टा°) [अष्टाधिका विंशतिः शाक. त.] the number twentyeight. **–शतम्** 1 One hundred and eight. –2 eight hundred. **–श्रवणः, –श्रवस्** N. of Brahmā (having 8 ears or four heads.) **–समाधयः** यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, and समाधि. **–सिद्धयः** (See –महासिद्धयः).

अष्टक *a.* [अष्ट परिमाणमस्य कन्] Consisting of 8 parts eight-fold; क्रोधजोऽपि गणोऽष्टकः Ms. 7. 48. **–कः** 1 [अष्टकं (पाणिनेः), विदन्ति अधीयते वा इत्यष्टकाः सूत्राच्च कोपधात् P. IV. 2. 65. Sk.] One who studies or is acquainted with the eight Adhyāyās of Pāṇini's grammar. –2 N. of a son of Viśvāmitra (author of the hymn Rv. 10. 104.) **–का** [अश्नन्ति पितरोऽस्यां तिथौ अश्-तकन् Uṇ. 3. 148] 1 A collection of three days (7 th, 8 th, and 9 th) beginning from the seventh day after the full moon. –2 The 8th day of three months on which the Manes are to bo propitiated. –3 A Śrāddha to be performed on the above days; worship of the Manes on certein days; तस्य व्रातस्य योऽस्य द्वितीयोऽपानः साष्टका Av. 15. 16. 2; अष्टकापितृदैवत्यमित्ययं प्रसृतो जनः Rām. 2. 108. 14. –4 The 8th day of a month; Ms. 4. 113-4. **–कम्** 1 A whole consisting of 8 parts. –2 The 8 chapters of Pāṇinī's Sūtras; (अष्टावध्यायाः परिमाणमस्य इत्यष्टकम्; पाणिनेः सूत्रम् Sk.). –3 The study of the Sūtras. –4 A division of the Ṛigveda (it being divided into 8 Aṣṭakas or 10 Maṇḍalas). –5 Any group of eight; as वानराष्टकम्, ताराष्टकम्, मङ्गलाष्टकम् &c. गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं शुभदं मनुष्यः –6 The number eight. **–Comp. –अङ्गः, –ङ्गम्** a kind of board or cloth for playing with dice on (having eight divisions).

अष्टकिक, अष्टकिन् *a.* [अष्टकाऽस्त्यस्य ठन् इनि वा] Having eight parts. **–की** One who performs an Aṣṭaka.

अष्टक्य *a.* [अष्टकेन क्रीतः यत् P. V. 1. 2] Bought for eight.

अष्टतय *a.* [अष्टावयवा अस्य अष्टन्-तयप्] Having eight parts or limbs. **–यम्** An aggregate of eight.

अष्टधा *ind.* [अष्टन्-प्रकारे धाच् सङ्ख्याया विधार्थेधा P. V. 3. 42] 1 Eight-fold, eight times. –2 In 8 parts or sections; भिन्ना प्रकृतिरष्टधा Bg. 7. 4; भिन्नेऽष्टधा विप्रससार वंशः R. 16. 3.

अष्टम *a.* (**–मी** *f.*) Eighth; गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् Ms. 2. 36. **–मः** The eighth part. **–मी** 1 The eighth day in a lunar half month; Ms. 4. 128; चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा । पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥. Viṣṇu. P. –2 N. of a medical plant (कोटालता; Mar. क्षीरकाकोळी). –3 अष्टका Śrāddha; अष्टमी यज्ञपरता चातुर्मास्यानिषेवणम् Mb. 13. 142. 15. [cf. L. *octavus*; Zend. *astemo.*] **–Comp. –अंशः** an 8 th part. **–कालिक** *a.* [अष्टमः कालः भोजनेऽस्त्यस्य ठन्] one who omits seven meal times (*i. e.* full three days and the morning of the fourth) and partakes only of the 8 th; नक्तं चान्नं समश्नीयाद्दिवा वाऽहृत्य शक्तितः । चतुर्थकालिको वास्यात्स्याद्वाऽप्यष्टमकालिकः ॥ Ms. 6. 19. **–भावः** the eighth condition or position (in Astr.).

अष्टमक *a.* The eighth; योंऽशमष्टमकं हरेत् Y. 2. 244.

अष्टमिका A weight of four Tolās.

अष्टागव *a.* See अष्टगव. –2 (a car) drawn by eight oxen; P. VI. 3. 46. Vārt. अष्टतः कपाले हविषि, गवि च युक्ते.

अष्टातय *a.* Consisting of eight parts. **–यः** A collection of eight things.

अष्टादशन् *a.* [अष्ट च दश च] Eighteen; अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम् N. 1. 5. **–Comp. –अङ्गः –ङ्गम्** the eighteen parts of medical science. **–उपचारः** [कर्म. स. संज्ञात्वान्न द्विगुः] the eighteen modes of showing respect or worshipping; आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् । स्नानं वस्त्रोपवीतं च भूषणानि च सर्वशः । गन्धपुष्पे तथा धूपदीपावन्नं च तर्पणम् । माल्यानुलेपनं चैव नमस्कारविसर्जने । अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत् Tantra. **–उपपुराणम्** a secondary or minor Purāṇa; अष्टान्युपपुराणानि मुनिभिः कथितानि तु । आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् । तृतीयं नारदं प्रोक्तं कुमारेण तु भाषितम् । चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् । दुर्वाससोक्तमाचर्यं नारदोक्तमतः परम् । कापिलं मानवं चैव तथैवोशनसेरितम् । ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च । माहेश्वरं तथा शाम्बं सौरं सर्वार्थसंचयम् । पराशरोक्तं प्रवरं तथा भागवतद्वयम् । इदमष्टादशं प्रोक्तं पुराणं कौर्मसंज्ञितम् । चतुर्धा संस्थितं पुण्यं संहितानां प्रभेदतः ॥ Hemādri. **–तत्त्वानि** Eighteen fundamantal principles; महत्, अहंकार, मनस्, पञ्चतन्मात्रs; दशेन्द्रियाणि. **–धान्यम्** the 18 kinds of corn; यवगोधूमधान्यानि तिलाः कङ्गुकुलन्थकाः । माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः ॥ गवेधुकाश्च नीवारा ओढक्योऽथ सतीनकाः । चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु ॥. **–पर्वाणि** The eighteen पर्वs of Mahābhārata are आदि, सभा, वन, विराट्, उद्योग, भीष्म, द्रोण, कर्ण, शल्य, सौप्तिक, स्त्री, शान्ति, अनुशासन, अश्वमेध, आश्रमवासि, मौसल, महाप्रस्थानक, स्वर्गारोहण. **–पुराणम्** the eighteen Purāṇas- ब्राह्मं पद्मं वैष्णवं

च शैवं भागवतं तथा। तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम्॥ आग्नेयमष्टकं प्रोक्तं भविष्यन्नवमं तथा। दशमं ब्रह्मवैवर्तं लिङ्गमेकादशं तथा॥ वाराहं द्वादशं प्रोक्तं स्कान्दं चात्र त्रयोदशम्। चतुर्दशं वामनं च कौर्मं पञ्चदशं तथा॥ मत्स्यं च गारुडं चैव ब्रह्माण्डाष्टादशं तथा॥. **–भुजा** an epithet of the goddess महालक्ष्मी. **–मूलम्** The roots of the eighteen plants (Mar. वेल, ऐरणी, टेंट्, शिवण, पहाडमूळ, पुनर्नवा, रानउडीद, चिकणा, एरंड, जीवक, ऋषभक, जीवंती, शतावरी, तिरकांडें, ऊस, दर्भ, कसई, साळी). **–विद्या** the eighteen kinds of learning or lores; अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश॥ आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः। अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु॥ **–विवादपदम्** the eighteen subjects of litigation (causes of dispute); see Ms. 8. 4–7. **–शिल्पशास्त्रोपदेशकाः** Eighteen ancient writers on the science of Architecture; भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा। नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ॥ १ ॥ ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च। वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ॥२॥ अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः॥ Matsya P. **–स्मृतिकारिन्** *m.* pl. the eighteen Smṛitikāras or law-givers of the Āryas; विष्णुः पराशरो दक्षः संवर्तव्यासहारिताः। शातातपो वसिष्ठश्च यमापस्तम्बगौतमाः। देवलः शङ्खलिखितौ भरद्वाजोशनोऽत्रयः। शौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारिणः॥

अष्टावक्रः [अष्टकृत्वः अष्टसु भागेषु वा वक्रः] N. of a celebrated Brāhmaṇa, son of the great sage Kahoḍa. [Kahoḍa married a daughter of his preceptor Uddālaka, but he was so devoted to study that he generally neglected her. When once she was far advanced in pregnancy, the unborn son was provoked at his father's neglect of her and rebuked him for his absorption in study to the neglect even of his wife. The sage was very angry at this impertinence and condemned him to be born crooked; so he came forth with his eight (aṣṭ**a**) limbs crooked (vakra); whence his name; यस्मात्कुक्षौ वर्तमानो ब्रवीषि तस्माद्वक्रो भवितास्यष्टकृत्वः Mb. when Kahoḍa was drowned into a river as the result of a wager in a dispute with a Buddhist, young Aṣṭavakra defeated the sage and delivered his father, who, being pleased, directed his son to bathe into the Samaṅgā river, on doing which the lad became perfectly straight. See Mb. Adhyāyas 132-34 of the Vanaparvan.]

अष्टाध्यायी *f.* N. of the Śatapatha Brāhmaṇa and also of Pāṇinī's grammar.

अष्टिः *f.* [अस्यते भूमौ क्षिप्यते अस्–क्तिन् पृषो॰ षत्वम्] **1** A die for playing. **–2** A metre consisting of sixty-four syllables. **–3** [अक्ष्-व्याप्तौ-क्तिन्] Pervasion, reaching (Ved.) इन्द्रं शुम्भास्म्यष्टये Av. 6. 54. 1. **–4** The body (the instrument of enjoyment). **–5** The number sixteen. **–6** Seed. **–7** Kernel. कन्दाष्टिभिर्मूलफलैः Bhāg. 4. 28. 36.

अष्टिन् *a.* Consisting of eight members or parts.

अष्ट्रा [अक्ष्यते चाल्यतेऽनया अक्ष्–करणे ष्ट्रन्] **1** A prick or goad for driving cattle, whip; Rv. 4. 57. 4, 6. 53. 9. **–2** A part of the wheel of a chariot. **–विन्** *a.* obeying the goad (as a bull); शुनमष्ट्राव्यचरत् कपर्दी Rv. 10. 102. 8.

अष्ठिः *f.* **1** A stone or kernel. **–2** Seed.

अष्ठीला [अष्ठिस्तत्तुल्यकठिनाश्मानं राति; रा-क, रस्य लः दीर्घः Tv.] **1** A round swelling below the navel produced by wind. **–2** A kind of disease of urine. **–3** A globular or round body (in general). **–4** A round pebble or stone. ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता Mb. 1. 115. 12. **–5** Kernel. **–6** Seed corn.

अष्ठीलिका **1** A kind of abscess. **–2** A pebble.

अष्ठीवत् *m., n.* [निपातोऽयम् P. VIII. 2. 12;] The knee, the kneebone.

अस् I. 2 P. [अस्ति, आसीत्, अस्तु, स्यात्; defective in non-conjugational tenses, its forms being made up from the root भू.] **1** To be, live, exist (showing mere existence); नासदासीन्नो सदासीत् Rv. 10. 129. 1; आत्मा वा इदमेक एवाग्र आसीत् Ait. Up. 1. 1. श्रुतिद्वैधं तु यत्र स्यात् Ms. 2. 14; शपथे नास्ति पातकम् 8. 112; न त्वेवाहं जातु नासम् Bg. 2. 12; आसीद्राजा नलो नाम Nala. 1. 1; Ms. 5. 7 9; न अस् not to be, to be lost, disappear, perish, नायमस्तीति दुःखार्ता Nala. 7. 16; अस्ति भोक्तुम् Sk. it has to be eaten; (for other uses of अस्ति see अस्ति s. v.). **–2** To be (used as a copula or verb of incomplete predication, being followed by a noun or adjective or adverb; or some other equivalent); भक्तोऽसि मे सखा च Bg. 4. 3; धार्मिके सति राजनि Ms. 11. 11; आचार्ये संस्थिते सति 5. 80; so एवमेव स्यात्, तूष्णीमासीत् &c. **–3** To belong to, be in the possession of (expressed in English by *have*), with gen. of possessor; यन्ममास्ति हरस्व तत् Pt. 4. 76; यस्य नास्ति स्वयं प्रज्ञा 5. 70; न हि तस्यास्ति किंचित् स्वम् Ms. 8. 417; नास्ति बुद्धिरयुक्तस्य Bg. 2. 66. **–4** To fall to the share of, to happen to or befall anyone (with gen.); यदिच्छामि ते तदस्तु Ś. 4; तस्य प्रेत्य फलं नास्ति Ms. 3. 139 he cannot enjoy or get. **–5** To arise, spring out, occur; आसीच्च मम मनसि K. 142 (this) occurred to my mind. **–6** To become; तां दृष्ट्वा दशविस्तारामासं विंशतियोजनः Rām.; also शुक्लीस्यात् राजसात् स्यात् &c. Sk. **–7** To lead or tend to, turn out or prove to be (with dat.); स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः V. 1. 1; संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् 5. 24; oft. with dat. alone without अस्; यतस्तौ स्वल्पदुःखाय Pt. 1. **–8** To suffice (with dat.); सा तेषां पावनाय स्यात् Ms. 11. 85; अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात् Jagannatha. **–9** To stay, reside, dwell, live हा पितः क्वासि हे सुभ्रु Bk. 6. 11. **–10** To take place, happen. **–11** To be in a particular relation, to be affected (with loc.); किं नु खलु यथा वयमस्यामेवमियमप्यस्मान् प्रति स्यात् Ś. 1. अस्तु well, let it be; एवमस्तु, तथास्तु so be it, amen. The form आस joined to roots in forming their periphrastic perfect is sometimes separated from the root and used by itself; तं पातयां प्रथममास पपात पश्चात् R. 9. 61, 16. 86. [cf. L. *est* and Gr. *esti*. with अस्ति; *esse*; Zend. *āsti*; Pers. *hast*, *ast*] With अति

to be over, excel, surpass. **–अनु** to be at hand; reach. **–अपि** (with loc. or an adv. of place) **1** to be in anything. **–2** to belong to, be closely connected with. **–अभि 1** to belong to, to fall to one's share; यन्ममाभिष्यात् Sk. **–2** to be over. **–3** to excel, surpass. **–4** to domineer or to tyrannize over, rule over. **–आविस्** to arise, spring up, be visible; आचार्यकं विजयि मान्मथमाविरासीत् Māl. 1. 26. **–उप** to be near to or in. **–परि 1** to be in the way. **–2** to surpass. **–3** to pass or spend (time). **–4** to pervade. **–प्र 1** to be in front of. **–2** to be in extraordinary degree, to preponderate, excel, surpass. **–प्रति 1** to be equal to, be a match for. **–2** to rival, emulate, vie with. **–3** to be a representative of, stand in place of. **–प्रादुस्** to appear, spring up; प्रादुरासीत्तमोनुदः Ms. 1. 6; R. 11. 15. **–व्यति** (Atm. व्यतिहे, व्यतिसे; व्यतिस्ते) to excel, surpass, be above or superior to, out-weigh; अन्यो व्यतिस्ते तु ममापि धर्मः Bk. 2. 35. **–अस्** II. 4. P. (अस्यति, आस, आस्थत्, असितुम्, अस्त) **1** To throw, cast, hurl, discharge, shoot (with loc. of the mark); हस्ते बिभर्ष्यस्तवे Śvet. Up. 3. 6; तस्मिन्नास्थदिषीकास्त्रम् R. 12. 23; Bk. 15. 91, 14. 77; sometimes with dat. or gen. दस्यवे हेतिमस्य Rv. 1. 103. 3. **–2** To drive away, remove. **–3** To frighten or scare away. **–4** To throw or take away, let go, leave, give up; as in अस्तमान, अस्तशोक, अस्तकोप see अस्त. **–5** To fight with; युयोध बलिरिन्द्रेण तारकेण गुहोऽस्यत Bhāg. 8. 10. 28. –With अति to shoot beyond or at, overpower (with arrows); अत्यस्त having shot beyond, having surpassed or excelled; joined in acc. (Tat. comp.; P. II. 1. 24.) **–अभिप्र** to throw over or upon, hurl at. **–परिनि** to stretch. **–अस्** III. 1 U. (असति-ते, असित). **1** To go. **–2** To take or receive, seize. **–3** To shine (The examples usually cited to illustrate this sense are:– निष्प्रभश्च प्रभुरास भूभृताम् R. 11. 81; तेनास लोकः पितृमान् विनेत्रा 14. 23; लावण्य उत्पाद्य इवास यत्नः Ku. 1. 35. But the sense of दिदीपे or 'shone' is far-fetched, though Vāmana is disposed to take it. It seems preferable to regard आस in these instances as equivalent to बभूव, either taking it, as Śākaṭāyana does, as an indeclinable तिङन्तप्रतिरूपकमव्ययम्, or considering it, as Vallabha does, as an ungrammatical form used against the rules of grammar, प्रामादिकः प्रयोगः; see Malli. on Ku. 1. 35).

अस्त *p. p.* **1** Thrown, cast, given up, left; असमये यत्त्वयास्तोऽभिमानः Ve. 6. **–2** Finished. **–3** Despatched. **–स्ता** Ved. A missile, an arrow. **–Comp. –करुण** *a.* merciless; हा धिकष्टमनिष्टमस्तकरुणः कोऽयं विधेः प्रक्रमः Māl. 5. 24. **–कोप, –रुष्** *a.* whose anger is pacified; इति धियास्तरुषः परिरेभिरे Śi. 6. 65. **–धी** *a.* foolish. **–व्यस्त** *a.* scattered here and there, confused, disordered; Ratn. 4. 6. (v. l. अस्त्रव्यस्त) **–संख्य** *a.* innumerable; उज्झत्सु संहार इवास्तसंख्यम् Ki. 16. 16.

अस्तृ *a.* Ved. Throwing, a shooter.

अस्तः [अस्यन्ते सूर्यकिरणा यत्र अस्–आधारे क्त] **1** Setting, western mountain (behind which the Sun is supposed to set); यश्चैष विन्ध्यास्तमहेन्द्रकल्पो... अधिरोढुमस्तगिरिमभ्यपतत् Śi. 9. 1; विडम्बयत्यस्तनिमग्नसूर्यम् R. 16. 11; यात्येकतोऽस्तशिखरं पतिरोषधीनाम् Ś. 4. 2. **–2** Sunset. **–3** Setting in general; (fig.) fall, decline; see below. **–4** Conjunction of a planet with the Sun; शुक्रास्त, बुधास्त &c. **–स्तम् 1** Home, abode, residence (Ved.); तमग्निमस्ते वसवो न्यृण्वन् Rv. 7. 1. 2, 10. 34. 10. **–2** Death, end. आकाशं प्रत्यस्तं यन्ति Ch. Up. 1. 9. 1. **–3** The seventh house (in astr.; लग्नात्सप्तमं स्थानम्). **–स्तम्** *ind.* At home, home; अस्तं गम्,-या-इ-प्राप् (*a*) To set, decline in the western horizon; गतोऽस्तमर्कः the Sun has set; (fig.) it is time to do the duties to be performed at sunset; *e. g.* for a cowherd to drive home his cattle, for a religious person to begin his prayers, for a thief to begin his nightly work &c.; कथमिहैव युवयोरस्तमितः सूर्यः V. 3. and Sar. S. 1. (*b*) To cease, vanish, be removed, disappear, be at an end; विषयिणः कस्यापदोऽस्तं गताः Pt. 1. 146. धृतिरस्तमिता R. 8. 66; दण्डेनास्तमितात्विषा Ku. 2. 23; अस्तमितैषा कथा K. 156 at an end, over; 198, 204. (*c*) to die; अथ चास्तमिता त्वमात्मना R. 8. 51, 12. 11. **–Comp. –अचलः, –अद्रिः, –गिरिः, –पर्वतः** the setting or western mountain. अधिरोढुमस्तगिरिमभ्यपतत् Śi. 9. 1. **–अवलम्बनम्** the resting of a heavenly body on the western part of the horizon, being about to set. **–उदयौ** (dual) rising and setting, rise and fall; अस्तोदयावदिशदप्रविभिन्नकालम् Mu. 3. 17. **–ग** *a.* set, become invisible (as a planet or star). **–गमनम् 1** setting, disappearance. **–2** death, sunset of life; Māl. 9. **–निमग्न** *a.* Set (as the Sun); विडम्बयत्यस्तनिमग्नसूर्यम् R. 16. 11. **–मस्तकः, –शिखरः** The top of the setting mountain; Ś. 4. 2. **–समयः** The moment of Sunset, the moment of end or death; करजालमस्तसमयेऽपि सताम् Śi. 9. 5.

अस्तकः Final beatitude, absolution (मोक्ष). **–कम्** Ved. Home. आ पत्नीरिदमस्तकम् Av. 2. 26. 5. also cf. उदये सविता रक्तो रक्तश्चास्तमने तथा। Subhās.

अस्ततातिः Ved. Home.

अस्तमनम् Setting (of the Sun); रवेस्तमिस्त्रागमनिर्गमांस्ते तथोदयं चास्तमनं च वीराः Mb. 3. 164. 10.

अस्तमयः 1 Setting (of the Sun), करोत्यकालास्तमयं विवस्वतः Ki. 5. 35; (opp. उदय). **–2** Destruction, end, decline, loss; भाग्यास्तमयमिवाक्ष्णोः M. 2. 11. **–3** Fall, subjugation; उदयमस्तमयं च रघूद्वहात् R. 9. 9. **–4** Obscuring, eclipsing; प्रभाप्ररोहास्तमयं रजांसि R. 6. 33. **–5** Conjunction (of a planet) with the Sun.

अस्तनिके, अस्ता *ind.* Ved. at hand, near.

अस्ति *ind.* [अस्–शतिप्] **1** Being, existent, present; as in अस्तिक्षीरा, °कायः **–2** Often used at the commencement of a tale or narrative in the sense of 'so it is', 'there', or merely as an expletive; अस्ति सिंहः प्रतिवसति स्म Pt. 4; अस्त्यत्र नगरे... त्रयः पुरुषा देवस्य श्रियं न सहन्ते Mu.

1, 5; अस्ति पूर्वमहं व्योमचारी विद्याधरोऽभवम् Ks. 22. 56, 1. 27; अस्ति तत्रभवान् वृषलं याजयिष्यति P. III. 3. 146 is it that &c. **−स्तिः** *f*. N. of a sister of Prāpti, daughter of Jarāsandha and wife of Kaṁsa. **−Comp. −कायः** [अस्ति कायः स्वरूपं यस्य] a category or predicament (with the Jainas); these categories are 5; −जीव°, पुद्गल°, धर्म° अधर्म°, and आकाश°. **−क्षीर** *a*. [अस्ति क्षीरं यस्य P. II. 2. 24 Vārt.] having milk. **−नास्ति** *ind*. doubtful, partly true and partly not; °त्वम्, °ता doubtful or partial existence. **−°प्रवादः** N. of the fourth of the fourteen Pūrvas or older writings of the Jainas.

अस्तित्वम् Existence.

अस्तिमत् *a*. [आस्ति विद्यमानं धनमस्य] Possessed of property, wealthy.

अस्तु *ind*. (Strictly 3rd pers. sing. Imperative of अस्) Let it be, be it so, well, implying permission; it is also said to have the senses of pain, contest, jealousy, superiority, acceptance, praise, indication, and acceptance with envy.

अस्तुंकार *a*. [कारेसत्यागदस्य P. VI. 3. 70 Vārt. अस्तोश्चेति वक्तव्यम्] **1** Efficacious, working (as a medicine). **−2** Producing that which the physician promises shall be.

असंक्रान्तः An intercalary month (Hemādri's चतुर्वर्गचिन्तामणि).

असंयत *a*. **1** Unrestrained, not under control. **−2** Not tied, as in असंयतोऽपि मोक्षार्थी; °आत्मन् having the soul unrestrained. असंयतात्मना योगो दुष्प्राप इति मे मतिः Bg. 6. 36. **−तः** N. of Viṣṇu.

असंयमः Absence of control or restraint, especially of the senses; आपदां कथितः पन्थाः इन्द्रियाणामसंयमः Subh.

असंयाज्य *a*. One with whom no body is allowed to sacrifice; Ms.

असंयुक्त *a*. **1** Separated. **−2** Not conjunct (as a consonant). **−क्तम्** **1** Non-combination. **−2** (In gram.) Hiatus.

असंयुत *a*. Unblended, ununited. **−तः** An epithet of Viṣṇu.

असंयोगः **1** Absence of union or connection. **−2** Not a conjunct consonant; P. I. 2. 5.

असंरम्भः Fearlessness; Mb. 14. 38. 2.

असंरोधः Non-injury; Mb. 14.

असंविदान *a*. Ignorant, foolish; तौ हासंविदानावेव Ch. Up. 8. 7. 2; असंविदानेव जामात्रे कुप्यसि U. 7; Ki. 18. 42.

असंवीत *a*. Naked; उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार Bhāg. 5. 6. 7.

असंवृतः *a*. Uncovered, exposed; प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः Ki. 1. 30. **−तम्** N. of a hell.

असंवृत्तिः *f*. Non-completion.

असंव्यवहार्य *a*. With whom inter-course is forbidden.

असंव्यवहित *a*. Immediate, without any interval (of time or space).

असंशब्द्य *a*. Not worth mentioning; Mb. 3.

असंशय *a*. Free from doubt, certain मामेवैष्यस्यसंशयम् Bg. 8. 7; 18. 68. **−यम्** *ind*. Without doubt, undoubtedly, certainly, assuredly; असंशयं महाबाहो Bg. 6. 55; 7. 1. असंशयं क्षत्रपरिग्रहक्षमा Ś. 1. 22.

असंश्रव *a*. Out of hearing, inaudible; असंश्रवे out of the hearing of; असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् Ms. 2. 203.

असंश्लिष्ट *a*. Not joined or united. **−ष्टः** An epithet of Śiva.

असंसक्त *a*. **1** Unconnected, incoherent; दुहितुर्ब्रूह्यसंसक्तो माभूत्तत्र विचारणा Mb. 13. 4. 11. **−2** Unattached; अभिप्रेतमसंसक्तमात्मजं दातुमर्हसि Rām. 1. 19. 17.

असंसूक्तगिल *a*. Swallowing without chewing (as Rudra's dogs). रुद्रस्यैलबकारेभ्योऽसंसूक्तगिलेभ्यः । इदं महास्येभ्यः श्वभ्यो अकरं नमः Av. 11. 2. 30.

असंसृतिः *f*. Non-return to worldly existence, absorption into the Supreme Spirit. निवृत्तिमार्गः कथितः ब्रह्मणा यदसंसृतिः Bhāg. 6. 1. 1.

असंसृष्ट *a*. **1** Not mixed with, not connected. **−2** Not living in common, not reunited after partition of property (as an heir).

असंस्कारः **1** Non-consecration. **−2** Natural state, want of embellishment or care.

असंस्कृत *a*. **1** Unpolished, not refined or cleansed &c. **−2** Not decorated or adorned. **−3** One over whom no purificatory rite (any one of the saṁskāras) has been performed. **−तः** An ungrammatical form (अपशब्द).

असंस्तुत *a*. **1** Unknown, unacquainted, not familiar; असंस्तुत इव परित्यक्तो बान्धवो जनः K. 173, 308; Ki. 3. 2. **−2** Unusual, strange; असंस्तुतेषु प्रसभं भयेषु Ki. 3. 21. **−3** Not in harmony or agreement with; धावति पश्चादसंस्तुतं चेतः Ś. 1. 33.

असंस्थानम् **1** Absence of cohesion. **−2** Disorder, confusion. **−3** Want, destitution.

असंस्थित *a*. **1** Not arranged, disordered, irregular; असंस्थितमभूयिष्ठम् H. 3. 102. **−2** Not collected. **−3** Moving. **−4** Unaccomplished; ब्रह्मेवासंस्थितं हविः Av. 6. 50.2.

असंस्थितिः *f*. Disorder, confusion.

असंहत *a*. Not joined or united, scattered, loose, straggling. **−तः** The *Puruṣa* or soul (in Sāṅ. Phil.). **−तम्** A form of array, open order of troops.

असंहार्य *a.* 1 Irresistible, insuperable; उपस्थितमसंहार्यैर्हयैः Ram. 5. 6. 5; विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम Rām. 5. 37. 4. **−2** Not to be diverted or misled; Mb.

असकृत् *ind.* Not once, repeatedly, often and often; असकृदेकरथेन तरस्विना R. 9. 23; Me. 93. **−Comp. −समाधिः** repeated meditation. **−गर्भवासः** repeated birth. **−भवः** A tooth; Bṛi. S.

असकौ *a.* **1** = असौ this or that; पिबति च पाति च यासकौ रहस्त्वाम् Śi. 7. 53. **−2** This wicked one. cf. अव्ययसर्वनाम्नां अकच् प्राक्टेः P. V. 3. 71. भार्योढं तमवज्ञाय तस्थे सौमित्रयेऽसकौ Bk. 4. 15.

असक्त *a.* Not excessively attached, not feeling interested in, indifferent (to); असक्तः सुखमन्वभूत् R. 1.21. **−2** Not entangled; शाखासु वल्कलमसक्तमपि द्रुमाणाम् Ś. 2. 13. **−3** Not united, detached. **−4** Not attached to worldly feelings and connections. असक्तः स विशिष्यते Bg. 3. 7, 19. **−क्तम्** *ind.* **1** Without being excessively attached or addicted to; असक्तमाराधयतो यथायथम् Ki. 1. 11. **−2** Without any hindrance, quickly; Dk. 35. तस्य मर्ध्नि शितं खड्गमसक्तं पर्वतेष्वपि Mb. 3. 39. 52. **−3** Incessantly, ceaselessly असक्तमूधांसि पयः क्षरन्त्यम् Ki. 4. 31.

असक्तिः *f.* The being detached from worldly feelings or passions; असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु Bg. 13. 9.

असक्थ *a.* Thighless also असक्थिः (P. V. 4. 121.)

असक्र *a.* Ved. not ceasing to flow, not drying up; not going elsewhere (असंक्रमणी); धेनुं न इषं पिन्वतमसक्राम् Rv. 6. 63. 8.

असखिः An enemy, adversary.

असगोत्र *a.* Not belonging to the same *Gotra* or family; असगोत्रा च या पितुः Ms. 3. 5.

असंकरः **1** Non-mixture of caste. **−2** Absence of confusion.

असंकल्पित *a.* Not determined; असंकल्पितमेवेह यदकस्मात्-प्रवर्तते Rām. 2. 22. 24.

असंकसुक *a.* Not fickle, steady; Ms. 6. 43.

असंकुल *a.* Not crowded, open, clear, broad, (as a road &c.). **−लः** A broad road.

असंक्रान्त *a.* Not gone over or transmitted; °मासः an intercalary month.

असंख्य *a.* Beyond calculation, numberless, countless, innumerable; मन्वन्तराण्यसंख्यानि सर्गः संहार एव च Ms. 1. 80; 12. 15; °**ता, −त्वम्** infinity. प्रसह्य तेजोभिरसंख्यतां गतैः । Si.

असंख्यात *a.* Countless, innumerable. असंख्याता ओप्यमानाः सुवर्णाः Av. 12. 3. 28.

असंख्येय *a.* Innumerable. **−यः** **1** An epithet of Śiva. **−2** An epithet of Viṣṇu; V. Sahas. **−यम्** An exceedingly large number. असंख्येयं स्वमस्मिन् निविष्टम् Av. 1. 8. 24. **−Comp. −गुण** *a.* innumerable.

असंग *a.* **1** Not attached, free from worldly ties. **−2** Not hindered or obstructed, not blunted; असंगगतयः शीघ्रा हरिवीरा महाबलाः Rām. 5. 51. 14. असंगमद्रिष्वपि सारवत्तया R. 3. 63; **−3** Not united, solitary, unassailed. **−गः** **1** Non-attachment; अहिंसयेन्द्रियासंगैः (साधयन्तीह तत्पदम्) Ms. 6. 75. **−2** *Puruṣa* or soul (in Saṅ. Phil.) **−चारिन्** *a.* moving without obstacle. Rām. 5. °**वत्** *a.* not attached to. Rām. 3

असंगत *a.* **1** Ununited, unaccompanied with. **−2** improbable, inconsistent. **−3** Unequal. **−4** Unesteemed. **−5** Unbecoming, improper. **−6** Rude, ill-mannered, unpolished. **−7** unobstructed, not hindered; शक्तिं क्षिप्तामसंगताम् Rām. 6. 70. 134.

असंगतिः *f.* **1** Not associating with. **−2** Incongruity, improbability. **−3** (In Rhet.) A figure of speech in which a cause and tits effect are represented as locally different or separated (in which there is an apparent violation of the relation between cause and effect); भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः । युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसंगतिः ॥ K. P. 10; विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगतिः । विषं जलधरैः पीतं मूर्छिताः पथिकाङ्गनाः ॥ Kuval.

असंगम *a.* Not united. **−मः** **1** Separation, disunion. **−2** Incongruity.

असंगिन् *a.* **1** Not united or associated. **−2** Not attached to the world.

असचद्विष् *a.* Ved. **1** Persecuting those who are not (his) worshippers. **−2** Having no enemies.

असजात *a.* Ved. Not related by blood.

असजात्य *a.* Without consanguinity or blood-relationship.

असंज्ञ *a.* Insensible; करोत्यसंज्ञान् सङ्ग्रामे देवान्स वरुणानपि Rām. 6. 85. 18. **−ज्ञा** Disunion, disagreement, discord.

असत् *a.* **1** Not being or existing; तदभावे सदप्यसत् H. 3. 3; असति त्वयि Ku. 4. 12; Ms. 9. 154. **−2** Non-existent, unreal; आत्मनो ब्रह्मणोऽभेदमसन्तं कः करिष्यति. **−3** Bad (opp. सत्); सदसद्व्यक्तिहेतवः R. 1. 10. **−4** Wicked, vile, evil; °विचार. **−5** Not manifest. **−6** Wrong, improper, false, untrue; इति यदुक्तं तदसत् (oft. occurring in controversial works). **−7** Not answering its purpose. *m* (न्) Indra. *n.* (त्) **1** Non-existence, non-entity; नासदासीन्नो सदासीत् Rv. 10. 129. 1; असद्वा इदमग्र आसीत् ततो वै सदजायत Tait. Up. 2. 7. 1; नासतो विद्यते भावः Bg. 2. 16. Ms. 12. 118; 1. 11, 14, 74. **−2** An evil, a harm. **−3** Untruth, falsehood. **−ती** An unchaste woman; असती भवति सलज्जा Pt. 1. 418. **−Comp. −अध्येतृ** *m.* a Brāhmaṇa who reads heterodox works, one who neglects his own Śākhā and studies another; also called

शाखारण्डः; स्वशाखां यः परित्यज्य अन्यत्र कुरुते श्रमम्। शाखारण्डः स विज्ञेयो वर्जयेत्तं क्रियासु च॥ **−आगमः** 1 a heterodox Śāstra or doctrine. −2 acquisition (of wealth) by unfair or foul means. −3 a foul means itself. **−आचार** *a.* following evil practices, wicked. (**−रः**) an evil practice. **−आचारिन्** *a.* one who follows evil practices, wicked, vile. **−कर्मन्, −क्रिया** &c. See below. **−कल्पना** 1 an untrue action, one which never took place. −2 fabrication of falsehood. **−ख्यातिः** *f.* wrong or improper perception or knowledge; आत्मख्याति रसख्यातिरख्यातिः ख्यातिरन्यथा Sarva. S. **−ग्र (ग्रा) हः** 1 a bad trick. −2 a bad opinion, prejudice. मोहाद् गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः Bg. 16. 10. −3 childish desire. **−चेष्टितम्** harm, injury; प्राणिष्वसच्चेष्टितम् Ś. 5. 9. **−जनः** a bad, wicked, or contemptible man. **−दृश्** *a.* evil-eyed. **−पथः** 1 a bad road (lit.). −2 evil practices or doctrines; नाशो हन्त सतामसत्पथजुषामायुः समानां शतम् Bv. 4. 36. **−परिग्रहः** acceptance of unfit presents, receiving presents from improper persons; Ms. 12. 32. **−पुत्रः** 1 a chidless man; Ms. 9. 154. −2 a bad son or disreputable son. **−प्रतिग्रहः** 1 present of bad things; Ms. 11. 194. −2 receiving unfit presents (such as तिल) or from improper persons. **−भावः** 1 non-existence, absence. −2 a bad or wicked opinion. −3 an evil disposition. **−वादिन्** *a.* one who says that a matter (or idea) is non-existent, who negatives the existence or declares the non-existence of an idea or matter; असद्वादी हि विद्यमानमपि अनुपलभ्य ब्रूयात्। ŚB. on MS. 10. 8. 4. °त्वम् Being an असद्वादिन्; सद्वादित्वाच्च पाणिनेर्वचनं प्रमाणम्। असद्वादित्वान्न कात्यायनस्य। ŚB. on MS. 10. 8. 4. **−वृत्ति, −व्यवहार** *a.* following evil practices, wicked. (**−त्तिः** *f.*) 1 a low or degrading occupation. −2 wickedness, **−व्यवहार** *a.* following evil practices. (**−रः**) evil practice. **−शास्त्रम्** 1 a wrong doctrine. −2 a heterodox doctrine (such as that of the Bauddhas); Ms. 11. 65. **−संसर्गः** bad company. **−हेतुः** 1 a statement having exceptions (in न्याय). −2 a bad or fallacious *hetu*; See हेत्वाभास.

असतायी Wickedness.

असत्कृ 8 U. To disrespet, dishonour, not to receive hospitably.

असत्कर्मन् *a.* Of bad conduct, wicked. *n.* (**−र्म**) 1 A bad action (prohibited by the Vedas). −2 Wickedness.

असत्कारः, असत्क्रिया Disrepect, dishonour, bad or inhospitable reception.

असत्कृत *a.* 1 Not honoured, disrespected; यच्चावहासार्थमसत्कृतोऽसि Bg. 11. 42. −2 Done from improper motives. **−तम्** bad or wicked deed. असत्कृतमवज्ञातम् Bg. 17. 22.

असत्ता 1 Non-existence. −2 Untruth. −3 Wickedness, badness.

असत्त्व *a.* 1 Without energy or strength. −2 Having no animal. −3 Having no goodness. **−त्त्वम्** 1 Non-existence. −2 Unreality, untruth. −3 Wickedness, badness. −4 Duet. −5 Darkness.

असत्य *a.* 1 Untrue, false; पापासः सन्तो अनृता असत्याः Rv. 4. 5. 5; असत्यमप्रतिष्ठम् Bg. 16. 8. −2 Imaginary, unreal, असत्यकण्ठार्पितबाहुबन्धना Ku. 5. 27. −3 of uncertain result; असत्यानि च युद्धानि संशयो मे न रोचते Rām. 5. 30. 35. **−त्यः** A liar. **−त्यम्** Falsehood, untruth. **−Comp. −वादिन्** *a.* speaking falsely, liar. **−सन्ध** *a.* not true to one's promise, false, perfidious, treacherous; °धे जने सखी पदं कारिता Ś. 4. **−सन्निभ** *a.* improbable, unlikely.

असदृश *a.* (**−शी** *f.*) 1 Dissimilar, unlike. −2 Unfit, improper, incongruous; °व्यवहारिन् behaving improperly, H. 2; °संयोगकारिन् K. 12 unworthy; मातः किमप्यसदृशं विकृतं वचस्ते Ve. 5. 3. **− Comp. −उपमम्** (in rhetoric) A dissimilar simile.

असद्यस् *ind.* Not immediately, after delay.

असन् *n.* Blood (used only in the declension of असृज् after acc. pl.).

असनम् Throwing, discharging, casting; as in इष्वसनम् a bow. **−नः** N. of a tree (पीतसाल) Bridelia retusa (Mar. आसणा); Rām. 2. 94. 8; निरसनैरसनैरवृथार्थता Śi. 6. 47. **−ना** Ved. A missile, an arrow. **−Comp. −पर्णी** N. of a tree (सातल; Mar. गोकर्णी).

असनिः One who throws &c.

असन्तति, असन्तान *a.* Having no issue, childless. **−तिः, −नः** Childlessness, failure of issue.

असंतुष्ट *a.* Discontented, displeased; असंतुष्टा द्विजा नष्टाः

असंतोषः Displeasure.

असंदिग्ध *a.* 1 Not doubtful, distinct, certain, clear. −2 Not vanished. −3 Confident, unsuspected. **−ग्धम्** *ind.* Certainly, undoubtedly.

असंदित,−न *a.* Ved. Not restrained, free. असंदिनो विसृज विष्वगुल्काः Rv. 4. 4. 2; असंदितानां संदाता Ms. 8. 342.

असन्न *a.* Ved. Without rest or repose, untiring, restless.

असंधानम् 1 Want of aim or object. −2 Disjunction.

असंधि *a.* 1 Not joined together (as words). −2 Not bound or restrained, at liberty. **−धिः** 1 Absence of *Sandhi* or euphony. −2 Want of union, connection.

असंनद्ध *a.* 1 Unarmed. −2 Pretending to knowledge, conceited (पण्डितंमन्य). −3 Proud, arrogant. −4 Born or produced.

असंनिकर्षः 1 Non-perception of objects, not bringing them to the mind. −2 Remoteness.

असंनिकृष्ट *a.* 1 Unperceived. −2 Not near, remote.

असंनिधिः, –निधानम् 1 Absence, distance. –2 Confidence.

असंनिहित *a.* 1 Not near, distant. –2 Placed in a wrong manner.

असंनिवृत्तिः *f.* Non-return; असंनिवृत्त्यै तदतीतमेव Ś. 6. 10 gone never to return; परलोकमसंनिवृत्तये R. 8. 49.

असपत्न *a.* 1 Without a rival wife. –2 Not an enemy, friendly. –3 Without enemies, not attacked; इदं तदक्रि देवा असपत्ना किलाभुवम् Rv. 10. 159. 4; अवाप्य भूमावसपत्नमृद्धम् Bg. 2. 8. **–त्नम्** Undisturbed condition, peace. **–त्नी** A sort of brick (इष्टकाभेदः).

असपिण्ड *a.* Not connected by offerings of rice-balls; or not connected by blood-relationship.

असभ्य *a.* 1 Unfit for an assembly. –2 Vulgar, low, obscene, indecent (words &c.). अयं त्वसभ्यस्तव जन्मनो गृहे श्रुत्वाग्रजांस्ते न्यवधीत् सुरेश्वर Bhāg.

असम *a.* Uneven, odd (as a number); असमशीलाः खलु मृगाः Bv. 1. 2; mean, contemptible. –2 Unequal (in space, number or dignity); असमैः समीयमानः Pt. 1. 74. –3 Unequalled, matchless, unsurpassed; समवतारसमैरसमैस्तटैः Ki. 5. 7; वाद्यविशेषाणामसमः श्रोता K. 12; Ms. 10. 73. –4 Uneven, not level (as ground). **–मः** N. of Buddha. **–Comp. –इषुः, –बाणः, –सायकः** 'having an odd number of arrows', epithets of Cupid who has five arrows. **–नयन, –नेत्र, –लोचन** *a.* 'having an odd number of eyes', epithets of Śiva, who has three eyes. **–वृत्तम्** a metre in which the *gaṇas* are not the same in all lines.

असमग्र *a.* Incomplete; partial. **–ग्रम्** *ind.* Incompletely, not entirely; ततो निषङ्गादसमग्रमुद्धृतम् R. 3. 64.

असमञ्जस *a.* 1 Indistinct, unintelligible; स्खलदसमञ्जसमुग्धजल्पितं ते U. 4. 4; Māl. 10. 2 faltering, inarticulate and pretty prattle. –2 Unbecoming, improper; यद्यपि न कापि हानिर्द्राक्षामन्यस्य रासभे चरति। असमञ्जसमिति मत्वा तथापि तरलायते चेतः॥ Udb. –3 Absurd, nonsensical, foolish; कृतं किं वा सुपर्णस्य ते नैकेनासमञ्जसम् Bhāg. 10. 17. 7. **–सम्** Non-conformity, disparity, difference. *ind.* 1 Unbecomingly, improperly. –2 In a fluctuating or confused manner.

असमद् *f.* Ved. Non-conflict, harmony, concord.

असमद *a.* [सह मदेन गर्वेण समदः कलहः स नास्ति यत्र] Without a quarrel or opposition.

असमन *a.* 1 Of different colours or minds. –2 Going in different directions; असमना अजिरासो रघुष्यदः Rv. 1. 140. 4. –3 Uneven, unequal; असमने अध्वनि वृजिने पथि Rv. 6. 46. 13.

असमयः 1 Unseasonableness. –2 Unfit or unfavourable time; असमये मतिरुन्मिषति ध्रुवम् N. 4. 57.

असमर्थ *a.* 1 Not able or competent; अभ्यासेऽप्यसमर्थोऽसि Bg. 12. 10. –2 Weak, feeble. –3 (In Rhet.) Powerless to convey the intended meaning, a defect of a word; यत्तदर्थं पठ्यते न च तत्रास्य शक्तिः तदसमर्थत्वम् K.P.7; *e. g.* in कुञ्जं हन्ति कृशोदरी; हन्, though read in root-books in the sense of 'going', is here powerless to convey that meaning. **–Comp. –समासः** a compound in which the conjunction of words is not as it should be; *e. g.* in अश्राद्धभोजिन्, असूर्यपश्य, अ goes not with श्राद्ध or सूर्य but with भोजिन् or पश्य; Mbh. on P. I. 1. 43.

असमवायिन् *a.* Not intimate or inherent, accidental, separable. **–Comp. –कारणम** (In logic) an accidental cause, not inherent and intimate relation; गुणकर्ममात्रवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वम् Bhāṣā. P.; यथा तन्तुसंयोगः पटस्य.

आपत् 1 P. **1** To fall upon, attack, assail; उदायुधानापततः R. 12. 44, 5. 50; Bk. 3. 48. **-2** To approach, come towards K. 202; एतत् प्रायेण श्रुतिविषयमापतितमेव K. 136 has reached the ears; 268. **-3** To fly towards, come in flying, come or drive in haste, rush upon; अपि नाश्वश्रमः शीघ्रं रथेनापततस्तव Rām. 2. 72. 5 **-4** (*a*) To happen, take place, occur, come to pass; कथमिदमापतितम् U. 2; K. 262, 158; अहो न शोभनमापतितम् Pt. 2. (*b*) To fall to one's lot or share, befall; अहोऽस्माकं महद्भोजनमापतितम् Pt. 1; आपतन्ति हि संसारपथमवतीर्णानामेते वृत्तान्ताः K. 175, 132; सर्वस्यैव स्खलितमापतति 291; H. 1. 28, 168. **-5** (*a*) To occur to, cross (the mind); इति हृदये नापतितम् K. 288 (*b*) To be felt or regarded; मधुरतराण्यापतन्ति मनसः K. 103 are felt or regarded; 202, 236, 329. *-Caus.* (पातयति) To go towards, approach (Ved.).

आपतनम् 1 Approaching, coming, assailing &c. **-2** Happening, occurrence. **-3** Descending, alighting. **-4** Obtaining. **-5** Knowledge; क्वचित् प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनम् S. D. 10. **-6** Natural sequence, necessarily *following*.

आपति *a.* Ved. Coming in haste, rushing on. **-तिः** The wind (always blowing) (सततगतिर्वायुः).

आपतिक *a.* (**-की** *f.*) Accidental, unforeseen, sent from heaven. **-कः** A hawk, falcon.

आपतित *a.* 1 Fallen to the lot of. **-2** Happened, befallen, occurred, come to pass. **-3** Alighted, descended.

आपात *a.* Rushing upon, attacking. **-तः 1** Rushing or falling upon, attack, descending, alighting; तदापातभयात्पथि Ku. 2. 45; गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः R. 12. 76. -2 Throwing down. **-3** Causing to descend or fall, falling down; धारापातैः Me. 50. **-4** (*a*) The present or current moment, the instant; आपातरम्या विषयाः पर्यन्तपरितापिनः Ki. 11. 12; आपातसुरसे भोगे निमग्नाः किं न कुर्वते S. D; आपातरमणीयानां संयोगानां प्रियैः सह। अपथ्यानामिवान्नानां परिणामोऽतिदारुणः॥ H. 4. 75; Bv. 1. 115; Māl. 5. (*b*) (Hence) First sight or appearance; see आपाततः. **-5** Happening, becoming apparent, appearance. **-6** Assault, a method of catching elephants (Mātaṅga L. 10. 1. 13). **-7** Hell (नरक) आपातान्प्रतितिष्ठन्ति पुलिन्दशबरा इव Mb. 12. 151. 8. **-Comp. -दुःसह** *a.* unbearable at the first attack; U. 7. **-दुष्प्रसह** *a.* unbearable in its onset, making a furious charge; आपातदुष्प्रसहमाविरभूदनीकम् M. 5. 10. **-मात्र** *a.* Being only momentary.

आपाततः *ind.* At the first sight or attack, instantly, immediately; S. D. 632.

आपातिन् *a.* Falling on, attacking, descending, happening.

आपात्य *a.* Rushing on, approaching to attack; आपात्यसैनिकनिराकरणाकुलेन Śi. 5. 15.

आपत्य *a.* (**-त्यी** *f.*) [अपत्य-अण्] **1** Relating to offspring. **-2** (In gram.) Relating to the formation of patronymic words; आपत्यस्य च तद्धितेऽनाति P. VI. 4. 151.

आपथि *a.* Ved. Being on the way or journey. **-थिः, थीः, -थ्यः** Ved. A wanderer, traveller, आपथयो विपथयोऽन्तस्पथा अनुपथाः Rv. 5. 52. 10.

आपद् 4 Ā. **1** To go near, walk towards, approach; एष रावणिरापादि वानराणां भयंकरः Bk. 15. 89. **-2** To enter into, go to, attain to (a place, state &c.); वक्त्रमापद्य मारुतः Śik. 9; निर्वेदमापद्यते becomes disgusted Mk. 1. 14; आपेदिरेऽम्बरपथम् Bv. 1. 17; क्षीरं दधिभावमापद्यते Ś. B. milk turns into curds; पाण्डुरतामापद्यमानस्य K. 69 becoming pale; 160; विस्मयमापेदे 179; श्लोकत्वमापद्यत यस्य शोकः R. 14. 70 assumed the form of a verse; चिन्तामापेदे Dk. 130 fell a-thinking; so विश्वासम्, निर्वृतिम्, संशयम्, वशम्, पञ्चत्वम् &c. पुनः पुनर्वशमापद्यते मे Kaṭh. 1. 2. 6. **-3** To get into trouble, fall into misfortune; अर्थधर्मौ परित्यज यः काममनुवर्तते। एवमापद्यते क्षिप्रं राजा दशरथो यथा॥ Rām.; see आपन्न below. **-4** To happen, occur; जिघत्सोर्नूनमापादि ध्वंसोऽयं तां निशाचरात् Bk. 6. 31; एवमापद्यते M. 1 so it is. *-Caus.* **1** To bring about, bring to pass, accomplish, effect; कुजद्भिरापादितवंशकृत्यम् R. 2. 12; Śānti.

3. 19. **–2** To lead or reduce to, cause to suffer; आपाद्यते न व्ययमन्तरायैः R. 5. 5. **–3** To cause, to produce, bring on; लघिमानमापादयति K. 105, 109; दोषमपि गुणत्वमापादयति makes the best of a bad matter. **–4** To reach or attain to. **–5** To spread, circulate (as news). **–6** To turn or change into; एकामपि काकिणीं कार्षापणलक्षमापादयेम Dk. 156.

आपत्तिः *f.* [आ-पद्-क्तिन्] **1** Turning or changing into, entering into any state or condition. **–2** Obtaining, procuring, getting; स्थानापत्तेर्द्रव्येषु धर्मलाभः Katy. **–3** Misfortune, calamity, adversity ; Y. 3. 42. **–4** A fault, transgression. **–5** Remonstrance, expostulation. –6 (In phil.) An undesirable conclusion or occurrence (अनिष्टप्रसङ्ग).

आपद् *f.* [आ-पद्-क्विप्] A calamity, misfortune, danger, distress, adversity; दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् R. 1. 60; अविवेकः परमापदां पदम् Ki. 2. 30, 14; प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः Bh. 2. 90; **आपदि स्था, आपदं प्राप्** to fall into difficulty. **–Comp.–कल्पः** an alternative to be used in times of difficulty; **–कालः** days of adversity, time of distress, hour of danger; अब्राह्मणादध्ययनमापत्काले विधीयते Ms. 2. 241, 11. 28. **–कालिक** *a.* (**का, –की** *f.*) occurring in time of difficulty. **–गत, –ग्रस्त, –प्राप्त 1** fallen into misfortune, involved in difficulties. **–2** unfortunate, unhappy, distressed. **–धर्मः** [आपदि कर्तव्यो धर्मः] a practice, profession, or course of procedure, not usually proper for a caste, but allowable in timess of extreme distress or calamity; Ms. 1. 116, एते चतुर्णां वर्णानामापद्धर्माः प्रकीर्तिताः 10. 130. (**–मम्**) **1** N. of a पर्व in Bhārata. **–2** A series of calamities; पीडा चापद्कालश्च Mb. 12. 59. 47.

आपच्चिक *a.* One who crosses over the difficulties.

आपदा *f.* Misfortune, calamity.

आपन्न *p. p.* **1** Gained, obtained, acquired; जीविकापन्नः for आपन्नजीविकः Sk. **–2** Gone or reduced to, fallen into; कष्टां दशामापन्नोऽपि Bh. 2. 29; so दुःख°. **–3** Afflicted, distressed, being in difficulty; आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः Ś. 2. 17; Me. 55; H. 4. 106; V. 2. **–4** Befallen; परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः H. 128. **–Comp. –सत्त्वा** pregnant, quick or big with child; a pregnant woman; सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः R. 10. 59.

आपादः [आ-पद्-घञ्] **1** Attainment, obtaining. **–2** Reward, remuneration.

आपादनम् **1** Causing to arrive at, leading or contributing to, bringing about; tending to; द्रव्यस्य संख्यान्तरापादने Sk.

आपदेवः **1** N. of the god Varuṇa. **–2** N. of the author of मीमांसान्यायप्रकाश.

आपनिकः [आ-पन्-इकन् Uṇ. 2. 46] **1** An emerald, sapphire. **–2** A *Kirāta* or barbarian.

आपमित्यक *a.* [अपमित्य परिवर्त्य निर्वृत्तम् कक्] Received by barter or exchange. **–कम्** Property or anything obtained by barter or for a consideration.

आपया [आपेन जलपूरेण याति या-क] N. of a river near the Sarasvatī; दृषद्वत्या मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि Rv. 3. 23. 4.

आपरपक्षीय *a.* Belonging to the second half (of a month); कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः (श्राद्धं पित्रोः) Bhāg. 7. 14. 19.

आपराह्णिक *a.* (**–की** *f.*) Being in the afternoon, श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्.

आपर्तुक *a.* (**–की** *f.*) Not restricted to particular times or seasons.

आपवः An epithet of Vasiṣṭha; तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः Mb. 1. 98. 23.

आपवर्ग्य *a.* Conferring final beatitude; मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः Bhāg. 7. 9. 46; 10. 49. 12.

आपस् *n.* [आप्-असुन्] Water; आपोभिर्मार्जनं कृत्वा. **–2** Sin. **–3** A religious ceremony.

आपस्करः (see अपस्करः).

आपस्कारम् The root or extremity of the trunk or body; आपस्काराल्लूनगात्रस्य भूमिम् Śi. 18. 46.

आपा 1 P. **1** To drink up (lit. and fig.); षडाननापीतपयोधरासु R. 14. 22; आपीतसूर्यं नभः Mk. 5. 20 quite concealed or obscured; दिवाकरापीतरसा महौषधीः Mb. **–2** To drink with the ears or eyes, hear or see intently; ता राघवं दृष्टिभिरापिबन्त्यः R. 7. 12; K. 86; भगवत्कथासुधामापीय कर्णाञ्जलिभिः Bhāg. **–3** To eclipse, surpass.

आपानम्, –नकम् **1** A drinking party, banquet; Mk. 8; आपाने पानकलिता दैवेनाभिप्रचोदिताः Mb. **–Comp. –उत्सवः** Drinking festival. ... समन्ताद् आपानोत्सवमनुभवन्तीव मधुपाः। Nāg. 3. 8. **–2** A tavern, liquor-shop, a place for drinking in company (°भूमि); आपाने पानकलिता दैवेनाभिप्रचोदिताः Mb. 1. 2. 355; ताम्बूलीनां दलैस्तत्र रचितापानभूमयः R. 4. 42; Ku. 6. 42; आपानकमुत्सवः K. 32.

आपायिन् *a.* Drinking, fond of drinking.

आपाकः [समन्तात् परिवेष्टय पच्यतेऽत्र] A baking oven, a potter's kiln.

आपाङ्ग्यम् [अपाङ्गे देयं ष्यञ्] To be used for anointing the corners of the eyes (as अञ्जन).

आपालिः A louse.

आपिञ्जर *a.* Somewhat red, reddish; मञ्जर्युदारा शुशुभेऽर्जुनस्य आपिञ्जराबद्धरजःकणत्वात् R. 16. 51. **–रम्** Gold.

आपिशर्वर *a.* Nightly, nocturnal. Yaj. Ts.

आपिशलिः N. of an old grammarian; वासुप्यापिशलेः P. VI. 1. 92.

आपिशल *a.* Originating from आपिशलि. **–लः** A pupil of आपिशलि. **–ला** A female pupil; आपिशलमधीते आपिशला ब्राह्मणी Mbh. on P. IV. 1. 14.

आपी, आपीन See आप्यै.

आपीड् 10 P. **1** To press, weigh down; पयोधरभारेणापीडितः Gīt. 12; भुजाभ्यां तमापीड्य clasping him to the bosom. **–2** To press hard, afflict, perplex, worry. **–3** To compress.

आपीड *a.* **1** Giving pain, hurting. **–2** Squeezing, compressing. **–3** A chaplet (tied on the crown of the head), garland in general; ते हयाः काञ्चनापीडा रुक्मभाण्डपरिच्छदाः Mb. 6. 89. 32; चूडापीडकपालसंकुलगलन्मन्दाकिनीवारयः Māl. 1. 2. **–4** (Hence fig.) A crest-jewel; तस्मिन्कुलापीडनिभे विपीडम् R. 18. 29; Māl. 1, 6, 7. **–5** A stream; अभवच्छोणितोद्गारी सापीड इव पर्वतः Rām. 4. 16. 22.

आपीडनम् **1** Compressing, squeezing; tying tightly. **–2** Embracing, clasping. **–3** Giving pain, hurting.

आपीडित *p. p.* **1** Compressed, bound tightly; embraced &c. **–2** Decorated with chaplets.

आपीत *a.* **1** Yellowish. **–2** Drunk or sipped a little (as water). **–तः** **1** Yellowish colour. **–2** N. of a plant (Mar. नांदुरकी). **–तम्** **1** A pyritic mineral (माक्षिकधातु). **–2** Filament of the lotus.

आपूपिक *a.* (**–की** *f.*) [अपूप-ठक्] **1** A good maker of अपूप (cakes). **–2** Accustomed to eat cakes. **–3** Fond of cakes, eating cakes (with benefit). **–4** Selling cakes. **–5** Baking cakes. **–6** Forming an ingredient of cakes, good for cakes (as गुड). **–कः** A baker; confectioner. **–कम्** A multitude of cakes (अपूपानां समूहः).

आपूप्यः [अपूपाय साधुः बाहु॰ य] Flour.

आपूषम् A kind of metal (perhaps tin).

आपृच् 7 U. **1** To fill, pervade, occupy completely; वस्वो वीरस्यापृचः Rv. 8. 40. 9. **–2** To mix or blend with. **–3** (Ā.) To satiate oneself; दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि Rv. 1. 129. 7.

आपृच् *a.* [पृच्-क्विप्] Connected, blended. *-ind.* In a mixed manner, confusedly.

आपॄ 9 U. or *Caus.* **1** To fill; अमी जलापूरितसूत्रमार्गाः R. 16. 65; तेजोभिरापूर्य जगत्समग्रम् Bg. 11. 30; Bk. 6. 118; (fig.) to make full, complete, to fulfil (wishes); भृत्यैरापूर्यते नृपः H. 2. 73. *–pass.* To be filled, to be filled with wind, be blown (as a conch); आपूर्यमाणानां स्नानशङ्खानाम् K. 16.

आपूर *a.* Becoming full. **–रः** **1** Flow, current, large flood, quantity; स्वेदापूरो युवतिसरितां व्याप गण्डस्थलानि Śi. 7. 74; हर्षभरापूरपीडनोत्फुल्लया दृशा Ks. 23. 71. **–2** Filling, making full; मन्दानिलापूरकृतं दधानो Śi. 3. 21.

आपूरण *a.* Becoming full. **–णम्** Filling, making full; गर्त° कृतम् Pt. 1.

आपूर्ण *p. p.* Filled &c; आपूर्णश्च कलाभिरिन्दुरमलः Māl. 9. 39.

आपूर्तिः *f.* **1** Filling. **–2** Fulness, satisfaction, satiety.

आपूर्यमाण *a.* Becoming full, being filled; आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् Bg. 2. 70; °पक्षः the crescent or waxing moon; आपूर्यमाणपक्षस्य पुण्याहे Bṛi. Up. 6. 3. 1.

आपेक्षिक *a.* (**–की** *f.*) [अपेक्षा-ठक्] Raising expectations.

आपोक्लिमम् N. of the 3rd, 6th, 9th, or 12th position (in Astrol.); तृतीयं षष्ठनवममन्त्यं चापोक्लिमं विदुः; also केन्द्रात् परं पणफरं पूर्वमापोक्लिमं मतम्. [cf. Gr. *apoklima*].

आपोमय *a.* (**–यी** *f.*) [आपस्–विकारे प्राचुर्ये वा मयट्] Consisting of water; आपोमयः प्राणः Ch. Up. 6. 5. 4.

आपोमात्रा The subtle elementary principle of water; आपश्चापोमात्रा च Praśna. Up. 4. 8.

आपोशानः N. of a kind of prayer or formula repeated before and after eating (the formulas being respectively अमृतोपस्तरणमसि स्वाहा and अमृतापिधानमसि स्वाहा); आपोशानक्रियापूर्वं सत्कृतान्नमकुत्सयन् Y. 1. 31, 106. **–नम्** The act of making an उपस्तरण (seat) and अपिधान (covering) for the food eaten.

आप्त, आप्य see आप्.

आप्तोर्यामः A kind of यज्ञ in the सप्तसोमसंस्था.

आप्त्यः Ved. N. of a class of deities, especially of the deity Trita as belonging to that class.

आप्यै 1 A. **1** To grow fat, stout, or full, become full, increase; आहुत्याप्यायते सूर्यः Y. 3. 71. **–2** To make full, strengthen, enlarge. *–Caus.* (प्याययति) **1** To make fat, full, or comfortable, increase, enlarge; तेजसा तव तेजश्च विष्णुराप्याययिष्यति Mb.; सैव कान्तिर्मन्मथाप्यायिता द्युतिः S. D.; वायुभिराप्यायितशरीरः Pt. 1; Me. 44; क्षयी चाप्यायतिः सोमः Ms. 9. 314. **–2** To gratify, regale, satisfy, please; आप्यायितो वचनामृतेन H. 1; K. 124; Mv. 1, 2.

आपी *a.* Fat, stout. **–पीः** *f.* The 20th Nakṣatra or lunar mansion.

आपीन *p. p.* [प्यै-क्त] Stout, fat, strong. **–नः** A well; आपीनोऽन्धुः Mbh. on P. VI. 1. 28. **–नम्** An udder, teat; आपीनभारोद्वहनप्रयत्नात् R. 2. 18.

आप्यान *p. p.* **1** Fat, stout, robust, strong; आप्यानश्चन्द्रमाः Mbh. on P. VI. 1. 28. आप्यानस्कन्धकण्ठांऽसम् Bk. 5. 56, 9. 2. **–2** Pleased, satisfied. **–नम्** **1** Love. **–2** Growth, increase.

आप्यायः Becoming full or fat.

आप्यायन *a.* Causing fulness or stoutness, promoting welfare. **–नम्, –ना** [प्याय्-ल्युट्] **1** The act of making full or fat; क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम् Bhag.

3. 26. 43. −2 Satisfying, refreshing, pleasing. −3 Satisfaction, satiety ; देवस्याप्यायना भवति Pt. 1. Ms. 3. 211. −4 Advancing, promoting. −5 Corpulency, growing fat or stout. −6 Anything which causes corpulency or good condition. −7 A strengthening medicine. −8 Pouring water on Soma and thus causing it to swell. **−Comp.** **−शील** *a.* satisfying.

आप्यायित *a.* 1 Satisfied, pleased. −2 Improved ; grown, increased. −3 Stout, fat, robust.

आप्याय्य *a.* To be satisfied or pleased.

आप्र *a.* Ved. [आ-पृ-मूल° क] 1 Filling. −2 Able to reach (Sāy.). −3 Busy, zealous.

आप्रच्छ् 6 Ā. 1 To bid adieu, bid farewell ; आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम् Me. 12 ; R. 8. 49, 12. 103 ; Māl. 7 ; Bk. 14. 63. −2 To salute on receiving, but particularly parting with a visitor (साधो यामि इति वचनम्) −3 To ask. −4 To extol. Irregularly it is used in Parasmaipada also ; cf. आपृच्छ पुत्रकृतकान् हरिणान् द्रुमांश्च Pratimā. 5. 11.

आपृच्छा [प्रच्छ्-अङ्] 1 Conversation. −2 Bidding farewell. −3 Curiosity.

आपृच्छ्य *pot. p.* 1 To be saluted, welcomed or honoured.−2 Praiseworthy, commendable.−3 Beautiful.

आपृष्ट *a.* 1 Welcomed, saluted. −2 Asked for. नापृष्टः कस्यचिद् ब्रूयात् Mb.

आप्रच्छनम् 1 Bidding adieu, taking leave at the time of departure. −2 Welcoming, hailing.

आप्रच्छन्न *a.* Secret, hidden.

आप्रदिवम् *ind.* Forever.

आप्रपदम् [प्रपदं पदाग्रं तत्पर्यन्तं अव्ययी°] A dress reaching to the feet. −*ind.* To the end of the foot, reaching to the feet.

आप्रपदीन *a.* [आप्रपदं व्याप्नोति ख] Reaching to the feet (as dress) ; भाति स्म दामाप्रपदीनमस्य Śi. 3. 10 ; K. 130 ; (आप्रपदीनकम् also).

आप्रवण *a.* Slightly humble or precipitous.

आप्री *f.* [आप्रीणात्यनया आ-प्री-ड-गौरा° ङीष्] Ved. 1 Conciliation, propitiation, gaining one's favour. −2 (pl.) ' Propitiatory verses ', a name given to certain invocations addressed to several deified objects in consecutive order, and said to be introductory to the animal sacrifice ; some take the *Apris* to represent the objects themselves, the verses being consequently callsd *Apri* verses. The objects invoked are 12:− Susamiddha, Tanūnapāt, Narāśaṁsa, the divine being bearing invocations to the gods, Barhis, the doors of the sacrificial chamber, night and dawn the two divine beings protecting the sacrifice, the three goddesses Ilā, Sarasvatī, and Mahī, Tvaṣṭṛi, Vanaspati and Svāhā, (all these being regarded by Sāyaṇa to be different forms of Agni) ; स एता आप्रीरपश्यत्ताभिर्वै स मुखत आत्मानमाप्रीणीत ; cf. also Max Muller's Hist. Anc. Lit. pp. 463-466.

आप्रीतपः, −पाः N. of Viṣṇu (protecting those who have appeased his anger).

आप्लु 1 Ā. 1 To jump up, dance, spring ; आप्लुत्य पदान्यष्टौ Mb. ; (रथं) आपुप्लुवे सिंह इवाचलाग्रम्. −2 To bathe, wash, immerse oneself (fig. also) ; प्रयागे आप्लुत्य गात्राणि Mb. ; आप्लुत्याकाशगङ्गायाम् *ibid* ; Ms. 7. 216, 11. 202. −*Caus.* (प्लावयति) 1 To cause to be washed or bathed ; आप्लावयत गात्राणि Mb. −2 To wash, wet, sprinkle ; अन्नमाप्लाव्य वारिणा Ms. 3. 244, 11. 98. −3 To overflow, overwhelm, inundate, flood over. −4 To set in commotion. −5 (Ātm.) To bathe.

आप्लवः, −प्लवनम् 1 Bathing, immersing. −2 Sprinkling with water (on all sides). **−Comp.** **−व्रतिन्** or **आप्लुतव्रतिन्** *m.* a house-holder who has passed through the first order (ब्रह्मचर्य) and is admitted into the second (गार्हस्थ्य), an initiated householder ; cf. स्नातक.

आप्लावः 1 Bathing, immersing, −2 Sprinkling, wetting. −3 Submerging. −4 A flood, an inundation; प्रलयाप्लावमिवाभिदर्शयन्तः Śi. 20. 70.

आप्लुत *p. p.* 1 Bathed ; अवभृथाप्लुतो मुनिः R. 11. 31 ; Ku. 6. 5. ततः समुत्सुकोऽभ्येत्य नृपतिर्द्रुतमाप्लुतः Śiva. B. 1. 79. −2 Wetted, sprinkled ; यावन्नाश्यायते वेदिरभिषेकजलाप्लुता R. 17. 37. −3 Overflowing with, filled or overcome with ; बाष्प°, व्यसन°, रुधिर° &c. −4 Possessed by, eclipsed ; अवाङ्मुखमथो दीनं दृष्ट्वा सोममिवाप्लुतम् Rām. 7. 106. 1. **−तः,** °व्रती An initiated house-holder, see आप्लवव्रतिन्. **−तम्** Bathing.

आप्लुष्ट *a.* A little singed or burnt ; दिवाकराप्लुष्टविभूषणास्पदाम् Ku. 5. 48.

आप्वन् *m.* [आप्-वन् Uṇ. 1. 152] Wind, air (आप्वः according to Ujjval.).

आप्वा The neck.

आफलकः Enclosure, palisade ; वार्याफलकपर्यन्तां पिबन्निक्षुमतीं नदीम् Rām. 1. 70. 3.

आफीनम् An Opium.

आफूकम् Opium.

आबन्ध् 9 P. 1 To bind, fasten, tie on, place, fix ; क समाधानमाबध्नातु अवष्टम्भः K. 290 ; न क्वचिन्निर्भरमाबध्नाति पदम् 104 places ; तेऽपि पोषिताः पोषितरि स्नेहमाबध्नान्ति 289. −2 To make, form ; **आबद्धाञ्जलिः,** see आबद्ध below. −3 To hold fast, cling to.

आबद्ध *p. p.* 1 Bound, tied. −2 Fixed ; स्यन्दनाबद्धदृष्टिषु R. 1. 40. −3 Formed, made ; आबद्धमण्डला तापसपरिषद्

K. 49 sitting in a circle; आबद्धरेखमभितो रविमञ्जरीभिः Gīt. 11; Bk. 3. 30; Ki. 5. 33. **-4** Obtained. **-5** Hindered, **-द्धम्** (**द्धः** also) **1** Binding, joining. **-2** A yoke. **-3** Ornament; Sāṅ. Gṛi. Sūtras 2. 1. 25. **-4** Affection. **-Comp. -मण्डल** *a.* Forming a circle, sitting in a circle. **-माल** *a.* forming a wreath, arranged in a row; गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः Me. 9.

आबधः Ved. Binding.

आबन्धः, -धनम् **1** A tie or bond (fig. also); प्रेमाबन्धविवर्धित Ratn. 3. 18; गते प्रेमाबन्धे प्रणयबहुमाने विगलिते। Amaru. 43. **-2** The tie of a yoke, or that which fastens the ox to the yoke, or the yoke to the plough. **-3** Ornament, decoration. **-4** Affection.

आबन्धुर *a.* A little deep.

आबर्ह (also **आवर्हित**) *a.* Having the power of tearing or pulling out. **-र्हः, -र्हणम्** [-आ-बर्ह्- हिंसायां घञ् ल्युट् वा] **1** Tearing or pulling out. **-2** Killing.

आबर्हिन् *a.* [आबर्ह्-इनि] Fit for tearing out; मूलमस्याबर्हि P. IV. 4. 88.

आबल्यम् [अबलस्य भावः] Weakness.

आबाध् 1 Ā. **1** To check, rein in, restrain. **-2** To interrupt, obstruct. **-3** To annoy, harass, attack, molest, injure. **-4** To set forth or declare wrongly.

आबाधः **1** Affliction, injury, trouble, molestation, damage; न प्राणाबाधमाचरेत् Ms. 4. 54, 51. **-2** Interruption, hinderance; दर्शनीयं निराबाधं कुम्भकर्णस्य चक्रिरे Rām. 7. 13. 4. **-3** Attack (Ved). **-धा** **1** Pain, distress. **-2** Mental agony or anguish. **-3** Segment of the base of a triangle.

आबालम् *ind.* **1** Down to or including children; **-2** Beginning with infants.

आबाल्यम् Age ending with childhood. See above. आबाल्याद्द्विप्रवर्गैः स्ववदनविवरे धारिता वैरिणी मे Subhāṣ.

आबिल *a.* **1** Turbid, dirty (= आविल q. v.). **-2** Clearing, breaking. **-3** Confounded, embarrassed.

आबुत्त = आवुत्त q. v.

आबुध् 1 P. To perceive, notice, understand (Ved.); Rv. 7. 22. 3.

आबुध्यम् Want of discernment, foolishness.

आबोधनम् **1** Knowledge, understanding. **-2** Instructing, informing.

आब्द *n.* (**-ब्दी** *f.*) [अब्द-अण्] Belonging to, or produced from, a cloud.

आब्दिक *a.* (**-की** *f.*) [अब्द-ठक्] Annual, yearly; आब्दिकः करः Ms. 7. 129, 3. 1.

आब्रह्म *ind.* Up to or including ब्रह्मन्; यशोभिराब्रह्मसमं प्रकाशः R. 18. 28.

आभगः Ved. A partner (of anything); to be shared in (Sāy.); देवो देवेष्वाभगः Rv. 1. 136. 4; कर्मन्कर्मन्नाभगमग्निमीडे Av. 4. 23. 3.

आभङ्गम् A pose in which the idol is slightly bent. आभङ्ग-समभङ्गं चातिभङ्गं त्रिधा भवेत् Mānasāra. 67. 95. 96. ग्रीवाभङ्गाभिरामम् Ś. 1. 7.

आभङ्गिन् *a.* A little curved.

आभरणम् See under आभृ.

आभा 2 P. **1** To shine, blaze; सुतरां रत्नमाभाति चामीकरनियोजितम् Subhāṣ; R. 3. 33. **-2** To appear, look like; आभासि तीर्थप्रतिपादितर्द्धिः R. 5. 15, 70, 13. 14; Bk. 7. 8, 66. **-3** To outshine.

आभा [भा-अङ्] **1** Light, splendour, lustre; तत्र ताराधिपस्याभा ताराणां भा तथैव च। तयोराभरणाभा च ज्वलिता द्यामभासयत्॥ Rām. 6. 75. 51 दीपाभां शलभा यथा Pt. 4. **-2** Colour, appearance, beauty; प्रशान्तमिव शुद्धाभम् Ms. 12. 27. **-3** Likeness, resemblance; oft. at the end of comp. in these two senses; रुक्माभम् appearing or shining like gold; यमदूताभम् Pt. 1. 58; मरुत्सखाभम् R. 2. 10. **-4** A reflected image, shadow, reflection.

आभात *a.* **1** Shining, blazing. **-2** Appearing, visible.

आभातिः *f.* [आ-भा-क्तिच्] **1** Reflection. **-6** Splendour, light.

आभाणकः A popular saying, proverb; तथा च लौकिकानामाभाणकः as the proverb goes.

आभाष् 1 Ā. **1** To address, speak to, converse with; वैशम्पायनश्चन्द्रापीडमाबभाषे K. 117; कुरुते नालापमाभाषिता Nāg. 4. **-2** To say or speak (something) (with two acc.); आभाषि रामेण वचः कनीयान् Bk. 3. 51. **-3** To say or speak; सखी वेत्रभृदाबभाषे R. 6. 82, 14. 44. **-4** To name **-5** To talk aloud, shout.

आभाषः [भाष्-घञ्] **1** Addressing. **-2** An introduction, preface. **-3** Speech, talk. **-4** A saying, proverb.

आभाषणम् **1** Addressing, speaking to (संबोधन). **-2** Conversation; सम्बन्धमाभाषणपूर्वमाहुः R. 2. 58.

आभाष्य *pot. p.* To be addressed, worthy of being spoken to; जनमाभाष्यमिमं न मन्यसे R. 8. 48. **-ष्यम्** What is to be said by way of address; Me. 103. (v. l.)

आभास् 1 Ā. **1** To shine, blaze. **-2** To be bright. **-3** Te appear, seem, look like; स्थानान्तरं स्वर्ग इवाबभासे Ku. 7. 3; R. 7. 43, 63; 14. 12. **-4** To appear untruly, have an appearance; शुक्तिः रजतवदाभासते; Ki. 17. 21. *-Caus.* To illuminate.

आभास् *f.* Splendour, lustre, light.

आभासः [भास्-अच्] **1** Splendour, light, lustre. **-2** A reflection; तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत् Vedānta. **-3** (*a*) Resemblance, likeness; oft. at the end of comp; नभश्च रुधिराभासम् Rām. &c.; चिदाभास, (*b*) Semblance, phantom; युक्तिवाक्यतदाभाससमाश्रयाः Ś. B.; तत्साहसाभासम् Māl. 2 looks like wantonness. -4 Any unreal or fallacious appearance (as in हेत्वाभास); पुनरुक्तवदाभासः S. D. -5 A fallacy, fallacious reasoning, semblance of a reason, an erroneous but plausible argument; see हेत्वाभास; S. D. 270. -6 An intention, purpose. -7 One of the nine materials of which idols are made, a marble. -8 A class of buildings. -9 An irreligious kind of worship; विधर्मः परधर्मश्च आभास उपमा छलः। अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत्त्यजेत्॥ Bhāg. 7. 15. 12.

आभासनम् Making apparent or clear; illuminating.

आभासु(स्व)र *a.* Splendid, bright, shining. **-रः** 1 A collective name of 64 demigods. -2 N. of an attendant *Gaṇa*. -3 N. of a particular set of 12 subjects; आत्मा ज्ञाता दमो दान्तः शान्तिर्ज्ञानं शमस्तपः। कामः क्रोधो मदो मोहो द्वादशाभास्वरा इमे॥ (तारानाथ तर्कवाचस्पतिकोश.)

आभिचरणिक, आभिचार, आभिचारिक *a.* (**-की** *f.*) [अभिचरण-चर-ठञ्] 1 Magical. -2 Imprecatory, maledictory; तमाभिचारदहनमायान्तं द्वारकौकसः Bhāg. 10. 66. 35. **-कम्** A spell or incantation, magic.

आभिजन *a.* (**-नी** *f.*) [अभिजन-अण्] Relating to birth (अभिजन), patronymic (as a name); तां पार्वतीत्याभिजनेन नाम्ना Ku. 1. 26. **-नम्** Nobility or loftiness of birth.

आभिजात्यम् [अभिजातस्य भावः ष्यञ्] 1 Nobility of birth; आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च Rām. 2. 35. 17. °शंसिनी च नम्रता Dk. 137; Ratn. 3. 18; Mv. 2. 18. -2 Rank. -3 Learning. -4 Beauty.

आभिजित *a.* [अभिजिति नक्षत्रे जातः अण्] Born under the constellation *Abhijit*. आभिजितो मुहूर्तः, आभिजितः स्थालीपाकः Mbh. on P. V. 3. 118.

आभिधा [अभिधैव स्वार्थे अण्] 1 A sound, word. -2 A name; mentioning; see अभिधा.

आभिधानिक *a.* (**-की** *f.*) Contained in a dictionary. **-कः** A lexicographer.

आभिधानीयक *a.* Relating to a word or name. **-कम्** The property of a name.

आभिप्रायिक *a.* Voluntary, optional.

आभिप्लविक *a.* (**-की** *f.*) [अभिप्लव-ठक्] Relating to the religious ceremony called आभिप्लव q. v.

आभिमन्यवः A descendent of अभिमन्यु. N. of Parīkṣita; Bhāg. 1. 18. 5.

आभिमुख्यम् [अभिमुखस्य भावः ष्यञ्] 1 Direction towards; °ख्यं याति goes to meet or encounter. -2 Being in front of or face to face; नीताभिमुख्यं पुनः Ratn. 1. 2. -3 Favourableness.

आभियोगिक *a.* Done with skill or dexterity.

आभिरामिक *a.* (**-की** *f.*) Good, agreeable; Mu. 4.

आभिरूपकम्, आभिरूप्यम् [अभिरूप वुञ् ष्यञ् च] Beauty.

आभिषेचनिक *a.* (**-की** *f.*) [अभिषेचन-ठञ्] Relating to the inauguration of a king; आभिषेचनिकं भाण्डं कृत्वा रामः प्रदक्षिणम् Rām. 2. 19. 31; Mv. 4. **-कम्** The material required for अभिषेक; आभिषेचनिकान्यस्मा आजह्रुः सर्वतो जनाः Bhāg. 4. 15. 11.

आभिहारिक *a.* (**-की** *f.*) [अभिहार-ठञ्] 1 To be offered as a present. -2 Taken by force, or fraud. **-कम्** 1 A present. -2 A room.

आभीकम् [आभीकेन दृष्टं साम अण्] N. of a Sāma melody.

आभीक्ष्ण्यम् [अभीक्ष्णस्य भावः ष्यञ्] Continued repetition; बहुलमाभीक्ष्ण्ये P. III. 2. 81, 4. 22.

आभीय *a.* Contained in rules or Sūtras of Pāṇinī from VI. 4. 22 to VI. 4. 129.

आभीरः [आ समन्तात् भियं राति, रा-क Tv.] 1 A cowherd; आभीरवामनयनाहृतमानसाय दत्तं मनो यदुपते तदिदं गृहाण Udb.; according to Ms. 10. 15 आभीर is the offspring of a Brāhmaṇa and a female of the Ambaṣṭha tribe. -2 (pl.) N. of a country or its inhabitants; श्रीकोंकणादधोभागे तापीतः पश्चिमे तटे। आभीरदेशो देवेशि विन्ध्यशैले व्यवस्थितः॥ **-री** 1 A cowherd's wife. -2 A woman of the Ābhīra tribe. -3 The language of the Ābhīras; आभीरेषु तथाभीरी (प्रयोक्तव्या) S. D. 432. **-Comp.** **-पल्लिः, -ल्ली** *f.*, **-पल्लिका** a station or abode of herdsmen, a village inhabited by cowherds.

आभील *a.* [आभियं लाति ददाति ला क] 1 Fearful, terrible; रात्रौ निशीथे त्वाभीले Mb. 3. 11. 4; आभीलानि प्राणिनः प्रत्यवस्यन् Śi. 18. 78. -2 Suffering from. **-लम्** Injury, physical pain; आभीलं न द्वयोः कृच्छ्रे वाच्यलिङ्गे भयानके Medinī.

आभु *a.* [आ-भू-डु] Pervading, reaching; तुच्छ्येनाभ्वपिहितं यदासीत् Rv. 10. 129. 3. (Sāy.); empty; stingy, emptyhanded; सत्यध्वृतं वृजिनायन्तमाभुम् Rv. 10. 27. 1.

आभूक *a.* Ved. Empty, powerless.

आभुग्न *a.* A little curved or bent.

आभू 1 P. Ved. To be present, continue one's existence; यद्यद्भवन्ति तदाभवन्ति Ch. Up. 6. 9. 3.

आभू *a.* Ved. Approaching (as a praiser); इन्द्रः श्नथयन्ननाभुवः Rv. 1. 51. 9. -2 Strong, sufficient, efficacious. -3 Applied according to rule (as a hymn). -4 Very prosperous. *m.* 1 A prison, a place of confinement. -2 A helper or assistant.

आभूतिः *f.* 1 Pervasion. -2 Overpowering strength; आभूत्या सहजा वज्रसायक Rv. 10. 84. 6. -3 Capability, efficiency. -4 Production; आभूतिरेषाभूतिर्बीजमेतन्निधीयते Ait. Br. 8. 13. 8.

आभूषेण्य *a.* Ved. Praiseworthy.

आभृ 1 P. **1** To bring; आ नो अग्ने रयिं भर Rv. 1. 79. 8; कदपत्याभृतं दुःखम् Bhāg. **-2** To carry. **-3** To fill, fill with. **-4** To bear, support.

आभरणम् **1** An ornament, decoration (fig. also); किमित्यपास्याभरणानि यौवने धृतं त्वया वार्द्धकशोभि वल्कलम् Ku. 5. 44; प्रशमाभरणं पराक्रमः Ki. 2. 32. (आभरण occurs in the names of works; *e. g.* सरस्वतीकण्ठाभरण). **-2** The act of nourishing.

आभरित *p. p.* **1** Filled. **-2** Decorated.

आभृत *a.* **1** Produced, caused to exist; ताभ्यो लोहितमाभृतम् Bhāg. 3. 26. 60. **-2** Filled up, firmly fixed; आभृतात्मा मुनिः Bhāg. 4. 8. 56.

आभेरी One of the modes of music (रागिणी) personified as a female.

आभोगः [आ-भुज्-घञ्] **1** Curving, winding. **-2** A curve; आभोगकुटिला (गङ्गा) Mb.; crumpling. **-3** Circuit, circumference, expanse, extension, precincts, environs; अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्येति Ś. 1; गगनाभोगः the expanse of heaven, wide firmament of the sky; Bh. 3. 57; Mv. 6. 30; शैलाभोगभुवो भवन्ति ककुभः Māl. 9. 16. प्रासादाभोगः the middle part of a palace; प्रासादाभोगविस्तीर्णः स्तुतिशब्दो ह्यवर्तत Rām. 2. 65. 3. **-4** Magnitude, fulness, extent, expansive form; गण्डाभोगात् Me. 93 from the broad cheek; प्रतिरवाभोग Māl. 3. 8; 4. 10; 5. 11; प्रतिभयाभोगैः प्लवङ्गाधिपैः Mv. 6. 24 bodily form or stature; U. 2. 14; भवाभोगोद्विग्नाः Bh. 3. 42, 86; Mv. 2; K. 305, 333. **-5** Effort. **-6** The expanded hood of a cobra (used by Varuṇa as his umbrella). **-7** Enjoyment, satiety, completion; विषयाभोगेषु नैवादरः Śāntilakṣaṇa. **-8** Serpent. आभोगं हन्मना हतम् Rv. 7. 94. 12.

आभोग्य *a.* [आभोगं याति या-क] To be enjoyed (as Soma juice); Rv. 1. 110. 2. **-यम्** Livelihood (Ved.).

आभोगिः Ved. **1** Enjoyment. **-2** Living, supporting life. **-3** Food, nourishment; Rv. 1. 113. 5.

आभ्यन्तर *a.* (**-री** *f.*) [अभ्यन्तरे भवः अण्] **1** Interior, inner, inward; as आभ्यन्तरो भृत्यवर्गः. **-2** One of the two kinds of प्रयत्न or effort giving rise to the vocal sounds. **-रः** An officer in close contact or specially intimate with the king. RT. 8. 426. **-रिकः** An officer connected with harem. Rāmgani Copperplate of Īśvaraghoṣa (Inscriptions of Bengal, p. 149).

आभ्यवकाशिक *a.* (**-की** *f.*) Living in the open air.

आभ्यवहारिक *a.* (**-की** *f.*) [अभ्यवहाराय हितं ठक्] Eatable (as food &c.).

आभ्यागारिक *a.* Fit to be nourished in the house or a family.

आभ्यादायिकम् [अभ्यादान-ठक्] A kind of स्त्रीधन or woman's property.

आभ्यासिक *a.* (**-की** *f.*) [अभ्यास-ठक्] **1** Resulting from practice; तल्पैश्चाभ्यासिकैर्युक्तं शुशुभे योधरक्षितम् Mb. 1. 207. 34. **-2** Practising, repeating. **-3** Being near, neighbouring, adjoining (आभ्याशिक).

आभ्युदयिक *a.* (**-की** *f.*) [अभ्युदय-ठक्] **1** Tending to good, granting prosperity; अनाभ्युदयिकं श्रमणकदर्शनम् Mk. 8. **-2** Relating to the rise or beginning of anything; सुख° Ms. 12. 88. **-3** High, exalted, important. **-कम्** A Śrāddha or offering to ancestors; an occasion of rejoicing.

आभ्रिक *a.* (**-की** *f.*) [अभ्र्या खनति ठक्] One who digs with a spade.

आम् *ind.* An interjection of (*a*) assent, acceptance, 'oh', 'yes'; आं कुर्मः M. 1; (*b*) recollection; आं तस्मिन्नुर्वश्या वचनं स्खलितमासीत् V. 3; आं ज्ञातम् Ś. 3, Oh, I see it now; M. 3; (*c*) determination, 'surely', 'verily', आं चिरस्य खलु प्रतिबुद्धोऽस्मि; (*d*) reply.

आम्भीयः (Generally used in plural) A school of writers on politics......इति आम्भीयाः। Kau. A. 1. 17.

आम *a.* [आम्यते ईषत् पच्यते; आ अम् कर्मणि घञ् Tv.] **1** Raw, uncooked, undressed (opp. पक्व) (oft. applied to the cow in the Veda; Rv. 3. 30. 14.); आमान्नम् Ms. 4. 223; Y. 1. 287. **-2** Unripe, immature; तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः Bhāg. 3. 31. 27. **-3** Unbaked, unannealed (as a jar); आमकुम्भ इवाम्भःस्थो विशीर्णः H. 4. 66. **-4** Undigested. **-म्** **1** State of being raw; शनैः शनैर्जहुः पङ्कं स्थलान्यामं च वीरुधः Bhāg. 10. 20. 39. **-2** Constipation, passing hard excretion. **-3** Grain freed from chaff. **-मः** **1** Disease; sickness. **-2** Indigestion; आहारस्य रसः सारः यो न पक्वोऽग्निलाघवात्। आमसंज्ञां स लभते महाव्याधिसमाश्रयः॥ Suśr. **-Comp.** **-अतिसारः** dysentery or diarrhœa caused by vitiated mucus in the abdomen (the excretion being in this case mixed with hard and fetid matter). आमातिसारे नो कार्यमादौ संग्रहणं नृणाम् Suśr. **-अद्** *a.* eating raw flesh or food; आमादः क्विङ्कास्त मदन्त्वेनीः Rv. 10. 87. 7. **-अन्नम्** undressed rice. **-आशयः** [आमस्यापक्वान्नस्याशयः] 'receptacle of undigested food', the upper part of the belly to the navel, stomach. **-कुम्भः** a jar of unbaked clay; H. 4. 66. **-गन्धि** *n.* smelling of raw meat of a burning corpse. **-गन्धिकम्** the smell of raw meat. **-ज्वरः** a kind of fever; cf. स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति Śi. 2. 54. **-त्वच्** *a.* of tender skin. **-पाकः** **1** a preliminary stage of the disease called dropsy. **-2** A method of mellowing or ripening a tumour; Suśr. **-पात्रम्** an unannealed vessel; Av. 8. 10. 28; विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि Ms. 3. 179. **-पीनसम्** running at the nose, defluxion. **-पेशाः** Grains pounded in a raw condition. **-मांसाशिन्** *m.* a cannibal, an eater of raw flesh. **-रक्तम्** dysentery. **-रसः** imperfect chyme. **-वातः** constipation, torpor of the bowels attended with flatulence and intumescence. **–शूलः** pain of indigestion, colic. **–श्राद्धम्** a Śrāddha performed with uncooked food; आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा। आमश्राद्धं द्विजैः कार्यं शूद्रेण च सदैव हि॥ Prāchetasa.

आमक *a.* Raw.

आमता, –त्वम् Rawness, unreadiness.

आमञ्जु *a.* Lovely, charming; आमञ्जुवञ्जुलस्तानि च तान्यमूनि U. 2. 23.

आमण्डः The castor-oil plant.

आमनम् Ved. Friendly disposition or inclination, affection; Yaj. Ts. 2. 3. 9. 1.

आम (मा) नस्यम् [अमनस्–ष्यञ्] Pain, sorrow.

आमन्त्र् 10 Ā. **1** To bid farewell, bid adieu; आमन्त्रयस्व सहचरम् Ś. 3; लताभगिनीम् Ś. 4; Ku. 6. 94; K. 223. **–2** To speak to, call out to, address, converse with; तमामन्त्रयाम्बभूव K. 81, 197, Ve. 1; A. R. 3. **–3** To say, speak: परिजनोप्येवमामन्त्रयते K. 195. **–4** To call, invite, ask (to come); आमन्त्रयध्वं राष्ट्रेषु ब्राह्मणान् Mb. **–5** To invoke.

आमन्त्रणम्, –णा **1** Addressing, calling, calling out to; अम्बेति वै योषाया आमन्त्रणम् Śat. Br. **–2** Bidding adieu, taking leave of. **–3** Greeting, welcome, courtesy. **–4** Invitation; अनिन्द्यामन्त्रणादृते Y. 1. 112. **–5** Permission. **–6** Conversation; अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् S. D. 6. **–7** The vocative case. **–8** Deliberation; asking; interrogation; यन्त्यस्यामन्त्रणमामन्त्रणीयो भवति य एवं वेद Av. 8. 10. 7.

आमन्त्रयितृ *a.* Asking, inviting, calling &c. *m.* (**–ता**) An inviter, entertainer, especially of Brāhmaṇas.

आमन्त्रित *p. p.* **1** Invited, called. **–2** Appointed to do a thing which is not obligatory. आमन्त्रणं कामचारानुज्ञा Sk. **–3** Consecrated with a मन्त्र; शरणामामन्त्रितानाम् Mb. 3. 20. 26. **–Comp. –विभक्ति** *f.* Vocative case; तत्र आमन्त्रितविभक्तिवचनं स्तुतये। ŚB. on MS. 9. 1. 9. °वचनम् The employment of an expression in the vocative case; तत्र आमन्त्रितविभक्तिवचनं स्तुतये। ŚB. on MS. 9. 1. 9. **–तम्** **1** Addressing. **–2** Talk, conversation; V. 2. **–3** The vocative case; संबोधने या प्रथमा सामन्त्रितसंज्ञा स्यात् Sk.

आमन्त्र्य *pot. p.* to be addressed or called to, to be invited &c. **–न्त्र्यम्** A word in the vocative case.

आमन्त्रः The castor-oil plant.

आमन्द्र *a.* Having a slightly deep tone, uttering a low, muttering sound, rumbling; आमन्द्राणाम् फलमविकलं लप्स्यसे गर्जितानाम् Me. 36. **–न्द्रः** A slightly deep tone, rumbling.

आमयः [आ–मी करणे अच्; Tv.; said to be fr. अम् also the word may also be derived as आमेन अय्यते इति आमयः] **1** Disease, sickness, distemper; दुःखशोकामयप्रदाः Bg. 17. 9; दर्पामयः Mv. 4. 22; आमयस्तु रतिरागसंभवः R. 19. 48; समौ हि शिष्टैराम्नातौ वत्स्यन्तावामयः स च Śi. 2. 10. **–2** Damage, hurt, distruction; देवानामिव सैन्यानि सङ्ग्रामे तारकामये Rām. 6. 4. 54. **–3** Indigestion. **–यम्** N. of the medical plant Costus Speciosus.

आमयाविन् *a.* [आमय-विन्-निपातः P. V. 2. 122 Vārt.] Sick, dyspeptic, affected with indigestion; °वित्वम् indigestion, dyspepsia.

आमरणान्त, –तिक *a.* (**–की** *f.*) Lasting till death, lasting for life, आमरणान्ताः प्रणयाः कोपास्तत्क्षणभङ्गुराः H. 1. 118; अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः Ms. 9. 101.

आमरीतृ *m.* Ved. A destroyer; न राधस आमरीता मघस्य Rv. 4. 20. 7.

आमर्षः, –र्षणम् Anger, wrath, impatience; see अमर्ष.

आमलकः, –की **1** The tree, Emblic Myrobalan, Emblica Officinalis Gaertn (Mar. आंवळा). **–2** N. of another tree (वासक). **–कम्** Fruit of the Emblic Myrobalan; बदरामलकाम्रदाडिमानाम् Bv. 2. 8.

आमहीया *f.* N. of a particular *Rik* or verse of the Ṛigveda; (Rv. 8. 48. 3).

आमात्यः [अमात्य एव स्वार्थे अण्] **1** A minister, counsellor. **–2** A general; see अमात्य

आमानस्यम् [अमानस–ष्यञ्] Pain, sorrow.

आमालकः A hill-station.

आमावास्य *a.* (**–स्यी** *f.*) [अमावास्या–अण्] **1** Belonging to the new moon or its festival. **–2** Happening or born at the time of new moon or conjunction. **–स्यम्** The new moon oblation.

आमिक्षा [आमिष्यते सिच्यते, मिष्-सक् Tv.] Curd of milk and whey, a mixture of boiled and coagulated milk; तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति; आज्येन पयसा दध्ना शकृताऽऽमिक्षया त्वचा Mb. 12. 268. 27; Av. 10. 9. 13.

आमिक्ष्यम्, आमिक्षीयम् [आमिक्षा यत्-छ] Curd suitable for the preparation of Āmikṣā; so आमिक्षीणम् in the same sense.

आमित्र *a.* [अमित्र-अण्] Inimical; odious; छित्वा शरासनं शत्रोर्नागमामित्रमार्दयत् Mb. 8. 12. 40.

आमित्रिः *m., f.* The child of an enemy.

आमिश्र–श्ल *a.* Readily mixing; स सोम आमिश्लतमः सुते भूद् Rv. 6. 29. 4.

आमिषम् [अम् टिषच् दीर्घश्च Uṇ. 1. 46] **1** Flesh; उपानयत् पिण्डमिवामिषस्य R. 2. 59; यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि। आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् Subhāṣ (Skanda P.) **–2** (Hence fig.) A prey, victim, object of enjoyment; (राज्यं) रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ R. 12. 11 fell a prey &c.; Dk. 164. **–3** Food, bait. **–4** A bribe. **–5** Desire, lust; निरामिषो विनिर्मुक्तः प्रशान्तः सुसुखी भव Mb. 12. 17. 2; निरपेक्षो निरामिषः Ms. 6. 49. **–6** Enjoyment; pleasing or lovely or attractive object; नामिषेषु प्रसंगोऽस्ति Mb. 12. 158. 23. -7 Form. -3 A leaf. -9 The fruit of the Jambīra; means of livelihood; आमिषं यच्च पूर्वेषां राजसं च मलं भृशम्। अनृतं नाम तद्भूतं क्षिप्तेन पृथिवीतले॥ Rām. 7. 74. 16. **-Comp. -आशिन्** *a.* carnivorous, eating flesh; दिनोपवासी च निशामिषाशी। हास्यार्णवः. **-प्रियः, -भुज्** 'fond of flesh', a kind of bird, heron.

आमिस् *m.* Ved. 1 Raw flesh or meat; Rv. 6. 46. 14. -2 A dead body.

आमिषी N. of a plant (जटामांसी).

आमीक्षा = आमिक्षा q. v.

आमील् 1 P. To close (the eyes); नेत्रे चामीलयन्नेष Kāv. 2. 11; to shut; चैतन्यमामीलयन् Mv. 2. 22 benumbing; धाराकदम्बरजोवृष्टिषु चामीलयन् K. 303 being absorbed in.

आमीलनम् Shutting or closing of the eyes; K. 256.

आमीलित *a.* Intensely occupied with, fond of, (cf. Mātaṅga L. 5. 3.).

आमीवत् *a.* Ved. Attacking; pushing, pressing; नम आमीवत्केभ्यः Yaj. Ts. 4. 5. 9. 2.

आमुकुलित *a.* A little open (as a blossom).

आमुखम् 1 Commencement. -2 (In dramas) A prologue, prelude (प्रस्तावना); (every Sanskrit play is introduced by आमुख. It is thus defined in S. D. नटी विदूषको वाऽपि पारिपार्श्वक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥ चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥ 287. **-खम्** *ind.* To the face.

आमुच् 6 U. 1 To loosen, let go. -2 To wear, tie round or fasten; put on (as a garment &c.); accoutre with; करोऽयमामुक्तविवाहकौतुकः Ku. 5. 66, 7. 21; आमुञ्चतीवाभरणं द्वितीयम् R. 13. 21, 12. 86, 16. 74, 17. 25; Ki. 11. 15; आमुञ्चद्वर्म रत्नाढ्यम् Bk. 17. 6. -3 To throw, cast, discharge; आमोक्ष्यन्ते त्वयि कटाक्षान् Me. 37. -4 To throw or cast off, take off, put aside (as garments &c.).

आमुक्त *p. p.* 1 Loosened, let go, liberated. -2 Put on, worn &c. आमुक्तमुक्तालतमस्य वक्षः। Śi. see above. -3 Discharged, cast, shot off. **-क्तम्** Armour.

आमुक्तिः *f.* 1 Liberation, being let loose. -2 Final beatitude. -3 Putting on, wearing (clothes, ornaments &c.). **-क्ति** *ind.* Till final beatitude is obtained.

आमोक्षणम्, -आमोचनम् 1 Loosening, liberating. -2 Emitting, shedding, letting forth, discharging. -3 Putting or tying on; केयूरामोक्षणस्य च Rām. 2. 24. 38.

आमुपः The thorny Bamboo; Bambusa Spinosa.

आमुर्, -रि *a.* Ved. Destroying, hurting.

आमुष्मिक *a.* (**-की** *f.*) [अमुष्मिन् परलोके भवः ठक्] Belonging to the next or other world; आमुष्मिकं श्रेयः Suśr.; नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्यातनाः S. D.

आमुष्यायण *a.* or **-णः** (**-णी** *f.*) [अमुष्य ख्यातस्यापत्यं नडा° फक् अलुक्] Well-born, a son or descendant of such a one; *i. e.* of an illustrious person or family; आमुष्यायणो वै त्वमसि Śat. Br.; तदामुष्यायणस्य तत्रभवतः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः Māl. 1; Mv. 1.

आमृण *a.* Vulnerable.

आमृद् 9 P. 1 To crush by rubbing. -2 To crumple. -3 To press, squeeze.

आमर्दः 1 Crushing. -2 Roughly handling; अर्धपीतस्तनं मातुरामर्दक्लिष्टकेशरम् Ś. 7. 14. -3 Pressing, squeezing. -4 N. of a town.

आमर्दिन् *a.* Crushing, pressing.

आमृश् 6 P. 1 to touch; handle (roughly), lay hands upon; नवातपामृष्टसरोजचारुभिः Ki. 4. 14; (ताम्) मुहुरामृशन्मृगधरोऽग्रकरैः Śi. 9. 34; शरासनज्यां मुहुराममर्श Ku. 3. 64; K. 163; Dk. 71; Ś. 7. 2. -2 (*a*) To seize upon, eat, eat up; R. 5. 9. (*b*) To attack, assail; आमृष्टं नः परैः पदम् Ku. 2. 31. -3 To rub, injure.

आमर्शः, -र्शनम् 1 Touching, close contact. -2 Rubbing, wiping. -3 Counsel, advice. -4 Disposition of the mind (मनोवृत्ति); विद्वान्स्वप्न इवामर्शसाक्षिणं विररामह Bhāg. 4. 28. 40.

आमृष्ट *p. p.* 1 Touched, attacked, seized &c. -2 Sweetened, made delicious; तैरामृष्टशुचो लोकाः Bhāg. 10. 40. 16; Pt. 4. -3 Rubbed, struck against; Ś. 7. 2. -4 Wiped, rubbed.

आमेन्य *a.* To be measured from all sides; to be reached with an arrow or bolt (?).

आमोगः An ending verse containing the poet's name (यत्रैव कविनाम स्यात् स आमोग इतीरितः इति संगीतदामोदरः)

आमोटनम् Crushing; Māl. 3.

आमोद *a.* Gladdening, cheering up, delighting. **-दः** 1 Joy, pleasure, delight; आमोदं परमं जग्मुः Rām. -2 Fragrance (diffusive), perfume; आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् R. 1. 43; आमोदं कुसुमभवं मृदेव धत्ते मृद्गन्धं न हि कुसुमानि धारयन्ति Subhāṣ; आमोदकर्मव्यतिहारमीयुः Śi. 2. 20; Me. 31. -3 Strong smell; आमोदो न हि कस्तूर्याः शपथेन प्रकाश्यते Subhāṣ. **-Comp. -जननी** 'causing a strong smell', betel.

आमोदन *a.* Delighting, pleasing. **-नम्** 1 Delighting, rejoicing; अभुञ्जतामोदनमोदनं जनाः N. -2 Making fragrant.

आमोदित *p. p.* 1 Pleased, delighted. -2 Made fragrant, scented.

आमोदिन् *a.* 1 Happy, delighted. -2 Fragrant; fragrant or perfumed with; oft. at the end of comp.; नवकुटजकदम्बामोदिनो गन्धवाहाः Bh. 1. 35. *m.* (**-दी**) A perfume for the mouth (made in the form of a pill of camphor &c.).

आमोदकः A seed of the Dill kind, Lingusticum Ajwaen (Mar. ओंवा).

आमोष *a*. Robbing, stealing. **–षः** Theft, robbing.

आमोषिन् *m*. A thief.

आमोहनिका A kind of fragrant odour.

आम्ना 1 P. **1** (*a*) To hand down traditionally or in sacred texts; भवत्प्रणीतमाचारमामनन्ति हि साधवः Ku. 6. 31; एवं किल सूत्रकारा आमनन्ति Māl. 7. (*b*) Hence, to regard, consider, mention, lay down; सर्वे वेदा यत्पदमामनन्ति Kaṭh. 1. 2. 15. त्वामामनन्ति प्रकृतिं पुरुषार्थ प्रवर्तिनीम् Ku. 2. 13, 5. 81; M. 1. 4; Bk. 18. 5; Kām. 8. 24; U. 5; Mv. 4. 30. **–2** To keep in mind, commit to memory, learn, study, repeat; आमनन्मन्त्रमुत्तमम् Bk. 17. 30; यद् ब्रह्म सम्यगाम्नातम् Ku. 6. 16 learnt. **–3** To celebrate, hail.

आम्नात *p. p.* **1** Considered, regarded, said to be; समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स (शत्रुः) च Śi. 2. 10. **–2** Studied, repeated. **–3** Remembered, kept in mind. **–4** Handed down in sacred texts or traditionally. **–तम्** Study.

आम्नातिन् *a*. [आम्नात-इनि] One who has studied the Vedas; आम्नातिनी नीतिषु बुद्धिमद्भिः Bk.

आम्नानम् [आ-म्ना-भावे ल्युट्] **1** Recitation or study of the sacred texts or Vedas. **–2** Mention; repetition in general.

आम्नायः [आ-म्ना-घञ्] **1** (*a*) Sacred tradition, sacred texts handed down by tradition or repetition. (*b*) Hence, the Veda, Vedas taken collectively (including Brāhmaṇas, Upaniṣads and Āraṇyakas also); अधीती चतुर्ष्वाम्नायेषु Dk. 120; आम्नायवचनं सत्यमित्ययं लोकसंग्रहः। आम्नायेभ्यः पुनर्वेदाः प्रसृताः सर्वतोमुखाः॥ Mb.; Ki. 11. 39. **–2** Study (by repetition); अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलम् Mb. 12. 328. 20. **–3** A sacred text or precept in general; आम्नायादन्यत्र नूतनश्छन्दसामवतारः U. 4. **–4** Traditional usage, family or national customs; U. 6. **–5** Received doctrine. **–6** Advice or instruction (in past and present usage). **–7** A Tantra. **–8** A series of families. **–Comp. –सारिन्** *a*. **1** pious, observing the traditional usages. **–2** containing the essence of the Veda.

आम्नायवत् *a*. Attended with, or learnt by, traditional instruction; U. 6.

आम्बरीषपुत्रकः A country inhabited by the Ambarīṣaputras.

आम्बष्ठः An inhabitant of Ambaṣṭha.

आम्बिकेयः [अम्बिकाया अपत्यं ढक्] An epithet of (*a*) Dhṛitarāṣṭra; न मे तच्च श्रुतवानाम्बिकेयः Mb. 3. 5. 14. (*b*) Kārtikeya.

आम्भस *a*. (**–सी** *f*.) [अम्भस्-अण्] Watery, fluid.

आम्भसिक *a*. (**–की** *f*.) [अम्भसी वर्तते ठक्] Acquatic. **–कः** A fish.

आम्रः [अम् गत्यादिषु रन् दीर्घश्च Uṇ. 2. 16.] The mango tree. **–म्रम्** The fruit of the mango tree. **–Comp. –अस्थि** The seed of the mango tree. **–आवर्त 1** N. of a tree (आम्रातक). **–2** inspissated mango juice. (**–र्तम्**) the fruit of आम्रातक. **–कूटः** N. of a mountain; सानुमानाम्रकूटः Me. 17. **–गन्धकः** N. of a plant (समष्ठिलवृक्षः; Mar. सुरण). **–निशा** N. of the plant Curcuma Reclinata (Mar. आंबेहळद). **–पञ्चमः** A particular Rāga in music. **–पाली** *f*. N. of a prostitute famous for her beauty. **–पेशी** [आम्रस्य पेशीव] a portion of dried mango fruit. **–फलप्रपाणकम्** A cooling drink made of mangoes. **–वण** [आम्रस्य वनम् cf. P. VIII. 4.5] a grove of mango trees; सोऽहमाम्रवणं छित्त्वा Rām.

आम्रातः [आम्रं आम्ररसं अतति अत्-अच् Tv.] The hog-plum, Spondias Mangifera (its juice resembling that of the mango. Mar. आंबाडा). **–तम्** The fruit of this tree.

आम्रातकः **1** The hog plum. **–2** Inspissated mango juice (Mar. साट); आम्रस्य सहकारस्य कटे विस्तारितो रसः। घर्मशुष्को मुहुर्दत्त आम्रातक इति स्मृतः॥ Bhāv. P. **–3** N. of a mountain.

आम्रावती N. of a town.

आम्रिमन् *m*. Acid taste; see Gaṇa to P. V. 1. 123.

आम्रेड् *Caus*. To repeat; एतदेव यदा वाक्यमाम्रेडयति देवराट् Mb.

आम्रेडनम् Tautology; repetition of words or sounds.

आम्रेडित *p. p.* Reiterated, repeated (as words). **–तम्** **1** Repetition of sound or word. **–2** (In gram.) Reduplication, the second word in reduplication; द्वितीयाम्रेडितान्तेषु Sk.

आम्लः, –म्ला The tamarind tree. **–म्लम्** Sourness, acidity. **–पञ्चकम्** The aggregate of the five following Ziziphus Jujuba (Mar. बोर), Pomegranate (Mar. डाळिंब), Mangosteen (Mar. कोकंब), Tamarind (Mar. चिंच), Averrhoa Carambola (Mar. करमर). **–वेतसः** N. of the plant Rumex Vesicarius (Mar. चुका).

आम्लि (म्ली) का **1** The tamarind tree. **–2** Acidity of stomach.

आयः [आ-इ-अच्, अय्-घञ् वा] **1** Arrival, approach; आये वामस्य संगथे रयीणाम् Rv. 2. 38. 10. **–2** Gaining or acquisition of money, acquiring (opp. व्यय); आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः Pt. 1. 163. **–3** Income, revenue; receipt; ग्रामेषु स्वामिग्राह्यो भाग आयः Sk.; Y. 1. 322, 327; Mk. 2. 6; आयद्वाराणि Dk. 162 sources of income; आयव्ययौ च नियतावाकरान् कोषमेव च Ms. 8. 419; आयाधिकं व्ययं करोति he lives beyond his means. **–4** Gain, profit. **–5** The eleventh house (in astrology). **–6** The guard of the women's apartments. **–7** Means, source; मार्गत्यायशतैर्थान् Mb. 13. 163. 5. **–Comp. –दर्शिन्** seeing (*i. e.* having) revenues, revenue-collector; Mk. **–सुखम्**

Forms of revenue; Kau. A. 2. 6. **–व्ययौ** (dual) receipt and disbursement, income and expenditure. **–शरीरम्** Body of income; Kau. A. 2. 6. **–स्थानम्** a place where revenues are collected.

आयकस्कम्भः A kind of pillar (cf. Mānasāra).

आयत् *a.* Ved. Coming, approaching; °वसु one to whom good or wealth comes; Av. 13. 4. 54.

आयतीगवम् *ind.* At the time when cows return home; आतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम् Bk. 4. 14.

आयन Ved. Coming, approaching.

आयिन् *a.* Ved. Coming or driving near, Yaj. Ts. 2. 47. 1.

आयःशूलिक *a.* (**–की** *f.*) [अयःशूल-ठक् P. V. 2. 76]. Active, diligent, indefatigable. **–कः** A man who, in order to gain an object, uses forcible instead of gentle means (तीक्ष्णोपायेन योऽन्विच्छेत्स आयःशूलिको जनः); cf. K.P. 10; अयःशूलेन अन्विच्छति (scil. अर्थान्) इत्यायःशूलिकः.

आयज् 1 Ā. **1** To honour, worship (the gods). **–2** To give, present, furnish, supply. **–3** To consecrate, ordain, dedicate.

आयजि, आयजिन् *a.* Ved. Performing sacrifices from all sides; procuring, granting; आयजी वाजसातमा Rv. 1. 28. 7.

आयजिष्ठ *a.* Sacrificing or procuring best; यष्टा देवाँ आयजिष्ठः स्वस्ति Rv. 2. 9. 6.

आयज्यु *a.* Inclined to sacrifice; आयज्यवः सुमतिं विश्ववारा Rv. 9. 97. 26.

आयागः A gift given at a sacrifice; °भृत *a.* obtained by sacrifice.

आयत् 1 Ā. **1** To strive, endeavour. **–2** To rest or depend on, rest with (with loc.); वयं त्वय्यायतामहे Mv. 1. 49 (v. l.); 3. 34; Dk. 42. **–3** To arrive, come to, reach, dwell (Ved.).

आयतनम् [आयतन्तेऽत्र, यत् आधारे ल्युट्] **1** Place, abode, house, resting-place; भूमेर्महदायतनं वृणीष्व Kath. 1. 1. 23. (fig. also); शूलायतनाः Mu. 7 hangmen; स्नेहस्तदेकायतनं जगाम Ku. 7. 5 was centred in her; R. 3. 36; सर्वाविनयानामेकैकमप्येषामायतनम् K. 103; °मृगेण 130 domestic deer; Chāṇ. 32; (hence) a receptacle, home, support, seat. **–2** The place of the sacred fire, altar, shed for sacrifices. **–3** A sanctuary, sacred place; as in देवायतनम्, मठायतनम् &c. यथाक्रमविशेषेण सर्वाण्यायतनानि च। दर्शितानि Mb. 13. 156. 11; विजने वायतने गिरौ वने वा। Bu. Ch. 5. 19. **–4** The site of a house, ground-plot. **–5** A barn; Y. 2. 154. **–6** An inner seat (with Buddhists who consider the five senses with *manas* as the six Āyatanas). **–7** The cause of disease.

आयतनत्वम् State of being an altar or seat.

आयतनवत् *a.* Having a certain seat or home. *m.* N. of the fourth foot of Brahmā; य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते Ch. Up. 4. 8. 4.

आयत्त *p. p.* [आ-यत्-क्त] **1** Dependent on, resting with (with loc. or in comp.); दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् Ve. 3. 33; भाग्यायत्तमतः परम् Ś. 4. 17. **–2** Docile, tractable. **–3** Attempted, tried; प्रहस्तः परमायत्तस्ततः सुस्राव शोणितम् Rām. 6. 58. 49. °**ता, –त्वम्** dependence, humility, docility.

आयत्तिः *f.* [आ-यत्-क्तिन्] **1** Dependence, subjection. **–2** Affection. **–3** Strength, power, might. **–4** Boundary, limit. **–5** An expedient, remedy. **–6** Majesty, dignity. **–7** A day. **–8** Steadiness of conduct, continuance in the right path. **–9** Length. **–10** Future time (These two senses should perhaps be referred to आयति q. v.).

आयथातथ्यम् Unfitness, unsuitableness, impropriety; गुणानामायथातथ्यादर्थं विप्लावयन्ति ये Śi. 2. 56.

आयथापुर्यम्, –पूर्व्यम् The state of being not as formerly.

आयन *a.* Belonging to the solistice (as in उत्तरायण, दक्षिणायन).

आयम् 1 U. **1** To extend, lengthen out, stretch out; वस्त्रं-पाणिं-आयच्छते Sk.; स्वाङ्गमायच्छमानः Ś. 4. v. 1.; आयच्छति कूपाद्रज्जुम् Sk. draws up; बाणमुद्यतमायसीत् Bk. 6. 119 stretched out. **–2** To restrain, draw in (as breath &c.); त्रिरायम्य शनैरसून् Ms. 3. 217, 11. 100; प्राणानायम्य Y. 1. 24. **–3** To stretch oneself, to grow long (Ātm.); P.I.3.28. **–4** To grasp, possess; श्रियमायच्छमानाभिः Bk. 8. 46. **–5** To bring or lead towards. *–Caus.* **1** To lengthen, stretch, spread or draw out. **–2** To remove, transplant.

आयत *p. p.* **1** Long; दशाङ्गुलमायता यष्टिः a stick ten fingers long; शतमध्यर्धं (योजनं) आयता Mb.; °स्वभावानि च दुःखानि K. 175 lasting. **–2** Diffuse, prolix. **–3** Big, large, great; Pt. 1. **–4** Drawn, attracted. **–5** Long drawn, distant; high-pitched; स्वचित्तायतनिःस्वनम् Rām. 1. 4. 33. **–6** Curbed, restrained. **–7** Asleep; तं नायतं बोधयेदित्याहुः Bṛi. Up. 4. 3. 14. **–तः** An oblong (in geometry). **–तम्** *ind.* Deeply, long, ; मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निःश्वस्य चायतम् Ram. 6. 111. 71. **–Comp.** **–अक्ष** *a.* (**–क्षी** *f.*) **–ईक्षण, –नेत्र, –लोचन** *a.* (a woman) with large eyes. **–अपाङ्ग** *a.* having long cornered eyes. **–अर्धः** half an oblong. **–आयतिः** *f.* long-continuance, remote futurity; सा विभूतिरनुभावसम्पदां भूयसी तव यदायतायतिः Śi. 14. 5. चतुरस्र, दीर्घचतुरस्र *a.* Oblong. **–च्छदा** a plantain tree. **–लेख** *a.* long-curved; कान्तिर्भ्रुवोरायतलेखयोर्या Ku. 1. 47. **–स्तूः** *m.* [आयतं स्तौति, नि° पा° दीर्घः] a panegyrist, bard.

आयतिः *f.* **1** Length, extension; Mb. 5. 166. 3; stretching, extending; तेषां देवेष्वायतिरस्माकं तेषु नाभयः Rv. 1. 139. 9. **–2** Future time, the future; आयतिप्रदर्शनम्; Kau. A. 2. 10.

°भङ्ग K. 55 (length also), 58; Dk. 29; भूयसी तव यदायतायतिः Śi. 14. 5; रहयत्यापदुपेतमायतिः Ki. 2. 14; Ms. 7. 169; अनायतिक्षमं वचः Pt. 3. 111 imprudent, not good for the future; °ग्लानिभीतः Mu. 4. 12; स्थिर° Ki. 1. 23 permanent. **–3** Future consequence or result; आयतिं सर्वकार्याणां तदात्वं च विचारयेत् Ms. 7. 178; Ki. 1. 15, 2. 43, 3. 43; Ki. 4. 21; fruit-yielding season. **–4** Majesty, dignity; आयतीमिव विश्वस्ताम् Rām. 5. 19. 12. **–5** Stretching the hand, accepting, obtaining. **–6** Work (कर्मन्); यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् Ms. 7. 208 (कर्मक्षमम् Kull.). **–7** Connection, junction. **–8** Meeting, union. **–9** Source, descent; तदायतिः Dk. 154 descended from him. **–10** Restraint (of mind). **–11** Arrival; उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा Praśna. Up. 3. 12. **–12** A long line, succession; द्रक्ष्यन्ति समरे योधाः शलभानामिवायतीः Mb. 7. 159. 71.

आयतिमत् *a.* **1** Long, extended. **–2** Dignified, majestic, stately. **–3** Self-restrained.

आयन्तृ *m.* Ved. One who approaches, one who fastens or raises.

आयमनम् **1** Length, extension. **–2** Restraint, curbing. **–3** Stretching (as a bow); दृढस्य धनुष आयमनम् Ch. Up. 1. 3. 5.

आयामः [आ-यम्-घञ्] **1** Length; तिर्यगायामशोभी Me. 59. **–2** Expansion, extension; Ki. 7. 6. **–3** Stretching, extending. **–4** Restraint, control, stopping; प्राणायामपरायणाः Bg. 4. 29; प्राणायामः परं तपः Ms. 2. 83.

आयामवत् *a.* Extended, long; चित्रन्यस्तमिवाचलं हयशिरस्यायामवच्चामरम् V. 1. 4; Śi. 12. 65.

आयामित *a.* Stretched out, extended.

आयामिन् *a.* **1** One who restrains. **–2** Long (in space or time); K. 25, 55; °यामासु Ki. 11. 48.

आयल्लकः Impatience, longing; गाढायल्लकदुःसहामिव दशां धत्ते गजानां पतिः Nāg. 1. 20.

आयवनम् Ved. A spoon for stirring or any similar implement.

आयवसः, –सम् Pasture-ground, place for feeding.

आयस् 4 P. **1** To exert oneself; पिण्डार्थमायस्यतः Mu. 3. 14. **–2** To weary oneself, become exhausted or fatigued; नायस्यसि तपस्यन्ती Bk. 6. 69, 14. 104, 15. 54. *–Caus.* **1** To trouble, afflict; आयासयति मां जलाभिलाषः K. 35; Mu. 7. 8; V. 2. **–2** To weary, tire out, worry. **–3** To injure, affect; lessen, diminish; नाऽऽयासयन्त संत्रस्ता Bk. 8. 61. **–4** To string (as a bow); अनायासितकार्मुकः Pt. 1. 385.

आयस्त *p. p.* [यस्-क्त] **1** Pained, distressed, afflicted. **–2** Hurt, injured, killed; नित्यायस्तो बालको (न ईशे) Mb. 13. 1. 26. **–3** Vexed, angry. **–4** Effected with difficulty. **–5** Thrown, cast, sent forth. **–6** Sharpened, whetted. **–7** (Actively used) Toiling, labouring, exerting oneself. **–8** Eager, anxiously desirous; आयस्तः (संप्राप्तुम्) Ki. 7. 32. **–स्तम्** A great effort; न मे गर्वितमायस्तं सहिष्यति दुरात्मवान् Rām. 4. 16. 9.

आयासः [आ-यस्-घञ्] **1** Effort, exertion, trouble, difficulty, pain, labour; बहुलायास Bg. 18. 24; cf. अनायास also. **–2** Fatigue, weariness; स्नेहमूलानि दुःखानि देहजानि भयानि च। शोकहर्षौ तथायासः सर्वं स्नेहात् प्रवर्तते ॥ Mb. **–3** Mental pain, anguish; सा विनीय तमायासम् Rām. 2. 25. 1; अपूर्वः खलु अस्य आयासः Pratimā 1. **–4** Unsteadiness, wavering; आत्मज्ञानमनायासस्तितिक्षा धर्मनित्यता Mb. 5. 34. 73.

आयासक *a.* [आ-यस्-ण्वुल्] Causing fatigue, wearisome; troublesome; एतस्माद्विरमेन्द्रियार्थगहनादायासकात् Bh. 3. 58.

आयासिन् *a.* [आ-यस्-णिनि] **1** Exhausted, fatigued. **–2** Making exertions, striving; मनस्तु तद्भावदर्शनायासि Ś. 2. 1. v. l.

आयस *a.* (**सी** *f.*) [अयसो विकारः अण्] **1** Made of iron, iron, metallic; शतं मा पुर आयसीररक्षन् Ait. Up. 4. 5. आयसं दण्डमेव वा Ms. 8. 315; सखि मा जल्प तवायसी रसज्ञा Bv. 2. 59. **–2** Armed with an iron weapon. **–सी** A coat of mail, an armour for the body. **–सम्** **1** Iron; मूढं बुद्धमिवात्मानं हैमीभूतमिवायसम् Ku. 6. 55; स चकर्ष परस्मात्तदयस्कान्त इवायसम् R. 17. 63. **–2** Anything made of iron. **–3** A weapon. **–4** A wind instrument.

आयस्कारः The upper part of the thigh of an elephant.

आया 2 P. **1** To come, arrive, approach. **–2** To reach, attain, go to (any particular state); क्षयम्, वशम्, बन्धनम्, तुलाम् &c. ब्राह्मणो निर्वेदमायात् Muṇḍa 1. 2. 12; आयातु वरदा देवी Mahānār. 15. 1. **–3** To follow, result. **–4** To be possible or practicable (with inf.).

आयात *a.* Come, approached; आयाता मधुयामिनी यदि पुनर्नायात एव प्रभुः Śṛi. Til. **–तम्** Excess, superabundance (उद्रेक); रागायाते Ki. 5. 23.

आयातिः *f.* [आ-या-क्तिन्] Coming near, arrival.

आयानम् **1** Coming, arrival; अस्मिन्ना वामायाने वाजिनीवसू Rv. 8. 22. 18. **–2** Natural temperament, disposition, nature. **–3** An ornament of the horse; Hch. 7.

आयापनम् Causing to come, inviting.

आयाचित *a.* Urgently requested or asked for.

आयिकपादः A kind of pillar (cf. Māna).

आयु *a.* [इ-ठण् Uṇ. 1. 2] Ved. Living, going, movable. **–युः** **1** A living being, man. **–2** Mankind, human race. **–3** Living beings taken collectively. **–4** The first man. **–5** Life, duration of life. **–6** Wind, अहं केशरिणः क्षेत्रे वायुना जगदायुना Mb. **–7** A son, descendant, offspring. **–8** The son of Purūravas and Urvaśī. **–Comp.** **–षक्** *a.* attached to; joined with men; सोमः पवत आयुषक् Rv. 9. 25. 5.

आयुज् 7 U. or *Caus.* 1 To join, fasten or tie, yoke (to anything). –2 To appoint. –3 To fix or direct (the mind) towards; आयोजितस्तपस्यात्मा K. 173. –*Caus.* 1 To fix, or place; मालाः कदम्बनवकेसरकेतकीभिरायोजिताः शिरसि बिभ्रति योषितोऽद्य Ṛs. 2. 21. –2 To make or form; कुसुमायोजितकार्मुको मधुः Ku. 4. 24.

आयुक्त *p. p.* 1 Appointed, charged with (with gen. or loc.); ये तत्र ब्राह्मणाः संमर्शिनः युक्ता आयुक्ताः T. Up. 1.11.4. कुशलोऽन्वेषणस्याहमायुक्तो दूतकर्मणि Bk. 8. 115. –2 United, joined, obtained. **–क्तः** 1 A minister, an agent or deputy. –2 Provincial governor, according to lexicons; possibly a treasury-officer, in inscriptions (GI. p. 6. ff. EI. XX. 61 ff., EI, XXIII, pp. 159 ff; &c.).

आयोगः 1 Appointment, entrusting one with something. –2 Action, performance of an act. –3 Offering flowers, perfumes &c. –4 A shore or bank; a quay to which boats are attached. –5 Connection, union; स देशो भ्रमरायोगः प्रदीप इव लक्ष्यते Rām. –6 Obstruction (रोध).

आयोजनम् 1 Joining. –2 Taking, seizing. –3 Collecting. –4 Effort.

आयुत *a.* 1 Mixed, mingled. –2 Melted. **–तम्** Half-melted butter.

आयुध् 4 Ā. To fight with, attack, oppose. –*Caus.* To oppose, attack, fight with; रथिनः पादचारमायोधयन्ति U. 5.

आयुधः, –धम् [आयुध्-घञर्थे क] 1 A weapon, shield &c.; it is of 3 kinds (1) प्रहरण, *e. g.* a sword; (2) हस्तमुक्त, *e. g.* a disc; (3) यन्त्रमुक्त, *e. g.* an arrow; आयुधानामहं वज्रम् Bg. 10. 28. न मे त्वदन्येन विसोढमायुधम् R. 3. 63. An implement; वशाया यज्ञ आयुधम् Av. 10.10.18. –2 A vessel (Ved.). **–धम्** 1 Gold used for ornaments. –2 (pl.) Water (Ved.) **–Comp.** (–अ) आगारम् an armoury, arsenal; अहमप्यायुधागारं प्रविश्यायुधसहायो भवामि Ve. 1; Ms. 9. 280. **–आगारिकः** Governor of an arsenal. **–जीविन्** *a.* living by one's weapon. (*m.*) a warrior, soldier. **–धर्मिणी** the tree called जयन्ती (रोगनाशने तस्या आयुधधर्मत्वात्). **–पालः** the governor of an arsenal; Hariv. **–पिशाचिका** 'devil of arms', devilish warlike spirit; Mv. 3; A. R. 4; B. R. 4. **–शाला** see आयुधागार.

आयुधिक *a.* Relating to arms. **–कः** [आयुधेन जीवति ठञ्] A soldier, warrior.

आयुधिन्, –आयुधीय *a.* [आयुध-इनि-छ] Bearing or using weapons. **–धी, –धीयः** A warrior; शिक्षाशक्तिं प्राहरन् दर्शयन्तो मुक्तामुक्तैरायुधैरायुधीयाः Śi. 18. 11.

आयोधनम् 1 A battle, fight, war; आयोधने कृष्णगतिं सहायम् R. 6. 42; आयोधनाग्रसरतां त्वयि वीर याते 5. 71. –2 Battle-field; प्रविश्यायोधनं घोरं विचिन्वन्त्यो हतं पतिम् Rām. 6. 110. 3. प्रययौ तूर्णमायोधनं प्रति Mb. विचित्रमभिवर्तते भुवनभीममायोजनम् U. 6. –3 Slaughter, killing.

आयुस् *n.* [इ-असि-णिच्च Uṇ. 2. 117] 1 Life, duration of life; दीर्घमायुः R. 9. 62, 12. 48; तक्षकेणापि दष्टस्य आयुर्मर्माणि रक्षति H. 2. 16; आयुर्वर्षशतं नृणां परिमितम् Bh. 3. 107, शतायुर्वै पुरुषः Ait. Br.; प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते सर्वमेव त आयुर्यान्ति Tait. Up. 2. 3.1 –2 Vital power. –3 Food. –4 N. of a ceremony called आयुष्टोम performed to secure long life, together with the गो and ज्योतिस् part of the अभिप्लव ceremony. (In comp. the final स् of this word is changed to ष् before hard consonants, and to र् before soft ones). **–Comp.** **–कर** *a.* (**–री** *f.*) promoting long life; K. 351. **–काम** *a.* wishing for long life or health. **–कृत्** *a.* giving or producing life. **–द्रव्यम्** 1 a medicament. –2 ghee. **–योगः** N. of a योग in astronomy. **–वृद्धिः** *f.* long life, longevity. **–वेदः** [आयुरस्मिन् विद्यतेऽनेन वा आयुर्विंदतीत्यायुर्वेदः Suśr.] the science of health or medicine, counted as a sacred science, and regarded as a supplement to the Atharvaveda; (it comprises 8 different departments; (1) शल्यम् surgery; (2) शालाक्यम् diagnosis of diseases belonging to the head and its organs; (3) कायचिकित्सा treatment of diseases of the whole body; (4) भूतविद्या treatment of diseases of the mind supposed to be caused by the influence of evil spirits; (5) कौमारभृत्यम् treatment of children; (6) अगदतन्त्रम् doctrine of antidotes; (7) रसायनतन्त्रम् doctrine of elixirs; and (8) वाजीकरणतन्त्रम् treatment of remedies to increase generative power); Śukra. 4. 277. **–वेददृश्, –वेदमय, –वेदिक, –वेदिन्** *a.* 1 belonging to medicine. –2 acquainted with medical science, medical. *m.* a physician. **–शेषः** 1 remainder of life; °शेषतया Pt. 1; °जीवित Pt. 4 being destined to live longer. –2 end or decline of life. **–स्तोमः** (आयुष्टोमः) a sacrifice performed to obtain long life.

आयुष्मत् *a.* [आयुस् मतुप्] 1 Alive, living. –2 Long-lived; आयुष्मन्तं सुतं सूते Ms. 3. 263. (Generally used in dramas by elderly persons in addressing a nobly-born person; *e. g.* a charioteer addresses a prince as आयुष्मन्. A Brāhmaṇa is also so addressed in saluting; cf. Ms. 2. 125; आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने). –3 Lasting; गायन्ति पृथगायुष्मन्निदं नो वक्तुमर्हसि Bhag. 11. 22. 3. –4 Old. *m.* 1 The third of the 27 Yogas or divisions of the ecliptic. –2 The Yoga star कृत्तिका; the third lunar mansion.

आयुषम् (At the end of a few comps.) Life; *e. g.* पुरुषायुषजीविन्यः R. 1. 63.

आयुष्कः [आयुः कायते, कै-क Tv.] 1 That which proclaims age or duration of life. –2 (With Jainas) Connection with the body or person.

आयुष्य *a.* [आयुः प्रयोजनमस्य, यत्] Promoting long life, vital, preservative of life; इदं यशस्यमायुष्यमिदं निःश्रेयसं परम् Ms. 1. 106, 3. 106, 4. 13; M. 4. 4 v. l.; Dk. 158. **–ष्यम्** 1 Vital power, abundance of life or vigour. –2 N. of a ceremony performed after the birth of a child.

आये *ind.* An interjection of calling, expressive of affection.

आयोगवः [अयोगव एव, स्वार्थे अण्] The son of a Śūdra by a Vaiśya wife (his business being carpentry; cf Ms. 10. 48); शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम् । वैश्यराजन्यविप्रास्तु जायन्ते वर्णसंकराः ॥ **-वी** A woman of this tribe.

आयोजनम् *ind.* Up to one योजन.

आयोदः Son of अयोद *i. e.* धौम्यमुनि.

आरः, -रम् [आ-ऋ-घञ्] 1 Brass; ताम्रारकोष्ठां परिखादुरासदाम् Bhāg. 10. 41. 20. -2 Oxide of iron. -3 An angle, corner. -4 N. of a tree (मधुराम्रफल). **-रः** 1 The planet Mars. -2 The planet Saturn. -3 Going. -4 Distance. -5 Nearness, as in आरात् q. v. -6 Extremity (प्रान्तभाग). **-रा** (आ-ऋ-अच्) 1 A shoemaker's awl. °**मुखम्** An arrow-head shaped like an awl; आरामुखेन चर्मच्छेदनम् । Dhanur. 66. -2 A knife, probe, instrument of iron. -3 A spoke; cf. अर. -4 A goad, or whip; उद्यम्यारामग्रकायोत्थितस्य Śi. 18. 7. **-Comp. -अग्र** 1 the point of an awl; आराग्रमात्रो ह्यवरोऽपि दृष्टः Śvet. 5. 8. -2 the iron thong at the end of a whip. **-आवलिः** N. of a chain of mountains, a part of the Vindhya. **-कूटः, -टम्** brass; उत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः U. 5. 14. किमारकूटाभरणेन श्रियः N.

आरकात् *ind.* Ved. Far from.

आरक्ष *a.* Preserved, defended, fit to be protected. **-क्षः, -क्षा** 1 Protection, preservation, guard; आरक्षस्य विधिं कृत्वा Mb. 5. 160. 3; आरक्षे मध्यमे स्थितान् Rām; Śānti. 3. 5; Ms. 3. 204. शतसाहस्रमारक्षं मध्यगं रक्षसां कपिः Bk. -2 The junction of the frontal sinuses of an elephant (कुम्भसन्धि). -3 The part of the forehead below this junction. -4 An army; आरक्षो मे हतस्तात Rām. 3. 31. 40. **-Comp. -अधिकृतः** Guard. EI., I. p. 5. f.

आरक्ष (क्षि) कः 1 A watchman, patrol, sentinel. -2 A village or police magistrate.

आरङ्गरः A bee. आरङ्गरेव मध्वेरयेथे Rv. 10. 106. 10.

आरग्वधः The tree Cassia Fistula (Mar. बाहवा) largely used in medicinal recipes. **-धम्** Its fruit.

आरचित *a.* Arranged, prepared, formed &c; see रचित.

आरटः [आ-रट्-अच्] An actor.

आरट्टः 1 N. of a country to the north-east of Punjab, famous for its breed of horses; (the people of Guzarath in Ravalpindi still call their country Hairat or Airatdesa); the inhabitants of this country (pl.). -2 A horse from this country.

आरणम् Ved. 1 Depth, abyss. -2 A precipice; याभिरन्तकं जसमानमारणे Rv. 1. 112. 6. **-जाः** N. of a class of Jaina deities.

आरणिः [आ-ऋ-अनि] An eddy, whirlpool.

आरणेय *a.* (**-यी** *f.*) [अरणि-ठक्] Relating to or sprung from Araṇi q. v. **-यः** N. of Śuka. **-यम्** or °**पर्वन्** Title of the last section of the third book of the Mahābhārata.

आरण्य *a.* (**ण्या,-ण्यी** *f.*) [अरण्ये भवः ण] Wild, forest-born, relating to a forest (opp. ग्राम्य); °पशुः Ms.10.48. (आरण्यपशु is of 7 kinds:-सरीसृपो रुरुश्चैव महिषो वानरस्तथा । पृषतक्षौ मृगश्चैव पशुर्वै सप्तधा मतः ॥) **-ण्यः, -ण्यम्** 1 A forest. -2 A kind of corn growing without sowing seed. -3 N. of certain signs of the zodiac (see °राशि below). -4 Cow-dung (-ण्यः only). -5 N. of a Parvan in the Mahābhārata. -6 N. of a Kāṇḍa in the Rāmāyaṇa. **-Comp. -कुक्कुटः** a wild cock. **-गानम्** one of the four Gānas or psalm-books of the Sāmaveda. **-पर्वन्** *n.* N. of the third book of the Mahābhārata, usually called Vana-Parvan. **-पशुः** a wild beast. **-मुद्गा** a kind of bean. **-राशिः** (in the zodiac) 1 The signs Leo, Aries, and Taurus. -2 The former half of Capricorn.

आरण्यक *a.* [अरण्ये भवः वुञ्] Relating to or produced in a forest, wild, forest-born (usually with the words अध्याय, मनुष्य, न्याय, पथिन्, विहार, and हस्तिन् P. IV. 2. 129 Vārt.) **-कः** A forester, an inhabitant of the woods; तपः षड्भागमक्षय्यं ददत्यारण्यका हि नः Ś. 2. 14; द्वावप्यत्रारण्यकौ Ś. 5. आरण्यकोपात्तफलप्रसूतिः R. 5. 15. **-कम्** An Āraṇyaka; it is one of a class of religious and philosophical writings (connected with the Brāhmaṇas) which are either composed in forests, or must be studied there; *e. g.* ऐतरेयारण्यकम्; बृहदारण्यकम् and तैत्तिरीयारण्यकम्; अरण्येऽनूच्यमानत्वात् आरण्यकम्, Bṛi. Ar. Up.; (अरण्येऽध्ययनादेव आरण्यकमुदाहृतम्); वेदवादानतिक्रम्य शास्त्राण्यारण्यकानि च Mb. 12. 19. 17. **-Comp. -काण्डम्** the title of the third book of the Rāmāyaṇa. **गानम्** = अरण्यगानम्.

आरथः [ईषत्स्वल्पो रथः] A carriage drawn by one horse or ox.

आरनालम् Gruel made from the fermentation of boiled rice.

आरभ् 1 Ā. 1 To begin, commence, undertake; अथ वा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः R.8.45; आरभन्तेऽल्पमेवाज्ञाः Subhāṣ.; आरब्धा बलिविग्रहम् Bk. 5. 38. -2 To be active or energetic, be busy; अप्यनारभमाणस्य Śi. 2. 91. -3 To rely on. -4 To reach or attain to, obtain. -5 To seize, grasp. -6 To form, make; भूतैः पञ्चभिरारब्धे देहे Bhāg.

आरब्ध *p. p.* Begun, commenced; आरब्धे हि सुदुष्करेऽपि महतां मध्ये विरामः कुतः Subh. Ratn. **-ब्धम्** Beginning.

आरब्धिः *f.* Beginning, commencement.

आरभटः [आरभ्-अटि] An enterprising or courageous man. **-टः, -टी** Boldness, confidence. **-टी** 1 A branch of the dramatic art, machinery of the drama, representation of supernatural, horrible events on the stage; मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः । संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता ॥ (said to be of four kinds, see S. D. 420 *et. seq.*). -2 A kind of literary style (वृत्ति). -3 A particular style of dancing.

आरभ्य *ind.* Having begun, beginning with, ever since, since, with a prepositional force (with abl.); मालत्याः प्रथमावलोकदिवसादारभ्य Māl. 6. 3; Ś. 3; K.102,134, 196; sometimes with acc. also; प्रतिपद्दिनमारभ्य Bhāg.

आरम्भः [आ-रभ्-घञ् मुम्] 1 Beginning, commencement; °उपायः plan of commencement; नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छाम् Me. 38. –2 An introduction. –3 (*a*) An act, undertaking, deed, work; आगमैः सदृशारम्भः R. 1. 15; Ku. 7. 71; V. 3; Bh. 2. 69; R. 7. 31; Bg. 12. 16. cf. also आरम्भस्य शब्दपूर्वत्वात्। MS. 11. 1. 10 (शबर writes आरम्भो व्यापारः क्रियेत्यनर्थान्तरम्।). (*b*) Preparation; U.4. (*c*) A thing begun; U. 4. –4 Haste, speed, velocity; चण्डारम्भः समीरः Ve.2.19.–5 Effort, exertion; Bg.14.12.–6 Scene, action; चित्रार्पितारम्भ इवावतस्थे R. 2. 31. –7 Pride. –8 Killing, slaughter. –9 The first act that is done. –10 The first movement or activity on the part of man; आरम्भो हि प्रथमः पदार्थः स्यात्। प्रथमं वा पुरुषस्य प्रवर्तनम्। (= प्रथमप्रवर्तनमारम्भः औदासीन्याद् व्यावृत्तिः पुरुषस्य व्यापृतता) ŚB. on MS. 10.104. –**Comp.** –**भाव्यत्वम्** The fact of being produced through activity; कर्मणि आरम्भभाव्यत्वात् कृषिवत् प्रत्यारम्भं फलानि स्युः। MS. 11. 1. 20. –**रुचि** *a.* Enjoying new undertakings. आरम्भरुचिताऽधैर्यमसत्कार्यपरिग्रहः। Ms. 12. 32.

आरम्भक *a.* [आ-रभ् ण्वुल् मुम्] undertaking, beginning.

आरम्भणम् [आ-रभ् ल्युट् मुम्] 1 Taking hold of, seizing. –2 The place of seizing, a handle; –3 Forming, making; तदनन्यत्वमारम्भणशब्दादिभ्यः Br. Sūtra 2.

आरम्भिन् *a.* Enterprizing; one who forms new projects.

आरम् 1 P. 1 To delight in, take pleasure in, sport; आरमन्तं परं स्मरे Bk. 8. 52, 3. 38. –2 To cease, stop (to speak); leave off; अन्तर्वत्नी त्वहं भ्रात्रा ज्येष्ठेनारम्यतामिति Mb. 1. 104. 11; विरामोऽस्त्विति चारमेत् Ms. 2. 73. –3 To rest, take rest.

आरत *p. p.* 1 Stopped, ceased; उदितपक्षमिवारतनिःस्वनैः Ki. 5. 6; see अनारत also. –2 Quiet, gentle.

आरातिः *f.* 1 Cessation, stopping. –2 Waving lights before an image (Mar. आरती).

आरमणम् 1 Taking delight. –2 Pleasure, enjoyment. –3 Sexual pleasure. –4 Cessation, pause. –5 A resting place.

आराम *a.* [रम्-घञ्] Pleasing, delightful; रामभद्र गुणाराम Mv. 7. 40. –**मः** 1 Delight, pleasure; इन्द्रियारामः Bg. 3. 16; आत्मारामाः Ve. 1. 31; एकाराम Y. 3. 58. –2 A garden, grove; प्रियारामा हि वैदेह्यासीत् U. 2; आरामाधिपतिर्विवेकविकलः Bv. 1. 31. आरामः कल्पवृक्षाणाम् (रामरक्षा) [cf. Pers. *ārām*]. –**Comp.** –**शीतला** N. of a fragrant plant (आनन्दी).

आरामिकः A gardener.

आरम्बणम् (Vedic for आलम्बनम्) Support.

आरव &c. See under आरु.

आरस्यम् [अरसस्य भावः ष्यञ्] Insipidity, tastelessness.

आरा See under आर.

आरात् *ind.* [आ-रा-बा॰ आति Tv.; abl. of आर q. v.] 1 Near, in the vicinity of; (with abl. or by itself); तमर्च्यमारादभिवर्तमानम् R. 2. 10; 5. 3. –2 Far from; with acc. also in both these senses; Śi. 3. 31, 8. 29, कथंचिदारादपथेन निन्यिरे 12. 28; to a distant place, distant. –3 Far, from a distance; मेघमालेव यश्चायमारादिव विभाव्यते U. 2. 24. –4 Directly, immediately. –**Comp.** –**उपकारक** (fem. उपकारिका), (An अङ्ग) that subserves the purpose of the principal act only indirectly; द्विविधान्यङ्गानि आरादुपकारकाणि सामवायिकानि च। आरादुपकारकेभ्यः सामवायिकानि गरीयांसि। ŚB. on MS. 10. 4. 38; Also ŚB. on MS. 10. 1. 23. –**उपकारिणी** See आरादुपकारक. आरादुपकारिणी तु सा। ŚB. on MS. 8. 1. 32.

आरातीय *a.* [आरात्-छ; P. IV. 2. 104 Vārt.] 1 Near, proximate. –2 Remote, distant.

आरात्तात् *ind.* Ved. From a distant place.

आरातिः [आ-रा क्तिच्] An enemy.

आरात्रिकम् [अरात्रावपि निर्वृत्तं ठञ्] Waving a light (or the vessel containing it) at night before an idol (Mar. आरती ओंवाळणें); सर्वेषु चाङ्गेषु च सप्तवारान् आरात्रिकं भक्तजनस्तु कुर्यात्. –2 The light so waved; शिरसि निहितभारं पात्रमारात्रिकस्य भ्रमयति मयि भूयस्ते कृपार्द्रः कटाक्षः Śaṅkara.

आराध् 5, 10 P. 1 To propitiate, conciliate, please, try to win the favour of; परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा Bh. 3. 34, 2. 4–5; R. 1. 77, 81, 10. 86, 18. 23; Me. 47. –2 To honour, worship, respect. –3 To deserve, merit.

आराधक *a.* A worshipper.

आराधनम् 1 Pleasing, satisfaction, entertainment, gratification; येषामाराधनाय U. 1; यदि वा जानकीमपि, आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा 1. 12, 41. –2 Serving, worshipping, adoration, propitiation (as of a deity); आराधनायास्य सखीसमेताम् Ku. 1. 58; Bg. 7. 22; कृतमाराधनं रवेः Mb. –3 A means of pleasing; इदं तु ते भक्तिनम्रं सतामाराधनं वपुः Ku. 6. 73. –4 Honouring, respecting; सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि U. 4. 17. –5 Cooking. –6 Accomplishment, undertaking. –7 Acquirement, attainment; मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः Bh. 3. 4. –**ना** Service. –**नी** Worship, adoration, propitiation (of a deity).

आराधनीय, आराध्य *pot. p.* 1 Fit to be worshipped or propitiated; सोऽहं कथं नाम तवाचेरयमाराधनीयस्य ऋषेर्विधानम् R. 16. 82. –2 To become accomplished.

आराधयितृ *a.* An adorer, humble servant, worshipper; नन्वयमाराधयिता जनस्तव समीपे वर्तते Ś. 3; पितरमाराधयिता भव **V. 5.**

आराधित *a.* Propitiated; नाराधितो यैः पुरुषः प्रधानस्तेषां वृथा जन्म नराधिपानाम् Bhāg.; आराधितोऽपि नृपतिः परिसेवनीयः.

आराधयिष्णु *a.* Endeavouring to please, desirous of worshipping.

आरालिकः [अरालं कुटिलं चरति ठक्] 'One who deals crookedly', a cook; (धनलोभेन परप्रोत्साहितः पाचको विषादिसंसृष्टं पचतीति तस्य तथात्वम्) Kau. A. 1. 12.; आरालिको गोविकर्ता सूपकर्ता नियोधकः Mb. 4. 2. 9. (आरालिकोऽन्नपाकी स्यात् सूपकर्ता तु शाककृत् । तैलान्नं पचते यस्तु गोविकर्ता स उच्यते ॥ **-2** A controller of wild elephants; Mb. 4. 2. 9; (अराला मत्तगजास्तैः सह क्रीडति तान् जयति वा आरालिकः).

आरासः Tumultuous noise; ततमानवजारासा Śi. 11. 34.

आरिच् 7 U. To empty.

आरीण *a.* Completely dried; आरीणं लवणजलं समिद्ध-फल-बाण-विद्ध-घोर-फणि-वरम् Bk. 13. 4.

आरेकः [आ-रिच् घञ्] **1** Emptying. **-2** Contraction. **-3** Doubt. **-4** Excess.

आरेचित *a.* [अ-रिच्-णिच् क्त] **1** Emptied. **-2** Mixed. **-3** Contracted; आरेचितभ्रूचतुरैः कटाक्षैः Ku. 3. 5.

आरित्रिक *a.* [P. IV. 2. 116] Pertaining to an oar &c.

आरु 2 P. **1** To cry out, shout; Bk. 17. 24, to low (as cows). **-2** To praise.

आर (रा) वः [आ-रु-अप् पक्षे घञ्] **1** A cry, howling; वानराश्वकुरारवम् Rām. **-2** Sound; दधति दधनि धीरानारवान् वारिणीव Śi. 11. 8, 12. 18, नारावं व्यतनुत मेखलाकलापः 8. 45. Humming; प्रतिमिलिन्दमारावाः Viś. Guṇā. 167. **-3** N. of a people. **-Comp. -डिण्डिमः** A kind of drum; चण्डि रसितरशनारवडिण्डिममभिसर सरसमलज्जम् Gīt. 11. 6.

आराविन् *a.* Sounding, noisy; नूपुराराविणा M. 3. 16.

आरुतम Cry, Crying; निषेदुःशतशस्तत्र दारुणा दारुणारुताः Rām. 6. 106. 31.

आरुः [ऋ-उण्] **1** A hog. **-2** A crab. **-3** N. of a tree. **-रूः** *f.* A pitcher.

आरुकः A medicinal plant having cooling properties (growing on the Himālayas).

आरुच् *Caus.* To regard as pleasant, choose, like; वासं नारोचयेऽरण्ये Rām.

आरोकः **1** Shining through. **-2** Small points of light between the threads of a web.

आरोचन *a.* Shining.

आरुज्, -ज *a.* [आ-रुज्-क] **1** Distressing, giving pain. **-2** Killing, destroying, breaking; इन्द्र दृळ्हा चिदारुजम् Rv. 8. 45. 13.

आरुजत्नु *a.* Ved. Breaking; वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः Rv. 1. 6. 5.

आरुणि *a.* [अरुणस्य अपत्यं इञ्] Belonging to, or sprung from, Aruṇa, q. v.; औद्दालकिरारुणिर्मत्प्रसृष्टः Kaṭh. 1. 11. **-णिः** **1** N. of Uddālaka; उद्दालक आरुणिः Bṛi. Up. 3. 6. 1. **-2** Descendants of the sage अरुण; परिसरपद्धतिं हृदयमारुणयो दहरम् Bhāg. 10. 87. 18. **-3** The son of the sun, as Yama. **-4** The son of Vinatā (वैनतेय).

आरुणी *f.* Ved. 'The red one', a name given to the horses of the Maruts which are females; यदारुणीषु तविषीरयुग्ध्वम् Rv. 1. 64. 7.

आरुणेयः The son of आरुणि, श्वेतकेतु; श्वेतकेतुर्हारुणेय आस Ch. Up. 5. 3. 1; Bṛi. Up. 6. 1. 1.

आरुध् 7 U. **1** To keep or ward off, keep away, restrain; बन्धुता शुचमारुणत् Bk. 17. 49. **-2** To shut up, confine. **-3** To besiege. **-4** To hold fast, grasp. *-Caus.* To obstruct, impede, block, besiege.

आरोधनम् Ved. **1** Obstruction, means of obstruction. **-2** A secret place, innermost part.

आरुषी N. of a daughter of Manu and mother of और्व.

आरुष्करम् The fruit of the tree called भल्लातक q. v.

आरुह् 1 P. **1** To ascend, mount, bestride, get upon (with acc., sometimes loc.); सिंहासनमारुरोह K. 111; आरुरुहू रथादिषु Bk. 14. 8; आरूढकुलालचक्रमिव Mu. 5. 5; mounted on a potter's wheel; 7. 12. **-2** To ride upon, get ascendancy over, domineer over (fig.); वृषल भृत्यमिव मामारोढुमिच्छसि Mu. 3; Pt. 1. 36. **-3** To venture upon, undertake, enter upon, make; प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः Mu. 3. 30, 27; so यौवनारूढ, योगारूढ. **-4** To attain, gain, get to, reach; सौन्दर्यस्य पारमारूढा न वा Dk. 88; Ki 2. 13; तुलां यदारोहति दन्तवाससा Ku. 5. 34; आरुरोह कुमदाकरोपमाम् R. 19. 34. The senses of this root are modified according to the noun with which it is joined; आरूढरुषा Ku. 7. 67 excited to anger; तदागमारूढगुरुप्रहर्षः R. 5. 61; मन्त्रिपदमारूढः Mu. 6; तर्कारूढा 6. 19 engaged in guessing; Ś. 5. 9; शीघ्रं बुद्धिमारोहति Ś. B. strikes the mind; यौवनपदवीमारूढः attained his majority; अवस्थान्तरमारूढा M. 3; संशयं पुनरारुह्य H. 1. 7 running a risk; संशयमारुरोह शैलः Ki. 13. 16. *-Caus.* (रोह-प-यति) **1** To cause to go up or ascend, raise up, elevate; अमात्योऽस्मान्पुरातनीमवस्थामारोपयिष्यति Mu. 2 will raise or elevate; शूलानारोपयेत् Y. 2. 273; आरोपिता मनोविषयमात्मनः Ku. 6. 17. **-2** To cause to mount or sit (on oneself) (Ātm.); करेणुरारोहयते निषादिनम् Śi. 12. 5. **-3** To cause to grow, plant (lit). **-4** To establish, instal, seat (fig.); राज्ये चारोपिता वयम् Mu. 7. 18; इत्यारोपितपुत्रास्ते R. 15. 91. **-5** To cause, produce, bring out; उष्माणम् K. 105; प्रणयम् 134, 142; आरोपितप्रीतिरभूत् 173, 212; प्रतापमारोपयितुम् 110, 119 show or exhibit. -6 To place, fix, direct; अङ्कमारोप्य placing in the lap; R. 3. 26, 14. 27; Ku. 1. 37; चक्षुः° cast a look at; Pt. 1. 243; आशीर्वादमारोपयन्तः Ki. 18. 46 conferring or pronouncing; आभरणभारमङ्गेषु नारोपयन्ति K. 203 put or wear; पत्रे आरोपितं कुरु Ś. 6. commit to paper; आरोप्यते शिला शैले H. 2. 46. **-7** To entrust to, appoint to, charge with; मन्त्रिणि राज्यभारमारोप्य K. 57; अमात्यपदे आरोपितः Pt. 1. –8 To cause to go to or attain a particular state; करतलं कर्णपूरतामारोपितम् K. 60; आरोपय गरीयस्त्वम् 207 raise to greatness 315; Dk. 118. –9 To ascribe, attribute, impute; आत्मन्यारोपिताभिमानाः K. 108, 185; छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः R. 14. 40. –10 To string (as a bow); धनुरारोपयन् U. 4; तं देशमारोपितपुष्पचापे Ku. 3. 35; Bk. 14. 8.

आरुरुक्षु *a.* Wishing to ascend, mount or reach; कैलासगौरं वृषमारुरुक्षोः R. 2. 35; आरुरुक्षोर्मुनेर्योगम् Bg. 6. 3.

आरुह् *a.* Ved. Ascending; Rv. 1. 124. 7. *f.* 1 Excrescence. –2 A shoot (of a plant); यास्ते रुहः प्ररुहो यास्त आरुहः Av. 13. 1. 9.

आरुह *a.* [आ-रुह्-क] Ascending, mounting &c. **–हः** Ascent.

आरूढ *p. p.* 1 Mounted, ascended; seated on; आरूढो वृक्षो भवता Sk.; oft. used actively; आरूढमद्रीन् R. 6. 77; Me. 8, 18; Ś. 4; so वृक्षम्, नावम्, हयम्, रथम् &c.; चक्र°, दोला°. –2 Raised up, elevated on high. –3 Arisen, produced. **–ढम्** Ascending, mounting; see अत्यारूढ.

आरूढिः *f.* Ascent, mounting; rise, elevation (lit. and fig.); अत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा Ś. 4. v. l.

आरोढृ *a.* One who climbs, ascends.

आरोपः 1 Attributing the nature or properties of one thing to another; वस्तुन्यवस्त्वारोपोऽध्यारोपः Vedānta S.; attributing or assigning to, imputation; दोषारोपो गुणेष्वपि Ak. –2 Considering as equal; identification (as in सारोपा लक्षणा). –3 Superimposition. –4 Imposing (as a burden), burdening or charging with. –5 Placing in or upon. –6 Relating to. –7 Superior position.

आरोपक *a.* Placing, fixing, planting गृहसंवेशको दूतो वृक्षारोपक एव च Ms.

आरोपणम् 1 placing or fixing in or upon, putting; आर्द्राक्षतारोपणमन्वभूताम् R. 7. 28; Ku. 7. 88; (fig.) establishing, installing; अधिकारारोपणम् Mu. 3. –2 Causing to mount or ascend, raising (to heaven). –3 Planting. –4 The stringing of a bow. –5 Trusting, delivering.

आरोपयितृ *a.* One who places upon (his body), wears; न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः 3. 73. 22.

आरोपित *p. p.* 1 Raised, elevated. –2 Fixed, placed, made; आरोपितपर्याणं च त्वरिततुरगपरिचारकोपनीतमिन्द्रायुधम्; K. –3 Strung (as a bow). –4 Deposited, entrusted. –5 Consecrated, hallowed. –6 Accidental, adventitious, ascribed.

आरोहः [आ-रुह्-घञ्] 1 One who mounts, a rider, as in अश्वारोह, स्यन्दनारोह; सारोहाणां च वाजिनाम् Rām.; one who is seated in a carriage. –2 Ascent, rising, mounting, ascending, riding; आरोहे विनये चैव युक्तो वारणवाजिनाम् Rām. 2. 1. 28. –3 An elevated place, elevation, altitude; height; नगाद्यारोह; उच्छ्रायः Ak. Mb. 13. 147. 16. –4 Haughtiness, pride. –5 A mountain, a heap. –6 A woman's waist; the buttocks; सा रामा न वरारोहा Udb.; आरोहैर्निबिडबृहन्नितम्बबिम्बैः Śi. 8. 8.; Bhāg. 10. 6. 16. –7 Length. –8 A kind of measure. –9 A mine. –10 Descending.

आरोहक *a.* 1 Ascending, mounting, riding. –2 Raising up, elevating. –3 Rising. **–कः** A rider, driver; हस्त्यारोहकः Pt. 2. –2 A tree.

आरोहणम् 1 The act of rising, ascending, mounting; आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम् Ku. 1. 39. –2 Riding (on a horse &c). –3 A stair-case, ladder; अथारोहणमासाद्य वेदिकान्तरमाश्रितः Rām. 5. 10. 13. –4 The rising or growing of new shoots, growing (of plants). –5 A raised stage for dancing. –6 A carriage (Ved.).

आरोहणिक *a.* Relating to mounting or ascending.

आरोहिन् *a.* Ascending, mounting.

आरू *a.* Of a tawny colour. **–रू** *m.* 1 The tawny colour. –2 A hog; a crab; see आरु. –3 N. of a medicinal plant on the Himālaya.

आरे *ind.* Ved. 1 Far, far from, (with abl.). –2 Near. **–Comp.** **–अघ** *a.* Ved. having evil far removed; पूर्वीरिषो बृहतीरारेअघा Rv. 6. 1. 12. **–अवद्य** *a.* one from whom blame is far removed; हित्वी गयमारेअवद्य आगात् Rv. 10. 99. 5. **–शत्रु** *a.* one whose enemies are driven far away; आरेशत्रुं कृणुहि सर्ववीरम् Av. 7. 8. 1.

आरेवतः N. of a tree (आरग्वध q. v.). **–तम्** The fruit of this tree.

आरेहणम् Ved. Licking, kissing.

आरोग्यम् (अरोगस्य भावः ष्यञ्] Freedom from disease, good health; लघुत्वमारोग्यमलोलुपत्वम् Śvet. 2. 13. **–Comp.** **–अम्बु** *n.* Healthful water. **–चिन्तामणिः** N. of a work. **–प्रतिपद्व्रतम्** A ceremony for gaining health. **–शाला** *a* hospital.

आरोग्यय् Den. P. To wish health.

आर्कम् *ind.* as far as the sun; आकल्पमार्कमर्हन्भगवन्नमस्ते Bhāg. 10. 14. 40.

आर्किः [अर्कस्य अपत्यं इञ्] A son of अर्क, epithet of (1) Yama, (2) The planet Saturn, (3) Karṇa, (4) Sugrīva, (5) वैवस्वतमनु.

आर्क्ष (**क्षीं** *f.*) [ऋक्षस्येदं अण्] Stellar, regulated by stars or pertaining to them. **–र्क्षः** A son or descendant of *Rikṣa*; Rv. 8. 68. 16. **–Comp.** **–वर्षः** a stellar year or revolution of a constellation.

आर्क्षोद [ऋक्षोद-अण] Inhabiting the mountain Ṛikṣoda.

आर्गलः, –ली [अर्गलमेव स्वार्थे अण्] A bolt or bar; see अर्गलम्.

आर्ग्वध = आरग्वध. q. v.

आर्घा [आ-अर्घ-अच्] A kind of yellow bee.

आर्घ्य *a*. Relating to this bee. **–र्घ्यम्** Wild honey.

आर्च *a*. (**–र्ची** *f*.) [अर्चा अस्त्यस्य ण P. V. 2. 101] 1 Devout, worshipping, pious. –2 Relating to the Ṛik or Ṛigveda.

आर्चायण *a*. Existing in Ṛiks.

आर्चिक *a*. (**–की** *f*.) [ऋचि भवः, ऋचो व्याख्यानो ग्रन्थो वा ठञ्] Relating to the Ṛigveda, or explaining it.**–कम्** An epithet of the Sāma-Veda.

आर्चीक *a*. [ऋचीके पर्वते भवः अण्] Belonging to the ऋचीक mountain. **–कः** The mountain ऋचीक.

आर्जवम् [ऋजोर्भावः अण्] 1 Straightness; दूरं यात्युदरं च रोमलतिका नेत्रार्जवं धावति S. D. –2 Straightforwardness, rectitude of conduct, uprightness, honesty, sincerity, open-heartedness; आर्जवं कुटिलेषु न नीतिः; अहिंसा क्षान्तिरार्जवं Bg. 13. 7; 16. 1; 17. 4; 18. 42. क्षेत्रमार्जवस्य K. 45; Bh. 2. 22. –3 Simplicity, humility; कृतानुकारानिव गोभिरार्जवे Ki. 4. 13; Mv. 5. 46. –4 Front (Loc. आर्जवे straight in the front); देवदत्तस्यार्जवे ŚB. on MS. 1. 1. 15.

आर्जीक *a*. [ऋजीकस्येदं अण्] Belonging to the ऋजीक country, or a vessel called ऋजीक. **–कः** A lake in the ऋजीक country; (according to others) perhaps a milk-vessel or celestial-vessel in which the heavenly Soma is purified.

आर्जीकीय = आर्जीक *a*. **–या** 1 A terrestrial river. –2 N. of a river (विपाशा.); आर्जीकीये शृणुह्या सुषोमया Rv. 10. 75. 5.

आर्जुनायनाः N. of a people.

आर्जुनिः [अर्जुनस्य अपत्यं इञ्] The son of Arjuna, अभिमन्यु; अभिमन्युमिति प्राहुरार्जुनिं पुरुषर्षभम् Mb. 1. 221. 67.

आर्त *a*. [आ-ऋ-क्त] 1 Afflicted with, struck by, suffering from, pained by; सा त्रियामा तदार्तस्य चन्द्रमण्डल-मण्डिता Rām. 2. 13. 15; usually in comp., कामार्त, क्षुधार्त, तृषार्त &c. –2 Sick, diseased; आर्तस्य यथौषधम् R. 1. 28; Ms. 4. 236. –3 Distressed, afflicted, struck by calamity, oppressed, unhappy; आर्तो जिज्ञासुरर्थार्थी Bg. 7. 16; आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि Ś. 1. 11; R. 2. 28, 8. 31, 12. 10, 32. –4 Perishable (विनाशिन् अतोऽन्यदार्तम्) Bṛi. Up. 3. 4. 2. –5 Inconvenient; आर्ता यस्मिन् काले भवन्ति स आर्तः कालः । ŚB. on MS. 6. 5. 37. **–Comp. –नादः, –ध्वनिः, –स्वरः** a cry of distress, **–बन्धुः, –साधुः** a friend of the distressed.

आर्तिः *f*. [आ-ऋ-क्तिन्] 1 Distress, affliction, suffering, pain, injury (bodily or mental); आर्तिं न पश्यसि पुरूरवसस्तदर्थे V. 2. 16; आपन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् Me. 55. –2 Mental agony, anguish; उत्कण्ठार्ति Amaru. 44. v. l. –3 Evil, mischief. –4 Sickness, disease. –5 The end of a bow. –6 Ruin, destruction; दुःखार्तिप्रभवं सुखम् Mb. 12. 25. 22.

आर्तिमत् *a*. Suffering from pain, afflicted.

आर्तगलः N. of a tree नीलझिंटी (Mar. कोऱ्हांटी).

आर्तना Ved. 1 A mortal combat. –2 An uncultivated ground; Rv. 1. 127. 6.

आर्तव *a*. (**–वा–वी** *f*.) [ऋतुरस्य प्राप्तः, अण्] 1 Conforming or relating to the season; seasonal; अभिभूय विभूतिमार्तवीम् R. 8. 36, स्वयमङ्गेषु ममेदमार्तवम् Ku. 4. 68; लताभिः श्रीरिवार्तवी V. 1. 13; vernal; R. 9. 28, 48. –2 Menstrual, relating to or produced by this discharge. **–वः** A section of the year, a combination of several seasons (Ved.). **–वी** A mare. **–वम्** The menstrual discharge (of women), नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने Ms. 4. 40, 3. 48. –2 Certain days after menstrual discharge, favourable to conception. –3 Menstrual ablution; गिरिकायाः प्रयच्छाशु तस्या ह्यार्तवमद्य वै Mb. 1. 63. 55. –4 A flower.

आर्तवेयी A woman during her courses.

आर्त्निः The end of a bow.

आर्त्विजीन *a*. (**–नी** *f*.) [ऋत्विजं तत्कर्मार्हति खञ्] Fit for the office of a sacrificial priest (ऋत्विज्) दाक्षिण्यदिष्टं कृतमार्त्विजीनैः । Bk.

आर्त्विज्यम् [ऋत्विजो भावः कर्म वा ष्यञ्] The office of a priest, his rank; आर्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत Bṛi. Up. 1. 3. 25.

आर्थ *a*. (**–र्थी** *f*.) [अर्थादागतः अण्] 1 Relating to a thing or object. –2 Relating to, dependent on, sense (opp. शाब्द); आर्थी उपमा &c. –3 Material, significant.

आर्थपत्यम् Power over a thing, possession of a thing.

आर्थिक *a*. (**–की** *f*.) [अर्थं गृह्णाति ठक्] 1 Significant. –2 Wise. –3 Rich. –4 Substantial, real, material.

आर्द्र *a*. [आ-अर्द्–रक् दीर्घश्च Uṇ. 2. 18] 1 Wet, moist, damp; तन्त्रीमार्द्रां नयनसलिलैः Me. 88. 45; आर्द्राक्षतारोपणमन्वभूताम् R. 7. 28. –2 Succulent, living, not dry, green, juicy; आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा. –3 Fresh, new; कामीवार्द्रापराधः Amaru. 2; कान्तमार्द्रापराधम् M. 3. 12; R. 14. 4. आर्द्रमञ्जरी a cluster of fresh blossoms.–4 Soft, tender; oft. used with words like स्नेह, दया, करुणा in the sense of 'flowing with', 'moved', 'melted'; स्नेहार्द्रं हृदयम् a heart wet or melted with pity; करुणा°, दया°; प्रेमार्द्राः चेष्टाः Māl. 5. 7. –5 Full of feeling, warm. –6 Loose, flaccid. **–र्द्रा** N. of a constellation or the sixth lunar mansion so called (conisting of one star). [cf. Gr. *ardo*]. **–Comp. –एधाग्निः** *a* fire maintained by wet wood; यथैवार्द्रैधाग्नेः पृथग्धूमा विनिश्चरन्ति Śaṭ Br.; Bṛi. Up. 2. 4. 10. **–कपोलितः** The designation of an elephant in the second stage of rut. (cf. Mātaṅga L. 9, 13). **–काष्ठम्** green wood,

–दानु *a*. Ved. giving moisture.**–नयन** *a*. weeping.**–पटिन्** An exorciser clad in red cloth. **–पत्रकः** Bamboo. **–पदी** a woman with wet feet. **–पवित्र** *a*. Ved. having a wet strainer, epithet of the soma; सर्वदा वा एष युक्तग्रावार्द्रपवित्रः Av. 9. 6. 27. **–पृष्ठ** *a*. watered, refreshed; आर्द्रपृष्ठाः क्रियन्तां वाजिनः Ś. 1. **–भावः** **1** wetness, dampness. **–2** Tenderness of heart; धनुर्भृतोऽप्यस्य दयार्द्रभावम् R. 2. 11. **–माषा** *a*. leguminous shrub (माषपर्णी; Mar. रानउडीद). **–शाकम्** fresh ginger. **–लुब्धकः** (°र्द्रा° the dragon's tail or descending node, N. of Ketu.

आर्द्रता Wetness, moisture, freshness, tenderness, softness.

आर्द्रक *a*. (**–की** *f*.) [आर्द्रा-वुन्] Born under the constellation Ārdrā; cf. P. IV. 3. 28. **–कम्** Ginger in its undried state, wet ginger (Mar. आलें).

आर्द्रयति Den. P. To wet, moisten; केचिद् वृष्टिभिरार्द्रयन्ति वसुधाम् Bh. 2. 51.

आर्द्रिका Wet ginger.

आर्द्धम् Abundance.

आर्ध *a*. (Only used at the beginning of comp.) Half. **–Comp.** **–धातुक** *a*. (**–की** *f*.) (In gram.) applicable to half the root or to the shorter form of the verbal base. (**–कम्**) a name given to those terminations and affixes which belong to the six non-conjugational or general tenses (opp. सार्व. धातुक); cf. P. III. 4. 114, I. 1. 4; II. 4, 35; VII. 2. 35 &c. **–नारीश्वरम्** The story of the lord Śiva in his form as अर्धनारीश्वर. **–प्रस्थिक**, **–कंसिक** *a*. (**–की** *f*.) bought with half a Prastha or Kaṁsa. **–मासिक** *a*. (**–की** *f*.) lasting for half a month, observing or practising (penance &c.) for a fortnight. **–रात्रिकाः** (pl.) N. of an astronomical school who reckoned the beginning of the motions of the planets from midnight.

आर्धिक *a*. (**–की** *f*.) [अर्धमर्हति ठक्] Sharing half, relating to a half. **–कः** One who ploughs the land for half the crop; one born of a Vaiśya woman, and brought up by a Brāhmaṇa; Ms. 4. 253; see the quotation under अर्धिक.

आर्धुक *a*. (**–की** *f*.) Ved. Conducive to success, beneficial, profitable.

आर्पयितृ *m*. Ved. One who injures or hurts.

आर्भव *a*. (**–वी** *f*.) Belonging or sacred to the Ṛibhus.

आर्य *a*. [ऋ-ण्यत्] **1** Āryan, an inhabitant of आर्यावर्त, N. of the race migrated into India in Vedic times. **–2** Worthy of an Ārya. **–3** Worthy, venerable, respectable, honourable, noble, high; यदार्यमस्यामभिलाषि मे मनः Ś. 1. 22; R. 2. 33; so आर्यवेषः respectable dress; oft. used in theatrical language as an honorific adjective and a respectful mode of address; आर्यचाणक्यः, आर्या अरुन्धती &c.; आर्य revered or honoured Sir; आर्ये revered or honoured lady. The following rules are laid down for the use of आर्य in addressing persons:— (1) वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम्। (2) वयस्येत्युत्तमैर्वाच्यो मध्यैरार्येति चाग्रजः। (3) (वक्तव्यो) अमात्य आर्येति चेतरैः। (4) स्वेच्छया नामभिर्विप्रैर्विप्र आर्येति चेतरैः। S. D. 431. **–4** Noble, fine, excellent. **–र्यः** **1** N. of the Hindu and Iranian people, as distinguished from अनार्य, दस्यु and दास; विजानीह्यार्यान्ये च दस्यवः Rv. 1. 51. 8. **–2** A man who is faithful to the religion and laws of his country; कर्तव्यमाचरन् कार्यमकर्तव्यमनाचरन्। तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः॥ **–3** N. of the first three castes (as opp. to शूद्र). **–4** respectable or honourable man, esteemed person; वृत्तेन हि भवत्यार्यो न धनेन न विद्यया Mb.; परमार्यः परमां कृपां बभार Bu. Ch. 5. 6. **–5** A man of noble birth. **–6** A man of noble character. **–7** A master, owner. **–8** A preceptor; वैमानिकार्यसमभूमा Viś. Guṇā. 124; Mu. 3. 33. **–9** A friend. **–10** A Vaiśya. **–11** A father-in-law (as in आर्यपुत्र). **–12** A Buddha. **–13** (With the Buddhists) A man who has thought on the four chief principles of Buddhism and lives according to them. **–14** A son of Manu Sāvarṇa. **–र्या** **1** N. of Pārvatī. **–2** A mother-in-law. **–3** A respectable woman; यत्रार्या रुदती भीता पाण्डवानिदमब्रवीत् Mb. 3. 12. 87. **–4** N. of a metre; राजानमुद्दिश्य आर्यामिमां पपाठ K. °**गीतिः** *f*. A variety of the Āryā metre, see Appendix. **–5** That which comes from truth; आराद् याता तत्त्वेभ्य इति आर्या. **–र्यम्** **1** Virtue, sacredness; नहि दुष्टात्मनामार्यमावसत्यालये चिरम् Rām. 3. 50. 12. **–2** Discrimination (विवेक); कोपमार्येण यो हन्ति स वीरः पुरुषोत्तमः Rām. 4. 31. 6. **–Comp.** **–अष्टशतम्** title of a work of Ārya Bhaṭṭa consisting of eight hundred verses. **–आगमः** The approaching an Ārya woman sexually; अन्त्यस्यार्यागमे वधः Y. 2. 294. **–आवर्तः** [आर्या आवर्तन्ते अत्र] 'abode of the noble or excellent (Āryas)'; particularly N. of the tract extending from the eastern to the western ocean, and bounded on the north and south by the Himālaya and Vindhya respectively; cf. Ms. 2. 22; आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात्। तयोरेवान्तरं गिर्योः (हिमवद्विन्ध्ययोः) आर्यावर्तं विदुर्बुधाः॥; also 10. 34. **–गृह्य** *a*. [आर्यस्य गृह्यः पक्षः] **1** to be respected by the noble. **–2** a friend of the noble, readily accessible to honourable men; तमार्यगृह्यं निगृहीतधेनुः R. 2. 33. **–3** respectable, right, decorous. **–जुष्ट** *a*. liked by or agreeable to noble ones. **–देशः** a country inhabited by the Āryas. **–पुत्रः** **1** son of an honourable man. **–2** the son of a spiritual preceptor. **–3** honorific designation of the son of the elder brother; of a husband by his wife; or of a prince by his general &c. **–4** the son of the father-in-law, *i. e.* a husband (occurring in every drama; mostly in the vocative case in the last two senses). **–प्राय** *a*. **1** inhabited by the Āryas. **–2** abounding with respectable people; Ms. 7. 69. **–बलः** N. of a Bodhisattva. **–भट्टः** N. of a renowned astronomer, the inventor of Algebra among the Hindus; he flourished before the 5th century of the Christian era. Hence his work is called आर्यभटीय. **–भावः** honourable character or behaviour. **–मतिः** One having a noble intellect; संक्षिप्तमार्यमतिना Sāṅ. K. 71. **–मार्गः** the path or course of the respectable, a respectable way. **–मिश्र** *a.* respectable, worthy, distinguished. (**–श्रः**) a gentleman, a man of consequence; (pl.) **1** worthy or respectable men, an assembly of honourable men; आर्यमिश्रान् विज्ञापयामि V. 1. **–2** your reverence or honour (a respectful address); नन्वार्यमिश्रैः प्रथममेव आज्ञप्तम् Ś. 1; आर्यमिश्राः प्रमाणम् M. 1. **–युवन्** *m.* an Āryan youth. **–रूप** *a.* having only the form of an Āryan, a hypocrite, impostor; आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् Ms. 10. 57. **–लिङ्गिन्** *m.* an impostor; Ms. 9. 260. **–वाक्** *a.* speaking the Aryan language; म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः Ms. 10. 45. **–वृत्त** *a.* virtuous, good, pious; Ms. 9. 253; R. 14. 55. (**–त्तम्**) the conduct of an Āryan or nobleman; Ms. 4. 175. **–वेश** *a.* well-clothed, having a respectable dress, fine. **–व्रत** *a.* observing the laws and ordinances of the Āryans or noblemen. (**–तम्**) the duty of an Aryan. **–शील** *a.* Having an honest character. **–श्वेतः** a noble or honourable man. **–संघः** the whole body of the Āryans, especially Buddhists; it is also the name of a renowned philosopher (founder of the school of Yogāchāras). **–सत्यम्** a noble or sublime truth; (there are four such truths forming the chief principles of Buddhism. In Pāli they are called चत्तारि अरियसच्चानि. They are, (1) life is suffering, (2) Desire of life is the cause of suffering, (3) Extinction of that desire is the cessation of suffering, (4) The eightfold path leads to that extinction). **–सिद्धान्तः** N. of a work of आर्यभट्ट. **–स्त्री** An Āryan woman, or a woman of the first three castes. **–हलम्** *ind.* forcibly. **–हृद्य** *a.* liked by the noble.

आर्यकः [आर्य-स्वार्थे-कन्] **1** An honourable or respectable man. **–2** A grandfather; बलेन गुप्तो भरतो महात्मा सहार्यकस्यात्मसमैरमात्यैः Rām. 2. 70. 30. **–3** N. of a cowherd who became a king; cf. Mk. 7. **–कम्** A ceremony performed to the Manes or the vessel used in sacrifices to the Manes.

आर्यका, आर्यिका 1 A respectable woman. **–2** N. of a Nakṣatra. **–3** N. of a river; Bhāg.

आर्यवम् Honourable beheviour; honesty.

आर्वाक् *ind.* After, afterwards; behind.

आर्श *a.* Belonging to the antelope.

आर्ष *a.* (**–र्षी** *f.*) [ऋषेरिदं अण्] **1** Used by a Ṛiṣi only, relating or belonging to sages, beneficial to sages; शमो दमस्तथा धैर्यं सत्यं शौचमथार्जवम्। यज्ञो धृतिश्च धर्मश्च नित्यमार्षो विधिः स्मृतः॥ Mb. 12. 12. 17; archaic, Vedic (opp. लौकिक or classical); आर्षः प्रयोगः; संबुद्धौ शाकल्यस्येतावनार्षे P. I. 1. 16 Sk.; आर्षो धर्मः Ms. 3. 29; Y. 1. 59; आर्षः प्रत्ययः P. II. 4. 58. **–2** Sacred, holy, divine, superhuman; आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम् Rām. 6. 128. 105; U. 6. **–र्षः** A form of marriage derived from the Ṛiṣis; one of the eight forms of marriage in which the father of the bride receives one or two pairs of cows from the bridegroom; आदायार्षस्तु गोद्वयम् Y. 1. 59; Ms. 3. 53, 9. 196; for the names of the 8 forms see उद्वाह; आर्षोढा a wife married according to this form. **–र्षी** A class of Vedic metres. **–र्षम् 1** The holy text, the Vedas; आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना Ms. 12. 106. **–2** Sacred descent. **–3** Derivation (of a poem) from a Ṛiṣi author. **आर्षधरम्** N. of a Sāman.

आर्षिक्यम् (= आर्षो धर्मः) The धर्म as laid down by the Ṛiṣis.

आर्षेय *a.* (**–यी** *f.*) [ऋषि-ढक्] **1** Relating to a Ṛiṣi. **–2** Worthy, venerable, respectable. **–यम् 1** Sacred descent; नानार्षेयप्रवरान्समेतानभ्यर्च्य राजा शिरसा ववन्दे Bhāg. 1. 19. 11. **–2** A collection of Ṛiṣis (ऋषिसमूहः).

आर्षभ *a.* (**–भी** *f.*) [ऋषभ-अण्] Derived from or produced by a bull; मोघं स्कन्दितमार्षभम् Ms. 9. 50.

आर्षभिः N. of king Bharata.

आर्षभ्यः [ऋषभ-ञ्य] A steer sufficiently full-grown to be used or let loose, one fit to be castrated.

आर्हत *a.* (**–ती** *f.*) [अर्हत्-अण्] Belonging to the Jaina doctrines. **–तः 1** A Jaina, a follower of Jaina doctrines. **–2** A Buddhist. **–तम्** The doctrines of Jainas.

आर्हत्यम् The quality or practice of an Arhat.

आर्हन्ती, –न्त्यम् [P. V. 1. 124 Vārt.] Fitness; श्रौत्रार्हन्ती चणैर्गुण्यैर्महर्षिभिरहार्निशम् Sk.

आल *a.* [आ-अल्-पर्याप्तौ अच्] Large, extensive. **–लः, –लम् 1** Spawn, any discharge of venomous matter from poisonous animals; °अक्त anointed with poison as an arrow. **–2** Trick, fraud; येषां श्रुतमालजालाय K. 288; °जालानि चिन्तयन्ती 310. **–3** Yellow arsenic, orpiment.

आलकन्दकम् a variety of coral (प्रवालकम्) Kau. A. 2. 11.

आलक्ष् 10 U. To descry, behold.

आलक्षि *a.* [लक्ष्-इन्] Knowing, seeing.

आलक्ष्य *pot. p.* **1** Visible, apparent; आलक्ष्यपारिप्लवसारसानि R. 13. 30. **–2** Slightly visible; °दन्तमुकुलान् Ś. 7. 17.

आलक्षण्यम् [अलक्षणस्य भावः ष्यञ्] Misfortune, crime.

आलग्न *a.* Adhered, clung to.

आलगर्दः [अलगर्द एव स्वार्थे अण्] A water cobra.

आलप् 1 P. To address, speak to, converse; कमालपामि K. 164; तस्या नामधेयेन भर्त्रा देव्यालपिता V. 2 addressed. –*Caus.* To talk with, engage in conversation with, to question; यदा कश्चित्त्वामालापयिष्यति Pt. 5, 1. 387; K. 188.

आलापः 1 Talking, speaking to, speech, conversation; अये दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते Ś. 1; प्रवसनालाप Amaru. 54; ललितालापे Śrut. 36. **–2** Narration, mention. **–3** The seven notes in music (Mar. सा, रि, ग, म, प, ध, नि). **−4** Statement of a question in an arithmetical or algebraical sum. **−5** A question. **−पा** A particular मूर्च्छना or melody in music.

आलापन *a.* Causing to speak or converse with. **−नम्** **1** Speaking to, conversation. **−2** Congratulation (स्वस्तिवाचनम्); benediction; मङ्गलालापनैर्होमैः शोभिताः क्षौमवाससः Rām. 1. 77. 12.

आलाप्य, −लापनीय *pot. p.* To be spoken to, conversed with or narrated.

आलापिन् *a.* Speaking to, conversing with. **−नी** A lute made of a gourd.

आलभ् 1 Ā. **1** To touch; गामालभ्यार्कमीक्ष्य वा Ms. 5 87, 4. 117; Bk. 14. 91; सत्येनायुधमालभे; सत्येन (सत्यं) आत्मानमालभे Mb. **−2** To get, attain to; अतितरां कान्तिमालप्स्यते ते (वपुः) Me. 15 v. l.; Kām. 9. 63. **−3** To kill, immolate (as a victim in sacrifices); प्रातर्वै पशूनालभन्ते Śat. Br.; गर्दभं पशुमालभ्य Y. 3. 280. **−4** To take hold of, seize, grasp, handle. **−5** To gain or win over. *−Caus.* **1** To touch. −**2** To commence.

आलब्ध *p. p.* **1** Touched; united or in contact with. **−2** Killed. **−3** Gained, Conciliated; एवं सामभिरालब्धः श्वफल्कतनयो मणिम् Bhāg. 10. 57. 40.

आलब्धिः *f.* **1** Touching. **−2** Killing; immolation.

आलभनम् **1** Taking hold of, seizing. **−2** Touching. **−3** Killing.

आलभ्य, आल (लम्) भनीय *pot. p.* To be killed or sacrificed; to be touched or rubbed.

आलम्भः, −म्भनम् [आ-लभ् घञ् ल्युट् मुम्] **1** Taking hold of, seizing, touching; स्त्र्यालोकालम्भविगमः Y. 3. 157; Ms. 2. 179. **−2** Tearing off, uprooting (of plants); Ms. 11. 144. **−3** Killing (especially an animal at a sacrifice); अश्वालम्भं गवालम्भम् Ādipurāṇa; आलम्भयज्ञाः क्षत्राश्च हविर्यज्ञा विशः स्मृताः। परिचारयज्ञाः शूद्रास्तु तपोयज्ञा द्विजातयः ॥ Mb. 12. 232. 31.

उद्वृत्त *p. p.* 1 Raised, elevated (स्तन, दन्त, मेघ &c.). गर्जन्तमुद्वृत्तशिताग्रदंष्ट्रम् Rām. 6. 59. 95. –2 Flowing out, not contained in, swollen, overflowing; हृदयभारितोद्वृत्तविस्मय Mal. 4; अपामुद्वृत्तानाम् Mu. 3. 8 overflowing; उद्वृत्तः क इव सुखावहः परेषाम् Śi. 8. 18. (where उ° means also 'gone astray, ill-behaved'). –3 Grown, increased. –4 Exalted, prosperous. –5 Proud, furious, haughty; परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ Bhāg. 10. 41. 35. °मृगपति K. 90. –6 Vomited up. –7 Left as a remainder. –8 Ill-conducted, ill-mannered, rude. –9 Agitated;

उद्वृत्तनक्रात् सहसोन्ममज्ज R. 16. 79. **-10** Turned up, opened wide (as eyes). **-त्तः** A particular position of the hands in dancing. **-त्तम्** (in astronomy) The east and west hour circle or six o'clock line.

उद्वृषभयज्ञः A religious act performed by the persons that hail from North India; ये उदीच्या इति समाख्यातास्ते उद्वृषभयज्ञादीन् (करिष्यन्ति) ŚB. on MS. 1. 3. 19.

उद्वृह् 6 P. **1** raise up, elevate. **-2** To draw up, eradicate, uproot. उद्वृह रक्षः सहमूलमिन्द्र Rv. 3. 30. 17. **-3** To draw out (a sword from the scabbard).

उद्वर्हित *a.* Drawn up; eradicated.

उद्वेग See under उद्विज्.

उद्वेदि *a.* [उन्नता वेदिर्यत्र] Having a raised seat or throne in it; विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठितम् R. 17. 9.

उद्वेपः Shaking, trembling, excessive tremor.

उद्वेल *a.* [उत्क्रान्तो वेलाम्] **1** Overflowing its banks (as a river); भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः R. 10. 34; K. 333. ते ततोऽत्यर्थमुद्वेले स्वनन्त्यौ भृशभीषणे Śiva. B. 24. 57. **-2** Transgressing the porper limits. **-3** Excessive; K. 138. **-लः** Growth; Mb. 5. 160. 121.

उद्वेल्ल् 1 P. **1** To shake, wave; Māl. 2, 6; उद्वेल्लद्बालकदली Ratn. 2. **-2** To roll or move about, turn round; उद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः U. 2. 29; Mv. 5. 2; Māl. 8. 9.

उद्वेल्लित *p. p.* Shaken, tossed up. **-तम्** Shaking.

उद्वेष्ट *a.* Investing, surrounding, covering on all sides. **-ष्टः 1** Surrounding. **-2** Investing or besieging (as a town &c.). **-3** Devastating. **-4** Overcoming in battle.

उद्वेष्टन *a.* **1** Loosened; कयाचिदुद्वेष्टनवान्तमाल्यः R. 7. 6; Ku. 7. 57. **-2** Freed from bonds, unfettered, unbound. **-नम् 1** The act of surrounding or enclosing. **-2** An enclosure, fence. **-3** A pain in the buttocks or back of the body; हृदय° convulsive pain in the heart.

उद्वेष्टनीय *a.* To be unbound, unfastened; आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा, शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् Me. 93.

उद्वेष्टयति Den. P. To open, unfasten, untie.

उद्वेष्टित *a.* Surrounded, invested.

उद्व्युदस् 1 P. [उद्-वि-उद्-अस्] To give up wholly or completely; युष्मत्कथामृतानिषेवक उद्व्युदस्येत् Bhāg. 4. 7. 44.

उधस् An udder; see ऊधस्.

उध्रस् 9., 10. P. उध्रंस्नाति, उध्रासयति) **1** To glean or gather little by little at a time. **-2** To throw or cast upwards.

उन्द् 7 P. [उनत्ति, उन्दाञ्चकार, औन्दीत्, उन्दितुम्, उत्त-उन्न; P. III. 3. 56] **1** To wet, moisten, bathe; याः पृथिवीं पयसोन्दन्ति. **-2** To flow or issue out, spring (as water). *-Caus.* (aor. औन्दिदत्) To wet. *-desid.* (उन्दिदिषति) [cf. L. *unda*].

उन्दनम् Moistening, wetting, Bhāg. 3. 26. 43.

उन्न *p. p.* **1** Wet, wetted, moist. **-2** (fig.) Kind, moved to pity.

उन्दरुः, उन्दुरः, उन्दुरुः, उन्दूरुः [उन्द्-उर-उरु वा] A mouse, rat. **-Comp. -कर्णी, -कर्णिका** the plant Salvinia Cuccullata. (Mar. उन्दीरकानी).

उन्नद् 1 P. To roar or bellow aloud, sound, roar (in general); असोढसिंहध्वनिरुन्ननाद Ku. 1. 56; कालमेघ इवोन्नदन् Mb.

उन्नादः 1 Crying out, roar, humming, chirping &c. **-2** N. of a son of Kṛiṣṇa; Bhāg.

उन्नम् 1 P. **1** (*a*) To rise, appear; उन्नम्योन्नम्य लीयन्ते दरिद्राणां मनोरथाः Pt. 2. 95. (*b*) To hang over, arise, impend; उन्नमत्यकालदुर्दिनम् Mk. 4, 5 an untimely storm impends; बहलोन्नमदम्बुधराः Māl. 9. 18. (*c*) To rise, ascend, go up (fig. also); उन्नमति नमति वर्षति गर्जति मेघः Mk. 5. नम्रत्वेनोन्नमन्तः Bh. 2. 69. **-2** To bend up, raise, elevate, erect; द्यौरुन्ननामेव दिशः प्रसेदुः Ki. 16. 35. *-Caus.* (नमयति) **1** To bend upwards, raise, erect; मुखमुन्नमय्य Ku. 7. 23; Ś. 3. 25; R. 1. 41. **-2** (fig.) To elevate, raise to eminence; उन्नमय बन्धुवर्गम् K. 109.

उन्नत *p. p.* **1** Raised, elevated, uplifted (fig. also); त्रिरुन्नतं स्थाप्य समं शरीरम् Śvet. Up. 2. 8; उपासितगुरुप्रज्ञाभिमानोन्नताः Bh. 3. 24; Śi. 9. 79; नतोन्नतभूमिभागे Ś. 4. 15. **-2** High (fig. also), tall, lofty; great, eminent; स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना R. 1. 14; V. 5. 22; Ki. 5. 15, 14. 23; Pt. 1. 29; °इच्छः R. 6. 71; Śi. 7. 27; °चेतस् *a.* noble-minded; Pt. 1. 122. **-3** Projecting, plump, full (as breasts); निबिडोन्नतस्तनम् M. 2. 3; Ṛs. 1. 7. **-4** Pleased, in high spirit; समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः Rām. 5. 61. 5. **-तः** A boa (अजगर). **-तम् 1** Elevation. **2** Ascension, altitude. **-Comp. -आनत** *a.* elevated and depressed, uneven, high and low; बन्धुरं तून्नतानतम् Ak. **-कालः** A method of determining the time from the shadow. **-कोकिला** A kind of musical instrument. **-चरण** *a.* with uplifted paws, rampant. **-नाभि** *a.* having a projecting navel, *i. e.* corpulent, fat. **-शिरस्** *a.* carrying the head high, holding up the head, proud.

उन्नतत्वम् Height, sublimity, majesty; तदेव नैसर्गिकमुन्नतत्वम् R. 5. 37.

उन्नतिः *f.* **1** Elevation, height (fig. also); see उन्नतिमत् below. **-2** Exaltation, dignity, rise, prosperity, increase; स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् Pt. 1. 150; ध्वजानामुन्नतिः K. 55; Śi. 16. 22, 72; Bv. 1. 40; महाजनस्य संपर्कः कस्य नोन्नतिकारकः H. 3. v. 1.; मान° Bh. 2. 23. **-3** Raising. **-4** The wife of Garuḍa. **-5** N. of a daughter of दक्ष and wife of धर्म. **-Comp. -ईशः** N. of Garuḍa (Lord of उन्नति).

उन्नतिमत् *a.* **1** Elevated, projecting, plump (as breasts); सा पीनोन्नतिमत्पयोधरयुगं धत्ते Amaru 34; Śi. 9. 72. **–2** High, sublime.

उन्नमनम् **1** Raising, lifting up. **–2** Height, elevation.

उन्नमित *p. p.* **1** Raised, lifted up. प्रयत्नोन्नमिता नमत्फणैः K. **–2** Heightened, increased, proved to be superior; °उपदेशः M. 3.

उन्नम्र *a.* Erect, upright, lofty, high (fig. also); उन्नम्रताम्रपटमण्डपमाण्डितं तत् Śi. 5. 68; °ता erectness, uprightness (of the body).

उन्नामः Raising, lifting up; शतबुद्धिः कृतोन्नामः Pt. 5. 45 lifted up.

उन्नय, –यनम् See under उन्नी.

उन्नस *a.* [उन्नता नासिका यस्य] P. V. 4. 119 Having a prominent nose; सुकपोलोन्नसाननम् Bhāg. 8. 8. 42. उन्नसं दधती वक्त्रम् Bk. 4. 18.

उन्नह् 4 P. **1** To tie up, bind up, fasten round. **–2** To draw out, pull out. **–3** To come out of, rise from.

उन्नद्ध *p. p.* **1** Tied or bound up, fastened; तेऽस्य मुक्तागुणोन्नद्धं मौलिमन्तर्गतस्रजम् R. 17. 23; 18. 50; Ku. 3. 46. **–2** Swelled, increased, heaving; श्वासोन्नद्धपयोधर Gīt. 12. **–3** Unbound. **–4** Elated, flushed with; वीर्य°, मद°, बल° &c.

उन्नहन Unfettered, unbound; नैवान्यतः परिभवोऽस्य भवेत्कथंचिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यम् Bhāg 11. 1. 4.

उन्नाहः **1** Projection, protuberance; स्तन° Māl. 9; rise; बलाहक° K. 26. **–2** Tying up. **–3** Excess, abund; नरकस्तमउन्नाहो Bhāg. 11. 19. 43. **–4** Impudence, haughtiness; N. **–हम्** Sour gruel made from the fermentation of rice.

उन्नाभ *a.* **1** Having a projecting navel, corpulent. **–भः** N. of a king of the Solar race.

उन्नाल *a.* With the stalk prominently appearing; Māl. 9. 13.

उन्निद्र *a.* [उद्गता निद्रा यस्य] **1** Sleepless, awake, without one wink of sleep; तामुन्निद्रामवनिशयनां सौधवातायनस्थः Me. 90; विगमयत्युन्निद्र एव क्षपाः Ś. 6. 5; Mu. 4. 2; Māl. 3. **–2** Expanded, full-blown, budded (as lotuses); °अरविन्दम् K. 22; उन्निद्रपुष्पाक्षिसहस्रभाजा Śi. 4. 13, 31; 8. 28. **–3** Shining (as the moon). **–4** Bristling (as hair).

उन्निद्रकम्, उन्निद्रता *f.* Sleeplessness.

उन्नी 1 P. **1** To lead upwards, bring up; ऊर्ध्वं प्राणमुन्नयति Kaṭh. 2. 5. 3; ब्रह्मादित्य मुन्नयति Mb. 3. 313. 46. **–2** To raise, erect, lift up; (Ā.) दण्डमुन्नयते Sk.; स्वदंष्ट्रोन्नीतधरो वराहः Bhāg. **–3** To bring out of, free from, help, rescue, redeem; रसाया लीलयोन्नीतां उर्वीम् Bhāg. **–4** To draw up (as water); वने निपूतं वन उन्नयध्वम् Rv. 2. 14. 9. **–5** To stroke; straighten out. **–6** To lead out or aside, lead away; एकान्तमुन्नीय Mb. **–7** To press out, extract. **–8** To infer, ascertain, guess, conjecture; कथमपि स इत्युन्नेतव्यस्तथापि दृशोः प्रियः U. 3. 22, 1. 29, 6. 26; V. 4; प्रकृतिप्रत्ययाद्यर्थैः संकीर्णे लिङ्गमुन्नयेत् Ak. **–9** To fill completely. **–10** To lead off (in singing), काचित्समं मुकुन्देन स्वरजातीरमिश्रिताः। उन्निन्ये पूजिता तेन प्रीयतां साधुसाध्विति॥ Bhāg. 10. 33. 10. **–11** To lead aside, separate; दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः Bhāg. 7. 2. 21.

उन्नयः, उन्नायः P. III. 3. 26. अवोदोर्नियः **1** Raising, elevating. **–2** Height, elevation. **–3** Analogy, resemblance. **–4** Inference, induction, conclusion. **–5** A heap. उन्नायानधिगच्छन्तः प्रद्रावैर्वसुधाभृताम् Bk. 7. 37.

उन्नयन *a.* With the eyes raised upwards; पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः R. 4. 3. **–नम्** **1** Raising, elevating, lifting up. **–2** Drawing up water. **–3** The vessel out of which a fluid is taken. **–4** Leading away, extracting. **–5** Making straight, smoothing; सीमन्त°. **–6** Deliberation, discussion. **–7** Inference; श्रवणादनु पश्चादीक्षा अन्वीक्षा उन्नयनम्.

उन्नायक *a.* **1** Raising, lifting up. **–2** What leads to an inference or conclusion.

उन्नेतृ *a.* **1** Raising, leading up. **–2** Leading to an inference. *m.* One of the 16 priests at a sacrifice.

उन्नेत्रम् The office of the उन्नेतृ.

उन्नेय *a.* To be inferred or ascertained by analogy; Śivamahimna Stotra 17; परेषामुन्नेयो भवति U.

उन्मज्ज् (मस्ज्) 6 P. To emerge, rise up; वन्यः सरित्तो गज उन्ममज्ज R. 5. 43, 16. 79; उन्ममज्ज शनकैस्तुहिनांशुः Ki. 9. 23; Ś. 7. 8; Śi. 9. 30.

उन्मज्जक *a.* Emerging, rising up. **–कः** A kind of ascetic; कण्ठदघ्ने जले स्थित्वा तपः कुर्वन् प्रवर्तते। उन्मज्जकः स विज्ञेयस्तापसो लोकपूजितः॥; दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे Rām. 3. 6. 3.

उन्मज्जनम् Emerging, coming out of water. सलिलोन्मज्जनमुज्झति स्फुटम् N. **–नः** An attendant of Śiva.

उन्मणिः *m.* A gem lying on the surface; अकृष्टपच्यौषधयो गिरयो बिभ्रदुन्मणीन् Bhāg. 10. 27. 26.

उन्मण्डलम् An imaginery circle going from South to North and meant for measuring the day; the east and west circle; Sūrya.

उन्मथ्, उन्मन्थ् 1., 9. P. **1** To shake up, disturb, excite, stir; pain. **–2** To strike, kill, destroy; मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम् Pt. 2. 34; धैर्यमुन्मथ्य Māl. 1. 18; विकल्पनिद्रामुन्मथ्य Prab. **–3** To tear, cut off, peel off; वन्यद्विपेनोन्मथिता त्वगस्य R. 2. 37. **–4** To mix.

उन्मथन *a.* Tearing, disturbing, paining. **–नम्** **1** Shaking off, throwing off or down. **–2** Killing, slaughter; अन्योन्यसूतोन्मथनात् R. 7. 52.

उन्मन्थः 1 Agitation, disturbance. **-2** Killing, slaughter. **-3** A disease of the outer ear.

उन्मन्थक *a.* 1 Shaking off, agitating, stirring. **-2** Throbbing, beating. **-कः** Inflammation of the outer ear.

उन्मन्थनम् 1 Shaking off, agitating. **-2** Killing, slaughter; अन्योन्यसूतोन्मथनादभूताम् R. 7. 52; hurting; मारीचदर्शनं चैव सीतोन्मथनमेव च Rām. 6. 124. 11. **-3** Beating (with a stick). **-4** Probing, stirring a dart lodged in the body. **-5** The instrument used for this purpose. **-6** Churning up; कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे Bhāg. 11. 4. 18.

उन्माथ *a.* Destroying or Killing. **-थः** 1 Torment, pang, deep pain; °वेगाः Māl. 9. 45. **-2** Shaking, agitation. **-3** Killing, slaughter. **-4** A snare or trap; प्रयोजयति चोन्माथं नित्यमस्तं गते रवौ Mb. 12. 138. 23.

उन्माथिन् *a.* 1 Shaking, agitating. -2 Tormenting. excruciating; चिरमविरतोन्माथी (अनङ्गमहाज्वरः) Māl. 9. 10.

उन्मद् 4 P. 1 To be or become mad. **-2** To delight, gratify. *-Caus.* (°न्म-न्मा-दयति) 1 To madden, inebriate, render drunk (lit. and fig.); लक्ष्म्योन्मादिताः K. 107; Ki. 4. 16. **-2** To excite, agitate; उन्मादयत मरुत उदन्तरिक्ष मादय Av. 6. 130. 4.

उन्मत्त *p. p.* 1 drunk, intoxicated. **-2** Insane, frantic, mad; द्वावत्रोन्मत्तौ V. 2; अहो उन्मत्तास्मि संवृत्ता U. 3, 5. 30; Ś. 6; Ms. 9. 79. **-3** (*a*) Puffed, elevated. (*b*) Furious, wild; मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः Pt. 1. 161; U. 2; Śi. 6. 31. **-4** Possessed by a ghost or an evil-spirit; Y. 2. 32; Ms. 3. 161 (वातपित्तश्लेष्मसंनिपातग्रहसंभवेनोपसृष्टः Mitā.). **-5** Very great, abnormal. उन्मत्तवेगाः प्लवगा मधुमत्ताश्च हृष्टवत् Rām. 5. 62. 12. **-त्तः** 1 the thorn apple (धत्तूर); N. of another tree (मुचकुन्द). **-2** N. of one of the eight forms of Bhairava. **-Comp. -कीर्तिः, -वेशः** N. of Śiva. **-गङ्गम्** N. of a country (where the Gaṅgā roars furiously along). **-दर्शन, -रूप** *a.* maniac-like, mad in appearance. **-प्रलपित** *a.* spoken in drunkenness or madness. (**-तम्**) the words of a madman. **-भैरवः** A form of Bhairava. °वी A form of Durgā. **-लिङ्गिन्** *a.* pretending to be mad.

उन्मत्तक *a.* 1 Insane, mad. **-2** Drunk, intoxicated.

उन्मद *a.* 1 Intoxicated, drunk; उदीरयामासुरिवोन्मदानाम् R. 2. 9, 16. 54. **-2** Mad, furious, extravagant; Śi. 10. 4; उन्मदसारसारवः 12. 44, 77; 16. 59. **-3** Causing intoxication, intoxicating; मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे Śi. 6. 20. **-दः 1** Insanity. **-2** Intoxication, ecstacy; कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन्किल यस्य गोपवध्वः Bhāg. 1. 9. 40.

उन्मदन *a.* [उद्भूतो-मदनोऽस्य] Affected or inflamed with love; तदाप्रभृत्युन्मदना बभूव Ku. 5. 55.

उन्मदिष्णु *a.* 1 Mad, insane. **-2** Intoxicated, drunk. **-3** In rut (as an elephant); व्यालद्विपा यन्तृभिरुन्मदिष्णवः कथंचिदारादपथेन निन्यिरे Śi. 12. 28.

उन्माद *a.* 1 Mad, insane. **-2** Extravagant. **-दः 1** Madness, insanity; अहो उन्मादः U. 3; Māl. 9. **-2** Intense passion, intoxication or extravagance of love; Māl. 3, 2. 11; वीररभसोन्मादः Mv. 2. 22 rapturous joy. **-3** Lunacy, mania (considered as a disease of the mind); मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः । मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः ॥ Suśr. **-4** (In Rhet.) Madness considered as one of the 33 subordinate feelings; चित्तसंमोह उन्मादः कामशोकभयादिभिः S. D. 3; or according to R. G. विप्रलम्भमहापत्तिपरमानन्दादिजन्माऽन्यस्मिन्नन्यावभास उन्मादः. **-5** Bloom; उन्मादं वीक्ष्य पद्मानाम् S. D. 2. **-6** A kind of पिशाच; Bhāg. 2. 10. 39.

उन्मादकः N. of the plant धत्तूर.

उन्मादन *a.* Maddening, exciting, intoxicating. **-नः** One of the five arrows of Cupid.

उन्मादयितृक *a.* Intoxicating, enrapturing; Ś. 1.

उन्मादिन् *a.* Mad, intoxicated. उन्मादिनो मातुलपुत्रकस्य कथं सहामो वनकण्टकित्वम् Udb.

उन्मादुक *a.* Fond of drinking (Ved.).

उन्मनस्, -नस्क *a.* [उद्भ्रान्तं मनोऽस्य] **1** Excited or disturbed in mind, perplexed, agitated, uneasy; उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः R. 11. 22; Ki. 14. 45. **-2** Regretting, repining for a lost or departed friend. **-3** Anxious, eager, impatient; गन्तुं पावकमुन्मनस्तदभवत् Bh. 2. 75. **-4** Proud (मनस्विन्); मुदमायातु नितान्तमुन्मनाः Śi. 16. 3 (where it also means "anxious").

उन्मनायते Den. Ā., **उन्मनीभू** 1 P. To become excited or disturbed in mind, be uneasy, regret; अस्मद्विना मा भृशमुन्मनीभूः Ki. 3. 39.

उन्मनी अस् 1 To become perplexed, excited. **-2** To become absent-minded; Kāśi. on P. V. 4. 51. **-3** To be one with god.

उन्मनीकृ 8 U. To make excited, disturb; तमृतुगणः क्षणमुन्मनीचकार Ki. 10. 37.

उन्मनीभू To be excited, disturbed.

उन्मनीभावः Absence of mind; यद्वा यात्युन्मनीभावम् Brahmamet. Up. 4.

उन्मयूख *a.* Shining, radiant; प्राप्येन्द्रनीलं किमुतोन्मयूखम् R. 16. 69.

उन्मर्दनम् 1 Rubbing, kneading. **-2** A fragrant essence used for the purpose of rubbing. **-3** Act of purifying air.

उन्मा Ved. A measure.

उन्मानम् 1 Weighing, measuring upwards; ऊर्ध्वमानं किलोन्मानम्; Mbh. V. 1. 19 Vart. **–2** A measure of size or quantity. **–3** Price. **–4** Measurement of thickness or diameter.

उन्मित *a.* Measured.

उन्मितिः *f.* Measure; price.

उन्मेय *a.* To be weighed; what is weighed. **–यम्** Weight, burden.

उन्मार्ग *a.* [उत्क्रान्तः मार्गात्] Going to a wrong path. **–र्गः 1** A wrong road, deviation from the right road (fig. also); नित्यमुन्मार्गगामिनाम् Pt. 1. **–2** An improper conduct, evil course, moral turpitude; उन्मार्गप्रस्थितानि इन्द्रियाणि K. 155; °प्रवर्तकः 103. **–र्गम्** *ind.* Astray, by a wrong way; उन्मार्गं गच्छतः मदोन्मत्तस्य भूपस्य Pt. 1. 161. **–Comp. –गत** *a.* going wrong. **–गमनम्** following evil courses. **–गामिन्, –वर्तिन्** *a.* going wrong, erring, taking a wrong road.

उन्मार्गिन् *a.* Going astray; finding an outlet (as water).

उन्मालकम् The offer of a gift as a mark of complete gratification. शरीरं उन्मालकायेव निजं मुमोच; Śrikaṇṭhacharitam 1. 3.

उन्मिश्र *a.* Mixed with, variegated.

उन्मिष् 6 P. **1** To open the eyes; उन्मिमेष तदा मुनिः Bhāg; Bg. 5. 9; Dk. 111. **–2** To open (as the eyes); प्रलयान्तोन्मिषिते विलोचने Ku. 4. 2. **–3** To open, bloom, be expanded (as lotuses); उन्मिषदुत्पलवन K. 22. **–4** To rise, peep up (as stars); उन्मिषत्सु ग्रहग्रामणीषु K. 176. **–5** To shine, glitter, flash; as तेजस् **–6** To arise, originate; उन्मिषद्रोमहर्ष, उन्मिषत्तोषम् &c.

उन्मिष *a.* Blown, opened. **–षः** Opening of the eyes.

उन्मिषित *p. p.* Opened (as eyes), blown, expanded &c. **–तम् 1** A look, glance; व्यलोकयन्नुन्मिषितैस्तडिन्मयैः Ku. 5. 25; K. 72. **–2** Opening; तद्वल्गुना युगपदुन्मिषितेन तावत् R. 5. 68.

उन्मेषः, –षणम् 1 Opening (of the eyes), winking' twinkling (of the eyes); प्रत्यग्रोन्मेषजिह्मा Mu. 3. 21. **–2** Blowing, opening, expansion; उन्मेषं यो मम न सहते जातिवैरी निशायाम् K. P. 10; दीर्घिकाकमलोन्मेषः Ku. 2. 33. **–3** Light, flash, brilliancy; सतां प्रज्ञोन्मेषः Bh. 2. 114 light or flash; विद्युदुन्मेषदृष्टिम् Me. 83. **–4** Awakening, rising, becoming visible, manifestation; ज्ञान° Śānti. 3. 13. **–5** The act of increasing, supporting, making strong; addition, expansion; इतिहासपुराणानामुन्मेषं निर्मितं च यत् Mb. 1. 1. 63.

उन्मेषिन् *a.* Flying about, glittering about; उन्मेषिचाषच्छदः Māl. 6. 5.

उन्मील् 1 P. **1** To open (as the eyes); उदमीलीच्च लोचने Bk. 15. 102; 16. 8. **–2** To be awakened or roused, be excited; उन्मिमील विशदं विषमेषुः Śi. 10. 72; Bk. 1. 33. **–3** To expand, blow (as lotuses); सरोभिरुन्मीलितपद्मलोचनैः Ki. 4. 3; Māl. 1. 38, 9. 15. **–4** To be diffused or spread, cluster round; प्रान्तोन्मीलन्मनोहरकुन्तलैः U. 1. 20; उन्मीलन्मधुगन्ध Gīt. 1. **–5** To appear, become manifest; खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति Prab. 1. 2. **–6** To break forth, burst out; U. 4. –*Caus.* **1** To open (eyes, lotuses &c.); तदेतदुन्मीलय चक्षुरायतम् V. 1. 6; Mk. 1. 33. **–2** To display, show; त्वयाद्य साधुतोन्मीलिता.

उन्मीलः, –लनम् 1 Opening (of the eyes), awaking; ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकः Mb. **–2** Unfolding, opening (in general); प्रियागुणसहस्राणामेकोन्मीलनपेशलः U. 6. 34. **–3** Touching up, painting; आलेख्य° K. 267. **–4** Expanding, blowing. **–5** Action, working; परं निर्वेदमागम्य न हि नोन्मीलनं क्षमम् Rām. 4. 49. 8.

उन्मीलित *p. p.* **1** Opened; अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ Śik. 58; Ki. 16. 12. **–2** Blown, expanded; ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः; K. P. 1; awakened; झटित्युन्मीलितप्रज्ञम् Mv. 1. 48; K. 110. **–3** Touched up, painted; उन्मीलितं तूलिकयेव चित्रम् Ku. 1. 32. – **तम्** (In Rhet.) An open reference (to anything).

उन्मुख *a.* (**–खी** *f.*) [उद्-ऊर्ध्वं मुखं यस्य] **1** Raising the face, looking up; °दर्शन looking upwards; अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिः Me. 14, 105; R. 1. 39, 11. 26; आश्रम° 1. 53. **–2** Ready, intent on, on the point of, about to, prepared for; तमरण्यसमाश्रयोन्मुखम् R. 8. 12 about to retire to the woods; 16. 9, 3. 12; उदयोन्मुखचन्द्रिका M. 5. 7; भेदोन्मुखम् V. 2. 7; Ku. 6. 48. **–3** Eager, waiting for, expecting, looking up to; तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे Ku. 6. 34; लक्ष्मीरिव गुणोन्मुखी R. 12. 26, 6. 21, 11. 23. **–4** Sounding, speaking or making a sound; परभृतोन्मुखी Ku. 6. 2 speaking through the cuckoo. **–5** Coming from the mouth (मुखोत्पन्न); यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः Bhāg. 3. 6. 30.

उन्मुखता 1 The state of having the face raised. **–2** The state of expectancy; Ks.

उन्मुखर *a.* Loud-sounding, noisy.

उन्मुच् 6 U. **1** To unfasten, pull off; उन्मुच्य सूत्रेण विनैव हाराः R. 6. 28; take off (clothes &c.); आत्मकण्ठादुन्मुच्य K. 147, 67; Bk. 3. 22. **–2** To loosen, liberate, free from (as a bond); ऋणमुन्मुच्य देवानाम् Mb.; open (as a letter); लेखमुन्मुच्य Raj. T. 3. 235; K. 221. **–3** To raise, elevate, send forth (as sound); आर्तनादो हि यः पौरैरुन्मुक्तः Rām. **–4** To fling, hurl (as a missile). –*Caus.* **1** To extricate, loosen, free; उन्मोच्य सोऽपि निपुणः Mv. 6. 46. **–2** To deliver.

उन्मुक्त *p. p.* Pulled off, loosened &c.; °कण्ठम् bitterly.

उन्मोचनम् Unfastening, loosening. **–Comp. –प्रमोचनम्** (du.) unfastening completely; उन्मोचनप्रमोचने उभे वाचा वदामि ते Av. 5. 30. 2–4.

उन्मुद्र *a.* [उद्गता मुद्रा यस्मात्] **1** Unsealed. **-2** Opened, blown, expanded (as a flower).

उन्मुग्ध *a.* **1** Confounded, confused. **-2** Silly, stupid. या पूर्वा सोत्तरास्य उन्मुग्धस्य सोयं पूर्वोत्तर उन्मुग्धः Mbh. 1. 1. 28.

उन्मूल् 10 P. To eradicate, pluck up by the roots, exterminate; समूलमुन्मूलयतीव मे मनः Ki. 1. 41; उन्मूलिता हलधरेण पदावघातैः Udb.

उन्मूल *a.* Plucked, destroyed. तमिमं शैलमुन्मूलं करोमि तव गोपते Ram. 7. 16. 23.

उन्मूलनम् **1** Plucking up by the roots, eradication, destroying, uprooting ; न पादपोन्मूलनशक्ति रंहः R. 2. 34.

उन्मृज् 2 P. **1** To rub or wipe off, clean by washing; त्रिः प्राश्यापो द्विरुन्मृज्य खान्याद्भिः समुपस्पृशेत् Y. 1. 20. **-2** To efface, blot out, obliterate. यौ ते मातोन्ममार्ज जातायाः पतिवेदनौ Av. 8. 6. 1. **-3** To receive, accept (Ved.); उद् राधो गव्यं मृजे Rv. 5. 52. 17.

उन्मार्जनम् Rubbing, wiping off, removing; मनःशल्य° Dk. 161.

उन्मृजावमृजा Repeatedly rubbing up and down. P. II. 1. 72.

उन्मृष्ट *p. p.* Blotted out, effaced, cleared, removed, wiped off ; स तौ कुशलवोन्मृष्टगर्भक्लेदौ R. 15. 32; Y. 2. 91.

उन्मृद् 9 P. To rub, to do massage.

उन्मर्दनम् A rubbing down of the sacrificer with sweet-smelling substances before sprinkling him with fat. cf. सर्वसुरभ्युन्मर्दनं भवति Śat. Br. 12. 8. 3. 16. and Sāyaṇa says उन्मर्दनं उद्वर्तनं भवति । (For details read Dr. Gode's paper on, 'Massage in Ancient and Medieval India', Annals of Bhandarkar Oriental Research Institute XXXVI, parts I–II, pp. 85. 113).

उन्मेदा *f.* Corpulence, fatness.

उप *ind.* **1** As a prefix to verbs and nouns it expresses towards, near to, by the side of, with, under, down (opp. अप). According to G. M. the following are its senses :—उप सामीप्यसामर्थ्यव्याप्त्याचार्यकृतिमृतिदोषदानक्रियावीप्सारम्भाध्ययनपूजनेषु :— (1) nearness, contiguity उपविशति, उपगच्छति goes near; (2) power, ability उपकरोति; (3) pervasion उपकीर्ण; (4) advice, instructing as by a teachar उपदिशति, उपदेश; (5) death, extinction, उपरत; (6) defect, fault उपघात; (7) giving उपनयति, उपहरति; (8) action, effort उप त्वानेष्ये; (9) beginning, commencement उपक्रमते, उपक्रम; (10) study उपाध्यायः; (11) reverence, worship उपस्थानम्, उपचरति पितरं पुत्रः. It is also said to have the senses of disease, ornament, command, reproof, killing, wish, resemblance &c. **-2** As unconnected with verbs and prefixed to nouns, it expresses direction towards, nearness, resemblance, relationship, contiguity in space, number, time, degree &c., but generally involving the idea of subordination or inferiority; उपकनिष्ठिका the finger next to the little finger; उपपुराणम् a secondary Purāṇa; उपगुरुः an assistant master; उपाध्यक्षः a vice-president. It usually, however, forms Avyayī. comp. in these senses; उपगङ्गम् = गङ्गायाः समीपे; उपकूलम्, °वनम् &c.; these are again compounded with other words; उपकूपजलाशयः; उपकण्ठनिवासिनी. Prefixed to proper nouns it means a 'younger brother'; उपेन्द्रः. **-3** With numerals it forms संख्याबहुव्रीहि and means 'nearly', 'almost'; उपत्रिंशाः nearly thirty; उपविंशाः about twenty &c. **-4** As a separable preposition (*a*) with acc. when it means inferiority उपोधिकेच (P. I. 4. 87) उपहरिं सुराः Sk. the gods are under *i. e.* are inferior to Hari; शक्रादय उपाच्युतम् Vop. (*b*) With loc. it expresses (1) over, above, superior to; उपनिष्के कार्षापणम्, उपपरार्धे हरेर्गुणाः; (2) addition; (3) near to, towards, in the direction of, under; (4) at, on, upon; (5) upto, in, above; *e. g.* उप सानुषु on or above the peaks; वयो न वसतीरुप; or sometimes (*c*) with the instr.; with, at the same time with, according to. **-5** As a separable adverb it is rarely used in the senses of further, moreover. उपासन्नेऽधिके हीने सादृश्यप्रतियत्नयोः । तद्योगव्याप्तिपूजासु शक्तावारम्भदानयोः ॥ दक्षिणाचार्यकरणदोषाख्यानात्ययेषु च । [cf. Gr. *hupo*; L. *sub*; Goth. *up*; Germ. *ob*.].

उपकक्ष *a.* Ved. Reaching to the shoulder; आदघ्नास उपकक्षास उ त्वे Rv. 10. 71. 7. **-क्षम्** The hair under the armpit; Gopath. Br. 1. 3. 9.

उपकण्ठ *a.* Near, proximate. **-ण्ठः; -ण्ठम्** **1** Proximity, vicinity, neighbourhood; प्राप तालीवनश्याममुपकण्ठं महोदधेः R. 4. 34; 13. 48; Ku. 7. 51; Mal. 9. 2; आकृष्य चापं श्रवणोपकण्ठे Ś. 3. 5. to the very ear. तस्योपकण्ठे घननीलकण्ठः Ku. **-2** Space near a village or its boundary. **-3** One of a horse's paces. -*ind.* **1** Upon the neck, near the throat; प्रेम्णोपकण्ठं मुहुरङ्कभाजः Śi. 3. 36. **-2** In the vicinity of, near.

उपकथा A short story or tale.

उपकनिष्ठिका [उपगता कनिष्ठिकाम्] The finger next to the little finger, the last but one finger (अनामिका); Śik. 44.

उपकन्या The friend of one's daughter; P. VI. 2. 194; °पुरम् near the woman's apartments.

उपकर्ण 10 U. To hear; शितिकण्ठैरुपकर्णयाम्बभूवे Śi. 20. 5.

उपकर्णम् *ind.* Close to the ear, into the ear.

उपकर्णनम् Hearing.

उपकर्णिका Rumour, report.

उपकर्मन् *n.* A rite in which the head of the boy (बटुः) is smelt at the उपनयन ceremony; जातकर्मणि यत्प्राह पिता यच्चोपकर्मणि Mb. 12. 266. 16.

उपकल्पः An ornament, तपनीयोपकल्पम् Bhag. 3. 18. 9.

उपकान्तः A class of six-storeyed buildings (Mānasāra 24. 16.).

उपकालिका Smaller variety of cardamom, or Fennel-flower-seed, Nigella Indica (Mar. काळें जिरें).

उपकिरण See under उपकॄ.

उपकीचकः **1** A relation or follower of Kīchaka. **–2** The army of Virāṭa under Kīchaka. **–3** A subbranch of a Bamboo tree; cf. the paronomastic quotation विराटनगरे राजन् कीचकादुपकीचकम् (where विराट can be separated as विः + आट, meaning a bird wandered).

उपकुञ्चिः, –ञ्चिका **1** The plant Nigella Indica (कृष्णजीरक). **–2** Small cardamom.

उपकुम्भ *a.* **1** Near, proximate. **–2** Solitary, retired, secluded. **–म्भम्** *ind.* Near a jar.

उपकुल्या **1** The plant Piper Longum (Mar. पिंपळी). **–2** A canal, trench.

उपकुशः Gum-boil; a disease of the mouth.

उपकूज् 1 P. To fill with cooing.

उपकूजित *p. p.* Made to resound (with cooing). **–तम्** Filling with cooing.

उपकूपम्, –पे *ind.* Near a well; °जलाशयः a trough near a well for watering cattle; also **–पः** A small cistern made of stone (Mar. टांकें, डोणी).

उपकूलम् *ind.* On the shore; उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः (निर्ममे) R. 15. 28.

उपकृ 8 U. (*a*) उपकरोति–कुरुते. **1** To place or bring near, furnish or provide with, do or render; किं ते भूयः प्रियमुपकरोतु पाकशासनः V. 5; Ms. 2. 149, 245; 5. 32. **–2** To assist, serve, befriend, oblige, favour, benefit, help; प्राणैरप्युपकुर्वते Pt. 1. 83; Bk. 8. 18; (oft. with gen. of person); सा लक्ष्मीरुपकुरुते यया परेषाम् Ki. 7. 28, 8. 13; आत्मनश्चोपकर्तुम् Me. 103; Śi. 20. 74; K. 174; न हि दीपौ परस्परस्योपकुरुतः Ś. B.; sometimes with loc. also; Me. 8. 394. **–3** To foster, take care of. **–4** To render homage, serve, wait or attend upon (with acc.), हरिमुपकुरुते Sk. **–5** To begin, set about anything (with dat.). **–6** To subdue, overcome. *(b)* उपस्करोति, –स्कुरुते. **1** To add, supply (वाक्याध्याहारे); उपस्कृतं ब्रूते P. VI. 1. 139. Sk. **–2** To provide or furnish with; सितातपत्रव्यजनैरुपस्कृतः Bhāg. **–3** To attend or wait on, serve. **–4** To adorn, decorate, elaborate, refine, polish, prepare, perfect; राजतं चानुपस्कृतम् Ms. 5. 112; उपस्कृता कन्या Sk.; शास्त्रोपस्कृतशब्दसुन्दरगिरः Bh. 2. 15. **–5** (*a*) To care for, take care of (with acc. of person); P. I. 3. 32, VI. 1. 139. (*b*) To make efforts (with gen. of thing); एधोदकस्योपस्कुरुते, मा कस्यचिदुपस्कृथाः Bk. 8. 19, 119. **–6** To furnish badly, deform; मांसं यच्चानुपस्कृतम् Ms. 3. 257. **–7** To corrupt, defile, censure; एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः 7. 98. **–8** To bring or call together; उपस्कृता ब्राह्मणाः (= समुदिताः Sk.).

उपकर्या A palace. also उपकार्या.

उपकरणम् **1** Doing service or favour, helping, assisting. **–2** Material, implement, instrument, means; यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात् Bṛi. Up. 2. 4. 2.; स्वेषूपकरणेषु U. 5; °द्रव्यम् Mk. 3; उपकरणीभावमायाति U. 3. 3 serve as helping instruments, or assistants; परोपकारोपकरणं शरीरम् K. 207; so स्नान° bathing materials; Pt. 1; व्यायाम° athletic materials; आत्मा परोपकरणीकृतः H. 2. 24; K. 80, 102, 198, 204; Y. 2. 276, Ms. 9. 270. **–3** An engine, machine, apparatus, paraphernalia (in general). **–4** Means of subsistence, anything supporting life. **–5** A means or expedient; कर्म°, वेद°, यज्ञ° &c. **–6** Fabricating, composing, elaborating. **–7** The insignia of royalty. **–8** The attendants of a king. **–Comp.** **–अर्थ** *a.* Suitable, requisite.

उपकर्तृ *a.* One who does a service or favour, useful, friendly; आपत्सूपकर्ता Dk. 160; हीनान्यनुपकर्तॄणि प्रवृद्धानि विकुर्वते R. 17. 58; उपकर्त्री रसादीनाम् S. D. 624; Śi. 2. 37.

उपकारः **1** Service, help, assistance, favour, kindness, obligation (opp. अपकार); अशक्यो द्रव्यपदार्थिकेन द्रव्यस्य गुणकृत उपकारः प्रतिज्ञातुम् Mbh. on **P. II. 1. 1.** उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः Śi. 2. 37; शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः Ku. 2. 40, 3. 73; Y. 3. 284; Pt. 1. 22; उपकारे वृत् to be of service or useful (to another); **–2** Preparation. **–3** Ornament, decoration. **–4** Particularly, flowers, garlands &c. suspended at gate-ways as embellishments on festive occasions. **–री** **1** A royal tent, palace. **–2** Caravansera.

उपकारक *a.* Doing service or favour, helping, contributing to, assisting, productive (of good results); उपकारकमायतेर्भृशम् Ki. 2. 43.

उपकारिका (also **उपकारी**) **1** Protectress, a female assistant. **–2** A palace. **–3** A tent, a caravansera. **–4** A kind of cake.

उपकारिन् *a.* Helping, serving, beneficial &c.; subservient, benefactor.

उपकार्य *a.* **1** Deserving assistance or favour, fit to be assisted. **–र्या** A royal house, palace; रम्यां रघुप्रतिनिधिः स नवोपकार्यां बाल्यात्परामिव दशां मदनोऽध्युवास R. 5. 63; a royal tent; तस्योपकार्यारचितोपचाराः 5. 41. 11. 93, 13. 79, 16. 55, 73.

उपकुर्वाण *a.* Doing service &c. **–णः** A Brāhmaṇa in a state of pupilage (ब्रह्मचारिन्) who wishes to pass on to the state of a house-holder (गृहस्थ).

उपकृत *p. p.* Assisted, benefited, served &c. **–तम्** Aid, favour, obligation; गता नाशं तारा उपकृतमसाधाविव जने Mk. 5. 25.

उपकृतिः *f.*, **उपक्रिया** Favour, obligation.

उपकॄ 6 P. To bestrew, scatter or throw down, scatter or pour upon; रत्नोपकीर्णां वसुधाम् Mb. **–2** (उपस्कॄ) (*a*) To cut up, split, lop. (*b*) To hurt, strike.

उपकिरणम् **1** Scattering or throwing over, covering up; burying. **–2** Pervasion. *–ind.* Near the rays.

उपकीर्ण *a.* Covered, strewed with; पुष्पोपकीर्णानि महाचलस्य (शृङ्गाणि) Mb. 3. 164. 4.

उपक्लृप् 1 Ā. **1** To be fit for; तत्रेदमुपकल्पते Bhāg. **–2** To be prepared or ready (at hand); आसनेषूपक्लृप्तेषु Ms. 3. 208, 8. 333. **–3** To result in, serve as, lead to (with dat.); वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते Ms. 3. 202. **–4** To become, take a (particular) form or shape. *–Caus.* **1** To prepare, get ready, equip; रथम् Ve. 2. **–2** To appoint, assign, allot; उपकल्पितं पशुम् Pt. 1; U. 2; Y. 1. 109. **–3** To vow, promise; देवतोपकल्पित Pt. 4. **–4** To set up, exhibit; इति मतिरुपकल्पिता वितृष्णा Bhāg. 1. 9. 32. **–5** To render (homage), communicate. **–6** To bring near, fetch. **–7** To assume, take.

उपकल्पः An appurtenance; Bhāg.

उपकल्पनम्, –ना **1** Preparation; एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् Suśr. **–2** Fabricating, making &c.

उपकल्पित *p. p.* **1** Prepared, made &c. **–2** Secondary, substituted.

उपक्लृप्त *p. p.* **1** Brought near, at hand. **–2** Ready, prepared. **–3** Fitted for, adapted to. **–4** Formed, produced.

उपकोशा N. of a daughter of उपवर्ष and wife of वररुचि Ks.

उपक्रम् 1 Ā., 4 P. **1** To go near, approach, come to, advance towards; राज्ञस्तस्याज्ञया देवी वसिष्ठमुपचक्रमे Mb.; Bk. 8. 25. कुमारं विविधैस्तैस्तैरुपचक्रमिरे नयैः Bu. Ch. 4. 53. **–2** To do, perform, set about; यथोक्तं निपुणमुपक्रान्तवान् Dk. 120; माधवसमक्षमुत्तरमुपक्रमिष्ये Māl. 3, 2. 7; Y. 3. 200. **–3** To begin, commence (with inf. or dat.); (Ātm.); प्रसभं वक्तुमुपक्रमेत कः Ki. 2. 28; प्रतिग्रहीतुम् ... त्रिलोचनस्तामुपचक्रमे च Ku. 3. 66; R. 17. 13. **–4** To go against, attack, assail, उपचक्रमाते वाग्भिः Rām. **–5** To make advances (of love) to; सर्वोपायैरुपक्रम्य सीताम् Rām. win over; Dk. 65. **–6** To step over, stride, traverse. **–7** To treat, act towards, attend on (as a physician). cure or heal (as wounds); यत्नादुपक्रम्यताम् Ś. 3. v. l; सर्वथोपक्रान्तः Dk. 68; °व्रणा 75.

उपक्रन्तृ A beginner, one who undertakes; प्रक्रन्ता उपक्रन्ता Mbh. on P. VII. 2. 36.

उपक्रमः **1** Beginning, commencement; रामोपक्रममाचख्यौ रक्षःपरिभवं नवम् R. 12. 42 begun by Rāma; किमुपक्रमो रावणः Mv. 2. **–2** Approach, advance; साहस° forcible advance Māl. 7; so योषितः सुकुमारोपक्रमाः *ibid.* **–3** An undertaking, work, enterprize. **–4** A plan, contrivance, means, expedient, stratagem, remedy; सामादिभिरुपक्रमैः Ms. 7. 107, 159; M. 3; R. 18. 15; Y. 1. 345; Śi. 20. 76. **–5** Attendance on a patient, treatment, practice of medicine, physicking. **–6** A test of honesty, trying the fidelity of a friend &c.; see उपधा. **–7** A kind of ceremony preparatory to reading the Vedas. **–8** Heroism, Courage. **–9** Flight. **–10** Behaviour, action; यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः Rām. 5. 64. 30. **–11** The rim of a wheel; Hch.

उपक्रमणम् **1** Approaching. **–2** Undertaking. **–3** Commencement. **–4** (Medic.) Treatment, physicking.

उपक्रमणिका A preface, introduction.

उपक्रमणीय *a.* **1** To be gone to, approached, commenced &c. **–2** Relating to the attendance (on a patient). **–यम्** A work on medicine.

उपक्रमितव्य, उपक्रम्य *pot. p.* **1** To be commenced or undertaken. **–2** Curable; अनुपक्रम्य आतङ्कः V. 2.

उपक्रमितृ *a.* (P. VII. 2. 36.) One who begins &c.

उपक्रान्त *a.* **1** Commenced, undertaken. **–2** Approached. **–3** Treated, attended on.

उपक्रीडा A play-ground, a place for playing.

उपक्रुश् 1 P. To blame, chide, revile. *–Caus.* To cause to cry, lament.

उपक्रोशः, –शनम् Censure, reproach, ignominy; प्राणैरुपक्रोशमलीमसैर्वा R. 2. 53; वाक्संतक्षणैर्लोकोपक्रोशनैः Dk. 41. 60.

उपक्रोष्टृ *a.* Censuring, blaming. *m.* An ass (braying aloud).

उपक्व (क्वा) णः [उप-क्वण्-शब्दे, अप्-घञ् वा] The sound of a lute or of Kinnaras.

उपक्वसः Ved. A kind of worm or insect, तर्द है पतङ्ग है जभ्य हा उपक्वस Av. 6. 50. 2.

उपक्षि 1 P. or *pass.* **1** To waste away, decay, be exhausted, disappear. **–2** (2, 6. P.) To dwell near (Ved.).

उपक्षय *a.* Decayed, wasted. **–यः** **1** Waste, decay, loss. **–2** Expenditure. **–3** N. of Śiva; Mb. 12. **–यम्** *ind.* Near the abode.

उपक्षित् *a.* Ved. **1** Dwelling near. **–2** Clinging or attached to; उपक्षितो वया इव Rv. 8. 19. 33.

उपक्षीण *p. p.* **1** Decayed, exhausted, consumed. **–2** Disappeared; vanished. **–3** Powerless.

उपक्षेतृ *a.* One who draws near; or one who dwells near, attached to (उपक्षेतारस्तव) सुप्रणीते Rv. 3. 1. 16.

उपक्षिप् 6 P. **1** To throw at, cast on, hurl against; वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः Māl. 5. 31; to direct; त्वयि उपक्षिप्त आत्मा M. 2; to entrust, assign; M. 3. **–2** To insult, upbraid, accuse, charge with; परस्परं वाग्भिरुपक्षिपन्ति Rām. -3 To throw out (a hint), hint, indicate, put forth, adduce; छन्नं कार्यमुपक्षिपन्ति Mk. 9. 3; इति उपक्षिप्तमनेन Mu. 1; Māl. 1. -4 To throw down. -5 To commence, introduce, set on foot, begin; उपक्षिप्तमनेन किमपि Mu. 1; K. 162; Dk. 59; उपक्षिप्तो भित्तिबन्धः M. 5.

उपक्षेपः 1 Throwing at, hurling. -2 Mention, allusion, hint, suggestion; कार्योपक्षेपमादौ तनुमपि रचयन् Mu. 4. 3; दारुणः खलूपक्षेपः पापस्य Ve. 5. -3 A threat, specific mention or charge; कर्णनासाच्छेदोपभीषिताभ्याम् Dk. 61. -4 Commencement; उपाय° M. 3. -5 Poetical or figurative style in composition (Wilson).

उपक्षेपक *a.* Alluding, suggesting.

उपक्षेपणम् 1 Throwing or casting down. -2 Accusing; Charging; °धर्मः = शूद्रस्वामिकामात्रस्य पाकार्थं ब्राह्मणगृहे समर्पणम् Śabdak. -3 Disregard, negligence; उपक्षेपणजोऽधर्मः सुमहान्स्यान्महीपतेः Mb. 1. 213. 16.

उपखिलम् Supplement to a supplement, subsupplement.

उपगण *a.* Forming a small or subordinate class. **-णः** 1 A small or subordinate class. -2 A small number less than a troop.

उपगन्धः Perfume, scent.

उपगम् 1 P. 1 To go to, approach; attain, reach (fig. also), arrive at, visit; शशिनमुपगतेयं कौमुदी मेघमुक्तम् R. 6. 85; so दैवादुपगतं तृणम् Pt. 4; पदमुपगता Bh. 2. 10; Bk. 1. 1; तदुपगतम् Mu. 5 duly received. -2 To enter into, penetrate; अवलम्ब्य जालकमुखोपगतानुदतिष्ठदिन्दुकिरणान्मदनः Śi. 9. 39. -3 To undergo, suffer; तमो घोरमुपागतम् Rām. -4 To go to the state of, attain, acquire; तानप्रदायित्वमिवोपगन्तुम् Ku. 1. 8; प्रतिकूलतामुपगते हि विधौ Śi. 9. 6; so निद्रावशम्, हर्षम्, तृप्तिम्, शान्तिम्, विषादम् &c. -5 To approach a woman (for sexual intercourse); सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति Ms. 3. 34, 4. 40. -6 To come upon, attack. -7 To occur, happen, present itself; कस्यात्यन्तं सुखमुपगतम् Me. 109. v. 1. -8 To undertake, begin. -9 To suffer, share in. -10 To admit, agree to, consent, allow; वेदान्तोपगतं फलम् Ms. 2. 160. -11 To worship; सहपत्न्या विशालाक्ष्या नारायणमुपागमत् Rām. 2. 6. 1. -*Caus.* To cause to come near or approach.

उपग *a.* (At the end of comp. only) 1 Approaching, following, joining. -2 Receiving; ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः Ms. 1. 46; Śi. 16. 68. -3 Fit for, conducive; Mb. -4 Covered (as a female).

उपगत *p. p.* 1 Gone to, approached, arrived. -2 Occurred, happened. -3 Near, at hand. -4 Got, obtained. -5 Undergone, experienced. -6 Furnished with; (सहित, युक्त); जहार स शिरस्त्राणं कुण्डलोपगतं शिरः Rām. 6. 97. 32. -7 Gone to, become. -8 Promised, agreed. -9 Passed away, dead. -10 Feeling, suffering (actively used). **-तम्** 1 Wealth acquired. -2 Receipt; धनी वोपगतं दद्यात् स्वहस्तपरिचिह्नितम् Y. 2. 93.

उपगतिः *f.* 1 Approach, going near; कररुद्धनीवि दयितोपगतौ Śi. 9. 75. -2 Knowledge, acquaintance. -3 Acceptance, receipt. -4 Attainment, acquirement.

उपगन्तृ *a.* 1 Approaching. -2 Getting, acquiring. -3 Knowing. -4 Accepting, receiving.

उपगमः, -मनम् 1 Going to, drawing towards, approach; सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् Me. 67 your advent; व्यावर्ततान्योपगमात्कुमारी R. 6. 69, 9. 50. -2 Knowledge, acquaintance. -3 Attainment, acquiring; विश्वासोपगमादभिन्नगतयः Ś. 1. 14. -4 Intercourse (as of the sexes). -5 Society, company; न पुनरधमानामुपगमः H. 1. 117. -6 Undergoing, suffering, feeling. -7 Acceptance, receipt. -8 An agreement, promise. -9 A particular high number. -10 **-नम्** Assumption, accepting, taking up; अप्राप्तस्य हि प्रापणमुपगमनम् । ŚB. on MS. 12. 1. 21. -11 Performing, observing (आचरण); चकार सन्ध्योपगमादि सत्तमः Bhāg, 10. 70. 6.

उपगामिन् *a.* Coming near; Ks.

उपजिगमिषु *a.* Wishing or desiring to go near; नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते Me. 44.

उपगाह् P. To penetrate or force one's way into.

उपगिरि, -रम् *ind.* [गिरेश्च सेनकस्य P. V. 4. 112] Near a mountain. **-रिः** N. of a country situated near a mountain in the north.

उपगु *ind.* Near a cow. **-गुः** A cowherd.

उपगुप्त *a.* Hidden, concealed; °वित्त whose wealth is concealed.

उपगुरुः An assistant teacher. **-रु** *ind.* Near a teacher.

उपगुह् 1 U. 1 To clasp, embrace; तरङ्गहस्तैरुपगूहतीव R. 13. 63, 18. 47; Bk. 14. 52; Śi. 9. 38. -2 To hide, conceal, cover, encircle, gird round; वनमालोपगूढः K. 24, 38.

उपगूढ *p. p.* 1 Hidden, concealed; उपान्तवानीरवनोपगूढानि R. 13. 30. -2 Embraced, clasped. -3 Held, supported; कश्चित्कराभ्यामुपगूढनालम् R. 6. 13. -4 Suppressed. -5 Seized, harassed; कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः Bhāg. 4. 28. 6. -6 Filled with, covered; लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः Rām. 4. 1. 9. **-ढम्** An embrace; उपगूढानि सवेपथूनि च Ku. 4. 17; विश्रामार्थमुपगूढमजस्रम् । Śi. 10. 88; कण्ठाश्लेषोपगूढम् Bh. 3. 82; गाढोपगूढम् Me. 97.

उपगूहनम् 1 Hiding, concealing. -2 An embrace. -3 Astonishment, surprise; (in drama) an occurance of any wonderful event.

उपगोह्य *pot. p.* 1 To be embraced. -2 To be taken or seized. **-ह्यः** 1 An embrace. -2 A kind of fire regarded as impure (and therefore to be hidden).

उपगॄ P. To swallow down; Suśr. 2.

उपगै 1 P. 1 To sing to any one (with dat. or acc.); साम्नैनमुपागात् Ch. Up. -2 To join in singing. -3 To praise in song, celebrate, extol; तपोलक्ष्म्या दीप्तं दिनकृतमिवोच्चैरुपजगुः Ki. 18. 47.

उपगा *m.* (गाः) A priest in a sacrifice who sings the hymns. *f.* Accompaniment of a song.

उपगातृ *a.* Singing near. *m.* One who accompanies the song of the Udgātṛi priest, a chorister.

उपगानम् Accompanying music; किं गानोपगानमेतत् उत वादित्रोपगानम्। ŚB. On. MS. 10. 4. 8.

उपगायनम् Singing.

उपगीत *p. p.* 1 Celebrated, sung by bards. -2 Commencing to sing; नात्र कान्तमुपगीतया तया Śi. 4. 57.

उपगीतिः *f.* A variety of the Āryā metre; see App.

उपगेयम् Song; Bhāg. 5. 26. 38.

उपग्रन्थः A subsidiary writing or a class of such writings.

उपग्रस् 1 P. To swallow down, devour, eclipse; Mb. 2.

उपग्रह् 9 U. 1 To hold under, seize or collect from below; as रसम्. -2 To seize, take, take possession of; तवैव पादावुपगृह्य Rām.; उपगृह्यास्पदं चैव Ms. 7. 184. -3 To meet with, obtain; स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा Chāṇ. 19. -4 To subdue, vanquish. -5 To provide. -6 To conciliate, take as one's ally, favour, support; तदुपगृहीतेन म्लेच्छराजबलेन Mu. 1. -7 To conceive with one's mind, grasp mentally; धियोपगृह्णन्स्मितशोभितेन Bhāg. 3. 22. 21. -8 To decide, determine. -9 To accept, approve.

उपग्रहः 1 Confinement, seizure. -2 Defeat, frustration; अपि च विहिते मत्कृत्यानां निकाममुपग्रहे Mu. 4. 2. -3 A prisoner. -4 Joining, addition. -5 (*a*) Favour, encouragement, assistance, conciliation; सोपग्रहम् K. 156. परविषये कृत्याकृत्यपक्षोपग्रहः। Kau. A. 1. अमित्रोपग्रहं चास्य ते कुर्युः क्षिप्रमापदि Mb. 12. 96. 14. (*b*) Favourableness, kindness, complacence; सोपग्रहं K. 264. -6 Use. -7 A kind of peace purchased by giving over every thing; cf. क्रियते प्राणरक्षार्थं सर्वदानादुपग्रहः H. 4. 121. -8 The voice or pada of a verb; सुप्तिङुपग्रहलिङ्गनराणां Mbh. III. 1. 85; 1. 40; and 2. 127. -9 A pile or heap of kuśa grass. -10 The presiding spirit or cause which directs a planet's motion. -11 A minor planet (राहु, केतु &c.), a secondary heavenly body, such as a comet, meteor.

उपग्रहणम् 1 Seizing (from below); taking hold of; as in पादोपग्रहणम्. -2 Seizure, capture, taking one prisoner. -3 Supporting, furthering, promoting. -4 Holy study, study of the Vedas (after being initiated into them); वेदोपग्रहणार्थाय तावग्राहयत प्रभुः Rām.

उपग्राहः 1 Making a present. -2 A present; उच्चावचानुपग्राहान् राजभिः प्रापितान् बहून् Mb. 2.

उपग्राह्य *pot. p.* To be favoured or retained in service: Mu. 5. **-ह्यः** 1 An offering or present. -2 Particularly, a present or offering to a great man or king; the modern *Nazarāṇā*.

उपघात See under उपहन्.

उपघातकः A smaller variety of a plant Cassia fistula (Mar. लघुबाहवा).

उपघुष् 1, 10 P. To fill with noise, make resonant.

उपघुष्ट *p. p.* 1 Resounding with, noisy. -2 Resonant. -3 Sounding.

उपघोषणम् Proclaiming, publication, making known.

उपघ्नः [उप-हन्-क] P. III. 3. 85 उपघ्न आश्रये. 1 Contiguous support; पर्वतोपघ्नः Sk.; छेदादिवोपघ्नतरोर्व्रतत्यौ R. 14. 1. -2 Shelter, support, stay, protection. (स्यादुपघ्नोऽन्तिकाश्रये।) पिप्रायाद्रि–गुहोपघ्नान् ... । Bk. 7. 64; cf. also अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ। R. 14. 1. -3 That which rests upon or is supported by.

उपघ्रा P. To smell, to touch with the mouth; पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ R. 13. 70.

उपचक्रः [उपगतः चक्रं चक्रवाकम्] A variety of the ruddy goose. Mb. 3. 178. 7.

उपचक्षुस् *n.* [उपगतं चक्षुरिव] 1 An eye-glass, spectacles cf. उपनेत्रम्. -2 A superhuman or divine eye.

उपचतुर *a.* (P. V. 4. 77 Vārt. 1) About four.

उपचर् 1 P. 1 (*a*) To serve, wait or attend upon; गिरिशमुपचचार Ku. 1. 60; निमित्तज्ञान् K. 64; Ms. 3. 193, 4. 254; सममुपचर भद्रे सुप्रियं चाप्रियं च Mk. 1. 31; K. 326. (*b*) To honour, worship; प्रतिमाः पूजासत्कारेणोपचर्यन्ते K. 40, 323; V. 3. -2 To treat, deal with, act towards; entertain; मित्रत्वेन उपचरितस्य Dk. 71 treated as a friend; भोजनादिना मामुपाचरत् 77, 117; तां प्रियसखीमिवोपाचरत् 134; उपाचरत् कृत्रिमसंविधाभिः R. 14. 17 honoured or entertained; 5. 62; स्थाने इयं देवीशब्देनोपचर्यते V. 3. honoured with the title of queen. तत्रभवन्तो युवत्वेनोपचर्यमाणाः प्रीता भवन्ति Mbh. IV. 1. 163. -3 To attend on (as a patient), treat, tend, nurse; यत्नादुपचर्यताम् Ś. 3; मन्त्रवादिभिरुपचर्यमाणः Pt. 1. -4 To approach, go towards. -5 To undertake, begin (mostly Vedic in these senses). -*pass.* To be used figuratively or metaphorically, be applied figuratively to any one (with loc.); तस्माच्चेतनवदुपचर्यते Ś. B.; पर एवात्मा बालैः शारीर इत्युपचर्यते *ibid*; कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते Bhāg.; भुक्ता ब्राह्मणा इत्यत्र अन्नस्य भुक्तत्वं ब्राह्मणेषूपचर्यते Malli. on Ki. 1. 1.; Bṛi. S. 5. 15; प्रत्यासत्त्या उपचर्य योज्यते K. P.

उपचर *a.* Accessory, supplementary. **-रः** 1 Access, approach. -2 Cure, treatment; त्वग्भेदी व्रणः सूपचरः easily curable. -3 **उपचरणम्** Approach.

उपचरितम् A particular rule of Sandhi.

उपचर्य *pot. p.* [P. III. 1. 100] **1** To be served or waited upon; to be honoured or worshipped; उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः Ms. 5. 154; अनुपचर्ये (भृत्ये) Pt. 1. 101 not requiring flattery, unassuming; दुःख° Mu. 3. 5 difficult to serve. **–र्या 1** Service, attendance. **–2** Physicking, treating, curing.

उपचारः 1 Service, attendance; honouring worshipping, entertaining; Mk. 4; अस्खलितोपचाराम् R. 5. 20; K. 344. **–2** Civility, politeness, courtesy, polite behaviour, (external display of courtesy); °परिभ्रष्टः H. 1. 114. devoid of civility, uncourteous; °विधिर्मनस्विनीनाम् M. 3. 3; उपचारैरुपाचरत् Ks. 16. 29; मिथ्योपचारैश्च वशीकृतानाम् H. 1. 75; नोपचारेण ब्रूयाः Rām.; °पदं न चेदिदम् Ku. 4. 9. a merely complimentary saying, a flattering compliment; °मात्रमधुरम् K. 222, 207; M. 4; °क्रिया Ms. 8. 357 showing marks of favour, courting, (sending perfumes &c.). **–3** Salutation, usual or customary obeisance, homage; नोपचारमर्हन्ति Ś. 3. 17; °यन्त्रणया M. 4; °अतिक्रमम् 4, 5; °अञ्जलिः R. 3. 11 folding the hands in salutation. **–4** A form or mode of address or salutation; तेन वाक्योपचारेण विस्मिताः राजसत्तमाः Mb. 5. 162. 45; रामभद्र इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य U. 1; यथा गुरुस्तथोपचारेण 6; V. 5; Śi. 9. 78. **–5** External show or form, ceremony; प्रावृषेण्यैरेव लिङ्गैर्मम राजोपचारः V. 4 royal service, pomp or state of royalty; भूषणाद्युपचारेण Mu. 3. 23. v. l. **–6** A remedy, physicking, application of cure, of remedy; शिशिर° Dk. 15; शीत° Pt. 1; Dk. 23; K. 102. **–7** Practice, performance, art, conduct, management, procedure; व्रतचर्या° Ms. 1. 111; प्रसाधन° 10. 32, 9. 259; कामोपचारेषु Dk. 81 in the conduct of love-affairs; समन्त्रं सोपचारम् (अस्त्रम्) Mb.; अवेशसदृशप्रणयोपचाराम् Mk. 8. 23 course of love &c.; वाक्योपचारे कुशला Rām. 2. 44. 30 skilled in the employment of words; use, usage; यत्र लौकिकानामुपचारः v. l. for व्याहारः in U. 6. **–8** Means of doing homage or showing respect; प्रकीर्णाभिनवोपचारम् (राजमार्गम्) R. 7. 4 (hanging garlands &c.); 5. 41. **–9** Hence, any necessary or requisite article (of worship, ceremony, decoration, furniture &c.); presenting flowers, perfumes &c.; सन्मङ्गलोपचाराणाम् R. 10. 77; क्लृप्तोपचारां चतुरस्रवेदीम् Ku. 7. 88; कुसुमैः कृतोपचारः V. 2; so °रमणीयतया Ś. 6; °वत्सु मञ्चेषु R. 6. 1 the necessary decorations (canopy &c.); (the Upachāras or articles of worship are variously numbered, being 5, 10, 16, 18 or 64). **–10** Behaviour, conduct, demeanour; वैश्यशूद्रोपचारं च Ms. 1. 116; (religious) conduct in life; साधूनामुपचारज्ञः Rām.; परिजन° Mk. 1. **–11** Use, employment; K. 183. **–12** Any religious performance, a ceremony; प्रयुक्तपाणिग्रहणोपचारौ Ku. 7. 86; Mv. 1. 24. **–13** (*a*) Figurative or metaphorical use, secondary application (opp. मुख्य or primary sense); अचेतनेऽपि चेतनवदुपचारदर्शनात् Ś. B; कूलं पिपतिषतीत्यचेतनेऽपि कूले चेतनवदुपचारो दृश्यते Mbh. on P. IV. 3. 86 personification; so छत्रिणो गच्छन्तीत्येकेनापि छत्रिणा बहूनां छत्रित्वोपचारदर्शनात् Ś. B.; करणे कर्तृत्वोपचारात् *ibid.*; न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽपि उपचार एव शरणं स्यात् K. P. 10. (*b*) Supposed or fancied identification founded on resemblance; उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात् K. P. 2. (S. D. explains उपचार by अत्यन्तं विशकलितयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्). **–14** A bribe. **–15** A pretext; Śi. 10. 2. **–16** A request, solicitation. **–17** Occurrence of स् and ष् in the place of Visarga. **–18** N. of a परिशिष्ट of the Sāmaveda. **–Comp.** **–च्छलम्** A kind of fallacious inference to be refuted by reference to the real sense of a word used metaphorically, *e. g.* if any one from the sentence मञ्चाः क्रोशन्ति were to conclude that the मञ्च (platform) really cries and not persons on the platform. Nyāyadarśana. **–पदम्** A courteous or polite word, a mere compliment. उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः । Ku. 4. 9.

उपचारिक *a.* Serving for, belonging to; युद्धोपचारिकं यत्तु तच्छीघ्रं प्रविधीयताम् Mb. 4. 52. 15.

उपचारिन् *a.* Attending, serving.

उपचार्य *pot.* p. To be served or waited upon; to be worshipped &c. **–र्यः** Practice of medicine. **–र्यम्** Treatment.

उपचर्म, –र्मम् *ind.* On the skin, near the skin.

उपेनित *a.* Driven or pressed in. Śat. Br.

उपेन्द्रः [उपगत इन्द्रं अनुजत्वात्] N. of Viṣṇu or Kriṣṇa as the younger brother of Indra in his 5th or dwarf incarnation; see इन्द्र; उपेन्द्रवज्रादपि दारुणोऽसि Gīt. 5; यदुपेन्द्रस्त्वमतीन्द्र एव सः Śi. 16. 70. **-Comp. -वज्रा** *f.* N. of a metre; see App. **-अपत्यम्** Madana, God of love. ...उद्भटोपेन्द्रापत्यपराक्रमैकनिधयो भद्राणि संतन्वते Chola-Champu P. 27, verse 61.

उपोढ See under उपवह्.

उपोती = उपोदिका q. v.

उपोत्त *a.* Moistened, wet; Yv. Ts. 4.

उपोत्तम *a.* Last but one. **−मम्** (अक्षरम्) The last letter but one; cf. उपोत्तमं रिति P. IV. 1. 217.

उपोदक *a.* Near water. **−कः** proximity of water. **−कम्** *ind.* Near water. **−का, −दिका, −दीका** The plant Basella Rubra (पूतिका; Mar. थोर मयाळ).

उपोद्ग्रहः Knowledge.

उपोद्घातः **1** A beginning, commencement. **−2** An introduction, a preface. **−3** An example, an apposite argument or illustration. **−4** An occasion, medium, means; तत्प्रतिच्छन्दकमुपोद्घातेन माधवान्तिकमुपेयात् Mal. 1. **−5** Analysis, ascertaining the elements of anything. **−6** Alluding to, mentioning; Mu. 3. **−Comp.** **−पादः** N. of the third part of the Vāyu P.

उपोद्बलयति Den. P. To confirm, strengthen.

उपोद्बलक *a.* Confirming; तस्य पक्षस्योपोद्बलकानि Ś. B. तस्यैवोपोद्बलकमेतत् 1. 2. 64.

उपोद्बलनम् Confirmation, corroboration.

उपोषणम्, −उपोषितम् A fast.

उपोह् 1 P. (उप−ऊह्) **1** To propel, push or impel towards; उपोह्य रुचिरां नावम् Rām.; so धनुः. **−2** To push under, insert; कूर्चावधस्तादुपोह्य Katyāyana. **−3** To bring near, produce; connected with उपवह् in this sense; q. v. **−4** To accumulate, collect. *−pass.* **1** To be brought about. **−2** To advance, begin.

उपोढ *p. p.* See under उपवह्.

उपोहः Ved. Adding, accumulating; उपोहश्च समूहश्च क्षत्तारौ ते प्रजापते Av. 3. 24. 7.

उप्त, उप्तिः See under वप्.

उब्ज् 6 P. (उब्जति, उब्जाञ्चकार, औब्जीत्, उब्जित) **1** To press down, subdue, keep under or check. इन्द्रासोमा तपतं रक्ष उब्जतम् Av. 8. 4. 1. **−2** To make straight.

उभ्, उम्भ् 6, 7, 9. P. (उभति or उम्भति, उनप्ति, उभ्नाति, उम्भित) **1** To confine. **−2** To compact together. **−3** To fill with; जलकुम्भमुम्भितरसं सपदि सरस्याः समानयन्त्यास्ते Bv. 2. 144. **−4** To cover or overspread with; सर्वमर्मसु काकुत्स्थमौम्भत्तीक्ष्णैः शिलीमुखैः Bk. 17. 88.

उभ *pron. a.* (Used only in the dual) Both; उभौ तौ न विजानीतः Bg. 2. 19; सूर्याचन्द्रमसावुभौ Ch. Up. 7. 12. 1. Ku. 4. 43; Ms. 2. 14; Śi. 3. 8. [cf. Zend. *uba.*; Gr. *amphi*; L. *ambo*].

उभय *pron. a.* (**−यी** *f.*) (Though dual in sense, it is used in the singular and plural only; according to some grammarians in the dual also) Both (of persons or things); यस्तद्वेदोभयं सह Īśa. Up. 11 उभयमप्यपरितोषं समर्थये Ś. 7; उभयमानशिरे वसुधाधिपाः R. 9. 9; उभयीं सिद्धिमुभाववापतुः 8. 23. 17. 38; Amaru. 60; Ku. 7. 78; Ms. 2. 55, 4. 224, 9. 34, **−Comp.** **−अन्वयिन्** *a.* Tending towards both, keeping connection with both. **−अलंकारः** (in Rhet.) A figure of speech, which sets off both the sense and sound. **−अर्थम्** *ind.* for a double object (for earthly prosperity and heavenly happiness also). **−आत्मक** *a.* belonging to both. **−चर** *a.* living in water and on land or in the air, amphibious. Mātaṅga L. 1. 28. (**−रः**) a class of birds who live both on land and in the air. **−च्छन्ना** (in Rhet.) A kind of enigma. **−द्युः** *ind.* **1** on both days. **−2** the day past and to come. **−पदिन्** *a.* Having both Parasmai and Atmane pada. **−भागहर** *a.* **1** applicable to two objects. **−2** taking two shares. (**−रम्**) a medicine that acts in two ways (both as an emetic and a purgative). **−मुख** *a.* two faced; a pregnant female. **−विद्या** two-fold sciences; *i. e.* religious knowledge and knowledge about worldly affairs. **−विध** *a.* of both kinds. **−विपुला** *f.* N. of a metre. **−विभ्रष्ट** *a.* losing both कच्चिन्नोभयविभ्रष्टः Bg. 6. 38. **−वेतन** *a.* receiving wages from both (parties), serving two masters, treacherous, perfidious; उभयवेतनो भूत्वा Pt. 1; Śi. 2. 113. Kau. A. 1. 16. **−व्यञ्जन** *a.* having the marks of both sexes, hermaphrodite. **−संभवः** *a.* dilemma. **−स्नातक** *a.* one who has performed the prescribed ablutions after finishing both his time of studying and his vow. See Kullūka on Ms. 4. 31.

उभयतः *ind.* **1** From both sides, on both sides, to both sides (with acc.) एतदमृतमुभयतः सत्येन परिगृहीतम् Br. Up. 5. 5. 1 उभयतः कृष्णं गोपाः Sk. तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् Y. 1. 58; Ms. 8. 315. **−2** In both cases. **−3** In both ways; पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः Ms. 1. 47. **−Comp.** **−क्षुत्** *a.* two-edged (Ved.). **−दत्, −दन्त** *a.* having a double row of teeth; पशून् मृगान् मनुष्यांश्च व्यालांश्चोभयतोदतः Ms. 1. 43. **−पाश** *a.* having trap on both sides. lit. and fig. सैषोभयतस्पाशा रज्जुर्भवति Mbh. on P. VI. 1. 68. **−प्रज्ञ** *a.* one whose cognizance is directed both inwards and outwards. नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं Māṇḍū. **−भाष** *a.* occurring both in parasmaibhāṣā and Ātmanebhāṣā. **−मुख** *a.* **1** looking either way. **−2** two-faced (as a house &c). **−2** Two-edged (a sword) पट्टीशात्मसमोहस्तबुध्नश्चोभयतो मुखः Śukra. 4. 1044. (**−खी**) a cow; ('यावद्वत्सस्य पादौ द्वौ मुखं योऽन्यां च दृश्यते' तत्काले उभयतो मुखी) Y. 1, 206-7. **−ह्रस्व** *a.* (an accented vowel) produced by two short vowels.

उभयत्र *ind.* **1** In both places. **−2** On both sides; भ्रातरुभयत्रा ते अर्थम् Rv. 3. 53. 5. °उदात्त having an Udātta accent on both sides. **−3** In both cases; Ms. 3. 125, 167.

उभयथा *ind.* **1** In both ways; उभयथापि घटते V. 3. **−2** In both cases.

उभया *ind.* Ved. In both ways; बृहस्पतिर्व उभया न मृळात् Rv. 10. 108. 6. **−Comp.** **−दत्** *a.* having teeth on both sides. **-विन्** *a.* being on both sides, partaking of both. **-हस्ति** *ind.* as much as may be grasped with both hands; उभयाहस्त्या भर Rv. 5. 39. 1. **-हस्त्य** *a.* filling both hands.

उभयायिन् *a.* Tending towards or fit for both (worlds); Bhāg.

उभयीय *a.* Belonging to both.

उभये (य) द्युस् *ind.* **1** On both days. **-2** On two subsequent days. उभयोरह्नोरुभयेद्युः Mbh. on P. V. 3. 22.

उम् *ind.* An interjection of (1) anger; (2) interrogation; (3) promise or assent; (4) cordiality or pacification.

उमः **1** A town. **-2** A wharf.

उमा [ओः शिवस्य मा लक्ष्मीरिव, उं शिवं माति मन्यते पतित्वेन मा-क वा Tv.] **1** N. of the daughter of Himavat and Menā, and wife of Śiva; Kālidāsa thus derives the name:- उ मेति (oh do not, *scil.* practise penance) मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम Ku. 1. 26; उमावृषाङ्कौ R. 3. 23. **-2** Light, splendour. **-3** Fame, reputation. **-4** Tranquility, calmness. **-5** Night. **-6** Turmeric (हरिद्रा). **-7** Flax (अतसी). **-Comp.** **-कटः, -टम्** उमा + कटच् P. V. 2. 29 Vārt. 1 the pollen of flax. **-कान्तः** N. of Śiva; Mb. 13. **-गुरुः, -जनकः** N. of the Himālaya (as the father of उमा). **-चतुर्थी** *f.* The fourth day in the light half of the month of Jyeṣṭha. **-पतिः** N. of Śiva; मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमुमापतिसेविनः Ki. 5. 14; so °ईशः, °वल्लभः, °सहायः &c. **-महेश्वरव्रतम्** N. of a particular observance. **-वनम्** N. of the town Vanapura or Devikoṭa (शोणितपुर). **-सुतः** N. of Kārttikeya or of Gaṇeśa.

उम्यम् A field of linseed or of Curcuma (उमायाः क्षेत्रम्).

उम्ब (बु) रः The upper timber of a door-frame.

उम्बी *f.* The stalks of wheat or barley fried over a fire of wet grass (considered as a tonic); मञ्जरी त्वर्धपक्वा या यवगोधूमयोर्भवेत्। तृणानलेन संप्लुष्टा बुधैरुम्बीति सा स्मृता॥ Bhāva P.

उम्लोचा *f.* N. of an Apsaras; Mb.

उर् To go (a Sautra root).

उर *a.* Going (Ved.). **-रः** A sheep.

उरगः, (**-गी** *f.*) [उरसा गच्छति, उरस् -गम्-ड; सलोपश्च P. III. 2. 48 Vārt.] **1** A serpent, snake; अङ्गुलीवोरगक्षता R. 1. 28, 12. 5, 91. उरगांश्च दिव्यान् Bg. 11. 15. **-2** A Nāga or semi-divine serpent usually represented in mythology with a human face; देवगन्धर्वमानुषोरगराक्षसान् Nala. 1. 28; Ms. 3. 196. **-3** (पुं. न.) Lead. **-गा** N. of a city; अथोरगाख्यस्य पुरस्य नाथम् R. 6. 59. **-गी** A female snake. **-Comp.** **-अरिः -अशनः, -शत्रुः** **1** N. of Garuḍa (enemy of snakes); Śi. 5. 13. **-2** peacock. **-आस्यम्** a kind of spade (serpent-shaped hoe); **-इन्द्रः, -राजः** N. of Vāsuki or Śeṣa. **-प्रतिसर** *a.* having a serpent for a wedding ring. **-वन्धः** A class of bases (of columns &c.) shaped like the face of a snake. **-भूषणः** N. of Śiva (decked with serpents). **-सारचन्दनः, -नम्** a kind of sandal-wood. **-स्थानम्** the abode of the Nāgas, *i. e.* Pātāla.

उरङ्गः, -गमः A snake.

उरणः [Uṇ. 5. 17.] (**-णी** *f.*) **1** A ram, sheep; वृकीवोरणमासाद्य मृत्युरादाय गच्छति Mb., Bhāg. 9. 14. 27. **-2** A certain demon killed by Indra. **-णी** A ewe. **-Comp.** **-अक्षः, -क्षकः, -आख्यः** the plant Cassia Alata or Tora. An esculent and medicinal plant (Mar. टाकळा). **-णम्** Silver.

उरणकः **1** A ram. उरणका इमे बर्करा इमे Mbh. on P. I. 2. 73 एतावुरणकौ राजन्यासौ रक्षस्व मानद Bhāg. 9. 14. 21. **-2** A cloud.

उरभ्रः **1** A ram, देवि पश्याम उरभ्रसंवादं किं मुधा वेतनदानेन M. 1. **-2** The plant Cassia Alata (Mar. टाकळा) **-3** **-सारिका** A kind of poisonous insect.

उररी *ind.* [ऊर्यादिच्विडाचश्च P. I. 4. 61] A particle implying (1) assent, admission or acceptance. (In this sense it is usually used with the roots कृ, भू, or अस् and it has the force of a गति or preposition; उररीकृत्य not उररीकृत्वा. Other forms of the word are उरी, उररी, ऊरी and ऊररी.); (2) Extension.

उररीकृ 8 U. To consent, allow, accept; गिरं न कां कामुररीचकार Bv. 2. 13; M. 5; Dk. 12; Śi. 10. 14.

उररीकारः Promise, agreement, admission.

उररीकृत *p. p.* **1** Promised, agreed, accepted. **-2** Spread, extended.

उरल *a.* Moving (Ved.).

उरशः N. of a country inhabited by a warrior tribe.

उरस् *a.* Best, excellent. *n.* (**उरः**) The breast, bosom; व्यूढोरस्को वृषस्कन्धः R. 1. 13; Ku. 6. 51; उरसि कृ to clasp to the bosom. **-Comp.** **-कटः** **1** the sacrificial thread hung round the neck and upon the breast. **-2** an upper garment (for boys). **-कपाटः** A broad strong chest. **-क्षतम्** injury to the chest. **-क्षयः** Consumption, a disease in the chest. **-गामिन्** *a.* going on the breast (as a reptile), creeping, crawling. **-ग्रहः, -घातः** a disease of the chest, pleurisy. **-छदः, -त्राणम्** a cuirass, breast-plate; Śi. 15. 80. cf. also उरच्छदमनिर्भिद्य हुतभुक्तिताः शराः Śiva. B. 13. 10. 6. **-जः, -भूः, उरसिजः, उरसिरुहः** the female breast; रेजाते रुचिरदृशामुरोजकुम्भौ Śi. 8. 53, उरसिरुहेण हारलीलाम् 25, 59. **-भूषणम्** an ornament of the breast. **-सूत्रिका** a necklace of pearls hanging over the breast. **-स्तम्भः** Oppression of the chest, asthma. **-स्थलम्** the breast, bosom.

उरसिलोमन् *a.* Having hair on the breast,

उरस्तस् *ind.* From the breast, towards the bosom.

उरस्वत्, उरसिल *a.* Broad-chested, full-breasted.

उरस्य *a.* [उरस्-यत्] 1 Being in the breast. –2 Pectoral. –3 Requiring an effort of the chest (as any exertion). –4 Legitimate (a son or daugher); born from a married couple of the same tribe or caste. –5 Excellent. **–स्यः** 1 A son. –2 The female breast; Bṛi. S.

उरस्यति Den. P. To be strong.

उरा Ved. A ewe. अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं Rv. 10. 95. 3

उराहः A horse of a pale colour with dark legs.

उरी A particle of assent; see उररी.

उरीकृ 8 U. 1 To allow, admit, accept; दक्षेणोरीकृतं त्वया Bk. 8. 11; R. 15. 70. –2 To follow, have recourse to; अयि रोषमुरीकरोषि नो चेत् Bv. 1. 44, 1. 12, 2. 84.

उरीकार = उररीकार q. v.

उरु *a.* [उर्णु-कु नुलोपो ह्रस्वश्च Uṇ. 1. 31] (**–रु–र्वी** *f.*; compar. वरीयस्; super. वरिष्ठ) 1 Wide, spacious. –2 Great, large; जातः कुले तस्य किलोरुकीर्तिः R. 6. 74. –3 Excessive, much, abundant; धनान्युरूणि Śi. 3. 76. –4 Excellent, precious, valuable. *n.* Ved. Wide space, space or room. –*ind.* Far, far off (Ved.). –**Comp.** **–अङ्गः** 1 a mountain. –2 the ocean. **–कालः, –कालकः** the creeper Cucumis Colocynthis (इन्द्रवारुणी). **–कीर्ति** *a.* renowned, well-known; तवोरुकीर्तिः श्वशुरः सखा मे R. 14. 74. **–कृत्** *a.* making room, granting space; increasing; उरुकृदुरु णस्कृधि Rv. 8. 75. 11. **–क्रम** *a.* Ved. 1 taking wide strides. शं नो विष्णुरुरुक्रमः Tait. Up. 1. 1. 1. –2 of high rank. (**–मः**) an epithet of Viṣṇu in the dwarf incarnation; उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम् Bhāg. 1. 5. 13. **–क्षय** *a.* having spacious dwellings. (**–यः**) a spacious dwelling. उरुक्षयेषु दीद्यत् Rv. 10. 118. 8. **–क्षितिः** *f.* Ved. a spacious dwelling; उरुक्षितिं सुजनिमा चकार Rv. 7. 100. 4. **–गाय** *a.* 1 sung or praised by the great; Aśvad. 16. एष पन्था उरुगायः सुशेवः Ait. Br. 7. 13, उरुगायोरुगीतो वा पश्यन्तीनां कुतः पुनः Bhāg. 10. 90. 26. –2 offering wide scope for movement. (**–यः**) 1 N. of Viṣṇu, the Āśvins, Soma and Indra. –2 wide space or space; (**–यम्** also). –3 praise. **–ग्राहः** Great restraint; उरुग्राहगृहीतानां गदां बिभ्रद् वृकोदरः Mb. 5. 51. 7. **–चक्रि** *a.* granting ample assistance, or allowing unrestrained motion; अंहोश्चिदस्मा उरुचक्रिरद्भुतः Rv. 2. 26. 4. **–चक्षस्** *a.* Ved. far-seeing; समख्ये देव्या धिया संदक्षिणयोरुचक्षसा Vāj. 4. 23. **–जन्मन्** *a.* nobly born; बह्वेरपां दग्धुरिवोरुजन्मा M. 5. 17. **–ज्मन्** *a.* having a wide path or range; न उरुष्या ण उरुज्मन्नप्रयुच्छन् Av. 6. 4. 3. **–ज्रयस्, –ज्रि** *a.* of great speed, of mighty impetus. **–तापः** great heat. **–धार** *a.* Ved. giving a broad stream (of milk, as a cow). **–प्रथस्** *a.* wide-spreading, far-spread. **–माणः** N. of a plant, Crataeva Religiosa (Mar. वायवरणा). **–मार्गः** a long road. **–लोक** *a.* widely illuminating; or widely extended; ममान्तिरिक्षमुरुलोकमस्तु Rv. 128. 2. (**–कः**) the best world. (**–कम्**) the intermediate region between earth and heaven. **–विक्रम** *a.* valiant, mighty. **–व्यचस्** *a.* P. VI. 1. 17 Vārt. 4. widely extended, extensive. उरुव्यचाः कण्टकः Mbh. on P. VI. 1. 17. –*m.* a malignant spirit, an imp. **–व्यञ्च्** *a.* Ved. 1 far-reaching, capacious. –2 perceived in a distant place (as a sound); तुविक्षत्रामजरन्तीमुरूचीम् Vāj. 21. 5. **–शंस** *a.* 1 to be praised by many. –2 reigning over a wide region. –3 praising aloud. **–शर्मन्** *a.* Ved. widely pervading; Vāj. 10. 9. **–षा** *a.* granting much, or granting wide or free scope; महीमस्मभ्यमुरुषामुरु ज्रयो Rv. 5. 44. 6. **–सत्त्व** *a.* of mighty or great strength, powerful; सिंहोरुसत्त्वं निजगाद सिंहः R. 2. 33; magnanimous, of a noble nature. **–स्वन** *a.* having a loud voice, stentorian. **–हारः** a valuable necklace.

उरुता, –त्वम् Greatness, magnitude, vastness.

उरुधा *ind.* In many ways; अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा Bhāg. 1. 13. 47.

उरुवुः, –वुकः, –वूकः The plant Ricinus Communis. (Mar. एरण्ड).

उरुञ्जिरा *f.* N. of the river Vipāś; Nirukta.

उरुष्यति Den. P. 1 To protect, guard, defend; उषासानक्तोत न उरुष्यताम् Av. 6. 3. 3. –2 To desire wide scope or freedom. –3 To escape from (with acc.).

उरुष्या A desire to protect. उरुष्या पायुरभवत् सखिभ्यः Rv. 6. 44. 7.

उरुष्यु *a.* Desirous of protecting. इमे मा पिता यशस उरुष्यवो Rv. 8. 48. 5.

उरूल *a.* 1 Liking space. –2 Fond of expatiating. –3 Free, unrestrained, self-willed.

उर्विया *ind.* Far, far off, far and near; widely.

उर्वी 1 'Wide region', the earth; स्तोकमुर्व्यां प्रयाति Ś. 1. 7; जुगोप गोरूपधरामिवोर्वीम् R. 2. 3, 1. 14, 30, 75, 2. 66; Me. 21. –2 Land, soil. –3 The open space or expanse (comprising six spaces; *i. e.* the four ouarters of the sky with the upper and lower spaces). –4 A river. –5 (du.) Ved. the two worlds, or the heaven and earth. आ यः पप्रौ जायमान उर्वी Rv. 6. 10. 4. –**Comp.** **–ईशः, –ईश्वरः, –पतिः, –धवः** a king. **–धरः** 1 a mountain. –2 the serpent Śeṣa. **–भृत्** *m.* 1 a king. –2 a mountain. **–रुहः** a tree; Śi. 4. 7, 5. 69.

उर्व्या 1 Greatness. –2 Protection, security. –3 Amplitude, vastness.

उर्व्यूति *a.* 1 Yielding great protection. श्रोता हवं गृणत उर्व्यूतिः Rv. 6. 24. 2. –2 Able to help far and near.

उरूरी = उररी q. v.

उरूकः = उलूक q. v.

उर्ज् 1, 10 P. To leave.

उर्जित *p. p.* 1 Aged, strong, powerful. -2 Abandoned, left.

उर्णनाभः A spider; cf. ऊर्णनाभ.

उर्णा 1 Wool, felt. -2 A circle of hair between the eye-brows; see ऊर्णा.

उर्द् 1 Ā. (उर्दते, उर्दित) 1 To taste. -2 To give, grant. -3 To play. -4 To measure. -5 To be easy or cheerful. see ऊर्द्.

उर्द्रः An otter (Mar. पाणमांजर).

उर्व् 1 P. (उर्वति, और्वीत्, उर्वित) To kill or hurt.

उर्वटः 1 A calf. -2 A year.

उर्वरा [उरु शस्यादिकच्छमृति, ऋ-अच्] 1 Fertile soil (yielding every kind of crop); पततां गणैः पिबतु सार्धमुर्वरा Śi. 15. 66. also बीजानामिव चोर्वरा 7. 4. 2. -2 Land in general. -3 A mixed mass of fibres, wool &c. -4 A humorous term for curled hair.

उर्वरित *a.* 1 Much, excessive. -2 Remaining after; भुक्त° Pt. 5.

उर्वर्य *a.* [उर्वरायां भवः यत्] Belonging to a field sown with corn.

उर्वरी 1 A superior woman. -2 Tow, fibres drawn out of the distaff. -3 A wife presented together with many others for choice (Tv.); ओषधीनामहं वृण उर्वरीरिव साधुया Av. 10. 4. 21.

उर्वशी [उरून् महतोऽपि अश्नुते वशीकरोति, उरु-अश्-क गौरा० ङीष् Tv.] 1 N. of a famous Apsaras or nymph of Indra's heaven who became the wife of Purūravas. [Urvaśī is frequently mentioned in the Ṛigveda; at her sight the seed of Mitra and Varuṇa fell down, from which arose Agastya and Vasiṣṭha; (see Agastya). Being cursed by Mitra and Varuṇa she came down to the world of mortals, and became the wife of Purūravas, whom she chanced to see while descending, and who made a very favourable impression upon her mind. She lived with him for some time, and went up to heaven at the expiration of her curse. Purūravas was sorely grieved at her loss, but succeeded in securing her company once more. She bore him a son named Āyus, and then left him forever. The account given in the Vikramorvaśīyam differs in many respects, where Indra is represented to have favoured Purūravas with her lifelong company though he had himself cursed her. Mythologically she is said to have sprung from the thigh of the sage Nārāyaṇa, q. v.]. उर्वशी वै रूपिण्यप्सरसाम् Mbh. 5. 2. 95; मर्त्तांसश्चिदुर्वशीरकृप्रन् Av. 18. 3. 23; स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा V. 4. 47. -2 Wish, ardent desire. **-Comp.** **-तीर्थम्** N. of a sacred place referred to in Bhārata. **-नाममाला** N. of a lexicon. **-रमणः, -सहायः, -वल्लभः** N. of Purūravas.

उर्वारुः A kind of cucumber; see इर्वारु.

उर्वारुकम् The fruit of the above. उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् Rv. 7. 59. 12.

उल् (A Sautra root) To burn.

उलः 1 A kind of wild animal; Av. 12. 1. 49. -2 Half ripe pulses fried over a slight fire; Nigh. (Mar. हुळा).

उलड् 10 P. (उलण्डयति) To throw out, to eject; Dhātupāṭha.

उलपः 1 A creeping plant, a spreading creeper. -2 Soft grass (कोमलतृणम्), the grass or reed Saccharum Cylindricum; गोगर्भिणीप्रियनवोलपमालभारिसव्योपकण्ठविपिनावलयो भवन्ति Māl. 9. 2; Ki. 10. 3; Śi. 4. 8. -3 A shrub or bush; a wick (Ved.); Rv. 10. 142. 3.

उलप्य *a.* Belonging to this grass. **-प्यः** N. of Rudra.

उलिः, उल्ली *f.* 1 A species of Arum. -2 White onion; Nigh.

उलिन्दः 1 N. of a country. -2 N. of Śiva.

उलुप = उलप q. v.

उलुपिन् *m.* A guinea pig, porpoise; so **उल (-लू)-पिन्.**

उलुलिः Ved. Howling, a howl; an outcry indicative of prosperity; पृथग् घोषा उलुलयः केतुमन्त उदीरताम् Av. 3. 19. 6.

उलूकः 1 An owl; नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् Bh. 2. 93; त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः Śi. 11. 64. cf. also कथमुलूकशब्द उलूकवचनः। रलयोः समानश्रुतित्वात्। ŚB. on MS. 9. 4. 22. -2 N. of Indra. -3 N. of a Muni (perhaps identical with कणाद, whose वैशेषिकदर्शन is called औलूक्य-दर्शन). -4 (pl.) N. of a country and its king who was an ally of the Kurus. **-कम्** 1 N. of the reed Saccharum Cylindricum; see उलप. -2 Fat; वनिष्ठुसन्निधानादुरूकेण वपाभिधानम्। (v.l.) MS. 9. 4. 22. **-जित्** A crow. **-यातुः** A demon in the shape of an owl; उलूकयातुं शुशुलूकयातुम् Rv. 7. 104. 22.

उलूखलः A staff of Udumbara wood. **-लम्** A wooden mortar used for cleansing rice (from the husk &c.); वनस्पतिभ्य इत्येव Rv. 1. 28. 6. अवहननायोलूखलम् Mbh.; मुषलोलूखले हरेत् Ms. 3. 88, 5. 117. -2 A kind of weapon; Mb. 7. 178. 23. **-Comp.** **-सुतः** the Soma juice pressed out in a (wooden) mortar; Rv. 1. 28. 1-4.

उलूखलकम् 1 A mortar; Rv. 1. 28. 5. -2 Bdellium, a gummy substance or the plant which yields it. (Mar. गुग्गुळ).

उलूखलिक *a.* 1 Pounded in a mortar. -2 (At the end of comp.) Using as a mortar; दन्त° using the teeth as a mortar; Ms. 6. 17; Y. 3. 49.

उल्लूतः A large snake, the Boa (अजगर).

उल्लूप, -पिन् See उलप, उलुपिन्.

उल्लूपी A Nāga princess. [She was the daughter of the serpent Kauravya. While one day she was bathing in the Ganges, she happened to see Arjuna, and being enamoured of his handsome form, she managed to have him conveyed to her home, the Pātāla, and there induced him to take her as his wife, which he, after considerable hesitation, consented to do. She bore him a son named Irāvat. When Arjuna's head was cut off by Babhruvāhana's arrow, it was with her assistance that he was restored to life; see Arjuna.]

उल्लूलि, -उल्लूलु *a.* Crying aloud, noisy (while joyous); तं जायमानं घोषा उल्लूलवोऽनूदतिष्ठन् Ch. Up. 3. 19. 3; Lāṭyāyana 4. 2. 9.

उल्लुलुध्वानिः The noise of melodious chorus, especially of women, on happy occasions like the marriage festival; cf. उच्चैरुल्लुलुध्वनिमुच्चचार N. See उलुलिः.

उल्का [Uṇ. 3. 42] **1** A fiery phenomenon in the sky, a meteor; विरराज काचन समं महोल्कया Śi. 15. 92; Ms. 1. 38, 4. 103; Y. 1. 145. **-2** A fire-brand, torch; न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया H. 1. 83. **-3** Fire, flame; बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः Me. 55. **-4** N. of a grammar. **-Comp. -धारिन्** *a.* a torch-bearer. **-नवमी** *f.* The ninth day of the light half of the month of Āśvina; (a व्रत is observed on this day.) **-पातः** the fall of a meteor. **-मालिन्** *m.* N. of one of Śiva's attendants. **-मुखः** a demon or goblin (having a mouth of fire); वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतात् Ms. 12. 71; Māl. 5. 13.

उल्कुषी 1 A meteor. **-2** A firebrand.

उल्बम्, -उल्वम् 1 The bag which surrounds the embryo, यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् Bg. 3. 38; fœtus. **-2** The vulva **-3** The womb; Vāj. 19. 76. **-4** A cave.

उल्ब्यम् 1 Excess and vitiation of any one of the three humours of the body; *i. e.* phlegm, bile, or wind (त्रिदोष). **-2** Any calamity.

उल्मुकः A firebrand, torch. प्रकाशिताग्राः पार्थेन ज्वलदुल्मुकपाणिना Bm. 1. 890.

उल्ब (ल्व) ण *a.* **1** Thick, clotted, copious, abundant (blood &c.); स्यन्नस्वेदकणोल्बणः Bk. 5. 83. °रुधिरम् Mv. 6. 33. **-2** Much, excessive, intense; प्रववर्ष च तत्रैव सहसा तोयमुल्बणम् Mb. 3. 9. 18. केनचिन्मधुरमुल्बणरागम् Śi. 10. 54, 68, 12. 37; Ku. 7. 84. **-3** Strong, powerful, great; आम्लादिभिरुल्बणैः Bhāg. 3. 31. 7. रिपुरुल्बणभीमभोगभाजां भुजगानां जननीं जजाप विद्याम् Śi. 20. 41; °रसः U. 5. 26 the heroic sentiment; Dk. 23, 25; K. 299, 302. तेनैवात्युल्बणं तेषां कटकं घटिकात्रयम् (विहितम्) Parṇāl. 5. 71. **-4** Manifest, clear; तस्यासीदुल्बणो मार्गः पादैरिव दन्तिनः R. 4. 33. विनिशश्वसुरुल्बणं शयाना विकृताक्षिप्तभुजा जजृम्भिरे च Bu. Ch. 5. 59. **-5** Gaudy, showy; मृगैर्मयूरैश्च समाकुलोल्बणम् Rām. 2. 15. 41; अनुल्बणवेषेण K. 66. **-6** Dreadful; मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः Bhāg. 3. 12. 17. **-7** Sinful; भवत्यल्पफलं कर्म सेवितं नित्यमुल्बणम्। अबुद्धिपूर्वं धर्मज्ञ कृतमुग्रेण कर्मणा ॥ Mb. 12. 291. 16. **-णः** A particular position of hands in dancing. **-णम्** *ind.* Much, heavily (as sighing). **-Comp. -रसः** Valour (वीररस); विकच विकरालोल्बणरसः U. 5. 26.

उल्लः An esculent root, Arum Campanulatum (Mar. श्वेतसुरण). cf. उल्लिः

उल्लकः A particular kind of liquor (Hch. 7).

उल्ल(ल्लु)कसनम् Horripilation, erection of the hair of the body.

उल्लङ्घ् 1 Ā., 10 P. **1** To leap over, pass over or beyond; उल्लङ्घ्योच्चैःकुचतटभुवम् Śi. 7. 74, 12. 77. **-2** To transgress, violate, disregard, exceed; Śi. 12. 57; Mu. 1. 10; गौरवमुल्लङ्घयिष्यति Mu. 4; K. 160; Śi. 3. 29.

उल्लङ्घनम् 1 Leaping or passing over. **-2** Transgression, violation. **-3** Offence, sin; Ks.

उल्लङ्घित *p. p.* **1** Jumped over or across, passed over or beyond; °अध्वन्. **-2** Transgressed, violated; °शासन disobedient.

उल्लम्बित *a.* Erected, elevated.

उल्लल *a.* **1** Shaking, tremulous. **-2** Covered with thick hair, shaggy. **-3** Affected by many diseases.

उल्ललत् *a.* **1** Shaking, trembling. **-2** Moving irregularly or convulsively.

उल्ललित *p. p.* **1** Shaken, trembling, agitated. **-2** Raised up, elevated.

उल्ललयति Den. P. To jump; spring (shake the body up); तावत्खरः प्रखरमुल्ललयाञ्चकार Śi. 5. 7; Pt. 4.

उल्लस् 1 P. **1** To jump up, sport, play, wave, flutter; उल्लसितासितपताकासहस्रम् K. 96; Śi. 5. 47, 53. **-2** To flash, shine, glitter, sparkle; उल्लसत्काञ्चनकुण्डलाग्रम् Śi. 3. 5, 33; 5. 55; 16. 61; 20. 56; (fig.) to brighten or cheer up; K. 189. **-3** To rise, appear forth; अर्कोपलोल्लसितवह्निभिरह्नि तप्ताः Śi. 4. 58, 6. 51, 16. 51; यदुल्लसितविस्मयाः Māl. 9. 38. **-4** To be reflected; ... उल्लसन्त्यः विदधति दशनानां सीत्कृताविष्कृतानामभिनवरविभासः पद्मरागानुकारम् Śi. 11.54. **-5** To blow, open, be expanded. *-Caus.* **1** To cause to jump up or play. **-2** To brighten, illuminate, grace; क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतः कौरवानद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तवः ॥ Ve. 1. 12; U. 4. **-3** To divert, delight; **-4** To shake, move K. 22; जिह्वाशतान्युल्लसयन्त्यजस्रम् Ki. 16. 37.

उल्लस *a.* **1** Bright, shining. **-2** Merry, happy. **-3** Going out, issuing, appearing; °ता splendour, brilliancy; mirth, happiness, issuing &c.

उल्लसत् *a.* Shinning forth. **–Comp.** **–फलः** poppy.

उल्लसनम् **1** Happiness, joy. **–2** Horripilation.

उल्लसित *p. p.* **1** Shining, brilliant, splendid. **–2** Happy, delighted. **–3** Drawn up, uplifted, brandishing (as a sword.) ददृशुरुल्लसितासिलतासिताः Śi. 6. 51. **–4** Gleaming, fluttering: °हरिणकेतनः रथः V. 1.

उल्लासः **1** Joy, delight; सोल्लासम् U. 6; सकौतुकोल्लासम् U. 2; उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पंधयानाम् S. D. **–2** Light, splendour. **–3** (In Rhet.) A figure of speech in which a reference is made to the merits or demerits of one thing by comparing or contrasting the merits or demerits of another; अन्यदीयगुणदोषप्रयुक्तमन्यस्य गुणदोषयोराधानमुल्लासः R. G. for example see R. G. *ad. loc.*; cf. Chandr. 5. 131. 133. **–4** A division of a book, such as chapter, section &c.; as the ten Ullāsas of the Kāvyaprakāśa. **–5** Beginning, commencement. **–6** Growth, increase; न तेषां युगपद्राजन् ह्रास उल्लास एव वा Bhāg. 7. 1. 7. –*a.* Pleasing, delightful; मुक्ताफलैश्चिदुल्लासैः Bhāg. 9. 11. 33.

उल्लासन *a.* Causing to leap or dance. **–नम्** Splendour **–ना** Causing to come forth or appear; B. R.

उल्लासित *a.* Delighted, rejoicing.

उल्लासिन् *a.* **1** Delighted सुमनसामुल्लासिनि मानसे Chandr. **–2** Bright, splendid.

उल्लाघ *a.* [P. V. III. 2. 55] **1** Recovered from sickness convalescent. **–2** Dexterous, clever, skilful. **–3** Pure. **–4** Happy, delighted. **–5** Wicked. **–6** Black. **–घः** Black pepper.

उल्लाघता Wholesomeness, health.

उल्लप् 1 P. To remove, allay; दीर्घदारुणमपि संतापं झटित्युल्लपता U. 4.

उल्लापः **1** Speech, words; श्रुता मयार्यपुत्रस्योल्लापाः U. 3. जीवितनिरपेक्ष इव अस्या उल्लापः Nāg. 2. **–2** Insulting words, taunting speech, taunt; खलोल्लापाः सोढाः Bh. 3. 6. **–3** Calling out in a loud voice. **–4** Change of voice by emotion, sickness &c. **–5** A hint, suggestion.

उल्लापिक *a.* Betraying, indicating; लाजोल्लापिकधूमाढ्यं Mb. 5. 191. 21. **–कः** An upper layer; लाजोल्लापिकभूषिताः Mb. 13. 98. 61.

उल्लापिन् *a.* Calling out; indicating.

उल्लाप्यम् A kind of drama; see S. D. 545.

उल्लिख् 6 P. **1** To scratch, cut up, scrape, tear or rip up, scarify; जलदसंहतिमुल्लिखन्त्यः Śi. 5. 20: K. 30; to furrow (as ground); Mv. 1. 20. **–2** To rub or grind against; विषाणोल्लिखितस्कन्धम् H. 3. 139; K. 14. **–3** To grind down; polish; संस्कारोल्लिखितो महामणिः Ś. 6. 5; R. 6. 32; त्वष्टा विवस्वन्तमिवोल्लिलेख Ki. 17. 48. **–4** To carve. **–5** To paint, write, draw in a picture; इति स्वहस्तोल्लिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः Ku. 5. 58. **–6** To bear, raise.

उल्लिखित *p. p.* **1** Scratched, scraped &c. **–2** Thrown up, tossed. **–3** Written over or above. **–4** Pared, made thin.

उल्लेखः **1** Allusion, mention. –2 Description, utterance, pronunciation. **–3** Boring or digging out. **–4** (In Rhetoric) A figure of speech in which an object is described according to the different impressions caused by its appearance; बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते। स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः Chandr. 5. 19; cf. S. D. 682. **–5** Rubbing, scratching, tearing up; खुरमुखोल्लेख K. 191; कुट्टिम° 232.

उल्लेखनम् **1** Rubbing, scratching, scraping &c. **–2** Digging up; Y. 1. 188; उल्लेखनेन भूमिः शुध्यति Ms. 5. 124. **–3** Vomiting. **–4** Mention, allusion, utterance. **–5** Raising up, elevating. **–6** Writing, painting. –7 Marking out by lines (the स्थण्डिल &c. in a sacrifice).

उल्लेखिन् *a.* Tearing; K. 50.

उल्लिङ्गित *a.* **1** Famous, known. **–2** Made manifest (by marks or characteristics); सलेशमुल्लिङ्गितशात्रवेङ्गितः Ki. 14. 2.

उल्ली An onion.

उल्लीढ *a.* Rubbed, polished; मणिः शाणोल्लीढः Bh. 2. 44.

उल्लुञ्चनम् **1** Plucking out, cutting; पादकेशांशुककरोल्लुञ्चनेषु पणान् दश (दमः); Y. 2. 217. **–2** Plucking or pulling out the hair.

उल्लुण्ठनम्, उल्लुण्ठा **1** Rolling, wallowing. **–2** Irony; सोल्लुण्ठम् धीराधीरा तु सोल्लुण्ठभाषणैः खेदयेदमुम् S. D. 105; सोल्लुण्ठम् ironically, often occurring as a stage-direction in plays.

उल्लुण्ठित *a.* Rubbed against.

उल्लु *a.* Cutting up.

उल्लोचः A canopy, an awning. न मञ्चको न चोल्लोचो न पताका न च ध्वजः Śiva. B. 12. 117.

उल्लोलः *a.* Violently moving, excessively tremulous; °स्खलित Māl. 5. 3; °कल्लोल K. 302 high or surging; Mv. 5. 2; लोल° violently agitated or exercised; U. 3. 36. **–लः** A large wave or surge. उल्लोलसंक्रान्तविलोलमूर्तिरुद्याति सिन्धोरुडुचक्रवर्ती Rām. ch. 6. 53.

उल्व, उल्वण See उल्ब, उल्बण.

उवटः N. of a commentator on ऋग्वेद प्रातिशाख्य.

उवरकः A kind of dwelling for the ascetics, a kind of store-room; (cf. Pāli ओवरक, Mar. ओवरी ?). (Ind. Ant. Vol. VII, Kuḍā inscriptions No. 8.).

उशत् *a.* **1** Beautiful; तेनायं स उशत्तमः Bhāg. 1. 3. 14. जायेव पत्य उशती सुवासाः Mbh. 1. 1. 1. **–2** Dear, beloved; बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलम् Bhāg. 7. 9. 16. **–3** Pure, sinless; विवेकेनोशतात्मना Bhāg. 7. 7. 24; उशतीं गिरम् 4. 2. 13.–**4** Impure, obscene; वर्जयेदुशतीं वाचम् Mb. 12. 235. 10.

उशनस् *m.* [वश्-कनसि संप्र॰ Uṇ. 4. 238] (Nom. sing. उशना; Voc. sing. उशनन्, उशन, उशनः) N. of Śukra, regent of the planet Venus, son of Bhṛigu and preceptor of the Asuras. In the Vedas he has the epithet (or patronymic name) *Kāvya* given to him, probably because he was noted for his wisdom; मित्रावरुणावुशनां काव्यम् (अवथः) Av. 4. 29. 6. cf. कवीनामुशना कविः Bg. 10. 37; He is also known as a writer on civil and religious law (Y. 1. 4). and as an authority on civil polity; शास्त्रमुशनसा प्रणीतम् Pt. 5; अध्यापितस्योशनसापि नीतिम् Ku. 3.6. **–Comp. –प्रियम्** A kind of gem Called **गोमेद** (वैडूर्य ?)

उशना *ind.* Ved. Joyfully, willingly.

उशाना Ved. **1** Wish, desire, **–2** The plant from which Soma juice is produced. **–3** N. of a wife of Rudra.

उशिज् Ved. **1** Desiring, striving earnestly. **–2** Devoted to, willing. *–m.* **1** Fire. **–2** Ghee or clarified butter.

उशिजः N. of the father of Kakṣivat.

उशी Wish, desire.

उशेन्य Ved. To be wished for or desired.

उशती **1** Injurious talk. **–2** Cutting speech.

उशीनराः (pl.) N. of a country (Central India ? M. W.) and its inhabitants. सोवसदुशीनरेषु Kauṣ. Up. 4. 1. *–f.* A queen of that people; य आवहदुशीनराण्या अनः Av. 10. 59. 10.

उशी (षी) रः, –रम्, उशी (षी) रकम् The fragrant root of the plant Andropogon Muricatus (वरिणमूल, Mar. काळावाळा); स्तनन्यस्तोशीरम् Ś. 3. 9. **–री** A sort of grass, a small sort of Saccharum.

उशीरिक *a.* Trading in or selling Uśīra.

उष् 1 P. (ओषति, उवोष, ओषाञ्चकार, ओषित-उषित-उष्ट) **1** To burn, consume; ओषाञ्चकार कामाग्निर्दशवक्त्रमहर्निशम् Bk. 6. 1, 14. 62; Ms. 4. 189. **–2** To punish, chastise; दण्डेनैव तमप्योषेत् Ms. 9. 273. **–3** To kill, injure.

उष *a.* Burning. **–षः 1** Early morning, dawn, day-break. **–2** A libidinous man, **–3** Saline earth. **–4** Bdellium.

उषणम् **1** Black pepper. **–2** Ginger. **–3** The root Piper Longum. **–णा** Piper Longum. **–2** Piper Chaba (चविक). **–3** Dried ginger.

उषपः **1** Fire. **–2** The sun.

उषित *p. p.* **1** Burnt, consumed. **–2** (fr. वस्) Dwelt, fixed, remaining in or on; stale. **–3** Quick, expeditious. **–तम्** Habitation. °गवीन (= आशितंगवीन).

उष्ण *a.* [उष्-नक् Uṇ. 3. 2.] **1** Hot, warm; °अंशुः, °करः &c. **–2** Sharp, strict, active; आददे नातिशीतोष्णो नभस्वानिव दक्षिणः; R. 4. 8 (where उष्ण has sense **1** also). **–3** Pungent, acrid (as a रस). **–4** Clever, sharp. **–5** Choleric, warm, passionate. **–ष्णः, –ष्णम्** **1** Heat, warmth. **–2** The hot season (ग्रीष्म); उष्णे वर्षति शीते वा मारुते वाति वा भृशम्। न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः॥ Ms. 11. 113. **–3** Sunshine. **–4** A deep or feverish sigh. तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् Rām. 5. 19. 17. **–5** Sorrow, distress (of separation, bereavement &c.); उष्णार्दितां (नीलकण्ठीमिव) Rām. 5. 5. 25. **–ष्णः** An onion. **–ष्णा 1** Warmth, heat. **–2** Consumption. **–3** Bile. शीतोष्णे चैव वायुश्च त्रयः शारीरजाः गुणाः Mb. 12. 16. 11. °अङ्गत्वम्, °मलत्वम् Bile, disease. **–Comp. –अंशुः, –करः, –गुः, –दीधितिः, –रश्मिः, –रुचिः** 'hot-rayed', the sun; लोकेन चैतन्यमिवोष्णरश्मेः R. 5. 4. परिधेर्मुक्त इवोष्णदीधितिः R. 8. 90; Ku. 3. 25. **–अभिगमः, –आगमः, –उपगमः** approach of heat, hot season. **–असहः** the cold season. **–उदकम 1** warm or hot water. **–2** a body-shampooer (अङ्गमर्दक); cf. Rām. 2. 83. 14. 'उष्णोदकं समुल्लेखोद्वाहनोद्वर्तनेषु च' **–उष्ण** *a.* Very hot; उष्णोष्णशीकरसृजः Śi. 5. 45. **–कालः, –गः 1** the hot season; चलं हि तव सौभाग्यं नद्याः स्रोत इवोष्णगे Rām. 2. 7. 15. **–2** The rainy season; गङ्गावेगमिवोष्णगे Mb. 5. 139. 11 (according to the नीलकण्ठ-भाष्य). **–करण** *a.* heating. **–गन्धा** N. of a plant (Mar. कोळिंजन). **–गुः** The sun; क्षणेन नाशयामास नैशं तम इवोष्णगुः Bhāg. 10. 76. 17. **–नदी** the hot river वैतरणी or the river of hell. **–बाष्पः 1** tears. **–2** hot vapour. **–वारणः, –णम्** an umbrella, parasol; यदर्थमम्भोजमिवोष्णवारणम् Ku. 5. 52. **–वीर्यः** Delphinus Gangeticus (शफरी मत्स्य).

उष्णक *a.* **1** Sharp, smart, active; य पुनराशु कर्तव्यानर्थानाश्वेव करोति स उच्यते उष्णक इति Mbh. on P. V. 2. 72. **–2** Sick with fever, suffering pain. **–3** Warming, heating. **–4** Bent, stooping. **–कः 1** Fever. **–2** The hot season, summer. **–3** Revolving, turning round. **–4** The betel-nut; Nigh.

उष्णता, –त्वम् Heat, warmth.

उष्णालु *a.* [उष्णं न सहते, आलु Vārt. on P. V. 2. 122.] Not being able to bear heat, scorched by, suffering from, heat; उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी V. 2. 23.

उष्णिका Rice-gruel.

उष्णिमन् *m.* Heat; संस्पर्शेनोष्णिमानं विजानाति Ch. Up. 3. 13. 7.

उष्णीगङ्गा The hot Gaṅgā *i. e.* the Badarī (having hot sources).

उष्मः, –उष्मकः [उष्-मक्] **1** Heat. **–2** The hot season, summer. **–3** Spring. **–4** Anger, warmth of temper. **–5** Ardour, eagerness, zeal. **–Comp. –अन्वित** *a.* enraged. **–आगमः, –उपगमः** the hot season. **–पः 1** the son of Bhṛigu. **–2** the manes; a deceased ancestor. **–भास्** *m.* the sun. **–स्वेदः** a vapour bath.

उष्मन् *m.* [उष्-आधारे मनिन्] 1 Heat, warmth; अर्थोष्मन् Bh. 2. 40; Ms. 9. 231, 2. 23, Ku. 5. 46, 7. 14; -2 The hot season. -3 Anger, wrath. -4 Ardour, eagerness. -5 The letters श्, ष्, स् and ह् (in gram.); see ऊष्मन्. ऊष्माणमिन्द्रियाण्याहुरन्तस्था बलमात्मनः Bhāg. 3. 12. 47.

उष्मायणः The hot season.

उषस् *f.* 1 Dawn, morning; मधु नक्तमुतोषसः Bṛi. Up. प्रदीपार्चिरिवोषसि R. 12. 1; उषसि उत्थाय rising at day-break. -2 Morning light; cf. Aurora; (personified as the daughter of heaven and sister of the Ādityas). -3 The deity that presides over the morning and evening twilights (used in dual); उषसौ or उषासौ. -4 The outer passage of the ear. -5 The Malaya range. -6 Evening. **-सी** The end of the day, evening twilight. **-Comp. -करः** The moon. **-कलः** A cock. **-पतिः** Aniruddha. **-बुध्** *a.* awakening with the morning light, early awaked. **-बुध** *a.* awakening early; केतुं दिवो रोचनस्थामुषर्बुधम् Rv. 3. 2. 14. (**-धः**) 1 fire; U. 6. -2 a child. -3 N. of a tree (चित्रक).

उषासानक्तम् Ved. Dawn and night; उषासानक्ता पुरुधा विदाने Rv. 1. 122. 2.

उषस्य *a.* Sacred to the dawn. Vāj. 24. 4.

उषा [ओषत्यन्धकारम् उष्-क] 1 Early morning, dawn; उषामुषां श्रेयसीं धेह्यस्मै Av. 12. 2. 45. -2 Morning light. -3 Twilight. -4 Saline earth. -5 A cow. -6 Night. -7 A boiler, cooking vessel (स्थाली); cf. उखा. -8 N. of a wife of Bhava (who was a manifestation of Rudra). -9 N. of a daughter of the demon Bāṇa and wife of Aniruddha. [She beheld Aniruddha in a dream and became passionately enamoured of him. She sought the assistance of her friend Chitralekhā, who advised her to have with her the portraits of all young princes living round about her. When this was done, she recognized Aniruddha and had him carried to her city, where she was married to him; see अनिरुद्ध also]. *-ind.* Early in the morning. -2 At night. **-Comp. -कलः** a cock. **-पतिः, -रमणः, -ईशः** N. of Aniruddha, husband of Uṣā.

उषङ्गुः N. of Śiva.

उषती = उशती q. v.

उषीर = उशीर q. v.

उष्ट्रः [उष्-ष्ट्रन्-किच्च Uṇ. 4. 161.] 1 Camel; अथोष्ट्रवामीशतवाहितार्थम् R. 5. 32; Ms. 3. 162, 4. 120, 11. 202. -2 A buffalo. -3 A bull with a hump. -4 A cart or carriage. **-ष्ट्री** 1 A she-camel. -2 An earthen vessel in the shape of a camel. -3 Bignonia Spathacea (Mar. मेडशिंगी). [cf. Pers. *ushtar*; Zend *ustra*.] **-Comp. -अक्षः** A camel-eyed (horse) उष्ट्राक्षाः प्रियदर्शनाश्च सुभगाः श्वासैः सुगन्धैश्च ये; Bhoja's Śālihotra. **-कर्णिका** (pl.) N. of a country or its inhabitants, in the south. **-काण्डी** A thistle dear to camels, Echinops echinatus (Mar. उंटकटारी). **-क्रोशिन्** *a.* making a noise like a camel. **-गोयुगम्** a couple of camels; यथा गोस्तद्वदुष्ट्रस्य युगं उष्ट्रगोयुगम् Mbh. on P. V. 2. 29. **-ग्रीवः, -शिरोधरः** piles. **-निषदनम्** A particular posture among Yogins. **-पादिका** Jasminum Zambac (Mar. मोगरा). **-प्रमाणः** A kind of fabulous eight-footed animal शरभ. **-यानम्** camel-litter.

उष्ट्रिका 1 A she-camel. -2 An earthen wine-vessel of the shape of a camel; पञ्चानामुष्ट्रिकाणां पूरणो घटः Mbh. on P. V. 2. 48. धूर्भङ्गसंक्षोभविदारितोष्ट्रिका Śi. 12. 26.

उष्ण, उष्णक, उष्मन् see under उष्.

उष्णिह् *f.* also उष्णिहा [Mbh. on P. IV. 1. 1.] (Nom. उष्णिक् P. III. 2. 59.) 1 A Vedic metre of 3 Pādas, the first two containing 8 syllables each, and the third 12. -2 A classical metre of 4 Pādas with 7 syllables in each. -3 A brick sacred to उष्णिह्.

उष्णीषः, -षम् [उष्णमीषते हिनस्ति ईष् क Tv.] 1 Anything wound round the head. रक्तोष्णीषधराः स्त्रियः Rām. 6. 80. 6. उष्णीषबन्धस्थाने ललाटोपरि पट्टबन्धरेखा. -2 Hence, a turban, diadem, crownet; बलाकापाण्डुरोष्णीषम् Mk. 5. 19. हेमासने कृतोष्णीषमभिषिच्य नृपं व्यधात् Bm. 1. 678. उष्णीषेणैव °पट्ट शुचिना व्यभादुत्तंसधारिणा Śiva. B. 21. 29. and 22. 8. -4 K. 106; Ratn. 1. 4. -3 A distinguishing mark. -4 A characteristic mark (of hair) on the head of a Buddha which indicates his future sanctity उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भुवोः Nāg. 1. 17. -5 The top of a building.

उष्णीषिन् *a.* [उष्णीष-इनि] Wearing a diadem; नमः उष्णीषिणे गिरिचराय Vāj. 16. 22. K. 229. *-m.* 1 N. of Śiva. -2 A type of round building.

उष्मम्, उष्प &c. See under उष्.

उस्र *a.* 1 Relating to, or seen in, the morning. -2 Bright, shining. **-स्रः** 1 A ray (of light), beam; सर्वैरुस्रैः समग्रैस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः M. 2. 13; R. 4. 66; Ki. 5. 31, 34. शीर्षपुष्पोच्छ्रितैरुस्रैरुत्तंसिताशिरोरुहाम्; Parṇāl. 4. 36. -2 A bull; Rv. 6. 12. 4. -3 A god. -4 The sun. -5 A day. -6 The two Aśvinīkumāras; Rv. 2. 39. 3. **-स्रा** 1 Morning, dawn. -2 Light; bright sky. -3 A cow; स्वयमुस्राश्च दुह्यन्ते Mb. 12. 263. 31. -4 The earth. **-Comp. -धन्वन्** *a.* having a bright bow. *-m.* N. of Indra. **-यामन्** *a.* going out early in the morning (as the Aśvins); Rv. 7. 74. 1.

उस्रि *a.* Going (Ved.); Rv. 9. 65. 1.

उस्रिकः [अल्पार्थे कन्] 1 A small ox; Rv. 1. 190. 5. -2 An old ox. **-का** A cow.

उस्रिय *a.* Belonging to or coming from, an ox or cow. **-यः** 1 An ox. -2 A god; **-या** 1 A cow. -2 Brightness, light. -3 A calf. -4 Milk.

उस्वित् *ind.* Or तत्रेमं क उपासीरन् क उस्विदनुशेरते Bhāg. 3. 7. 37.

उह् 1 P. (ओहति, उवोह, उहित) To hurt or give pain. **-2** To kill, destroy; see ऊह्.

उह, उहह *-ind.* An interjection of calling.

उ(ऊ)हापोहः An additional moulding; तस्मात्तु शिल्पिभिः प्राज्ञैरूहापोहान् न योजयेत् (Mānasāra 7. 268-9)

उहारः A tortoise.

उहूः *f.* [ऊह्-क्रू] A word expressive of sorrow or dejection.

उह्रः A bull.

ऊ

ऊः [अवतीति, अव-क्विप् ऊठ्] **1** N. of Śiva. **-2** The moon. **-3** A protector; cf. ऊः परेतोऽण्डजस्त्वष्टा विवस्वानाग्निसारथिः। वह्निर्निशाकरः पूर्णो दरिद्री सरमाधिपः॥ Ek. *-ind.* **1** A particle used to introduce a subject. **-2** An interjection of (*a*) calling; (*b*) of compassion; (*c*) protection.

ऊखरः (pl.) N. of a Śaiva sect.

ऊखरजम् **1** Salt prepared from saline earth. **-2** Nitre or saltpetre.

ऊढ See under वह्.

ऊत See under अव्.

ऊतिः *f.* [अव्-क्तिन् P. III. 3. 97] **1** Weaving, sewing (fr. वे). **-2** Protection; मघवञ्छग्धि तव तन्न ऊतिभिः Mahānār. Up. 20. 4. **-3** Enjoyment. **-4** Sport, play अवैति जन्तुः कुमनीष ऊतीः Bhāg. 1. 3. 37; 8. 5. 44. **-5** Favour, kindness. **-6** Aid, assistance, help. **-7** The money given to a tailor for sewing. **-8** Wish, desire; मन्वन्तराणि सद्धर्मऊतयः कर्मवासनाः Bhāg. 2. 10. 4. **-9** Red texture; tissue; अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः Bhāg 2. 10. 1.

ऊधस् *n.* An udder (changed to ऊधन् in Bah. Comp. ऊधसोऽनङ् P. V. 4. 131.) भुवं कोष्णेन कुण्डोघ्नी मेध्येनावभृथादपि R. 1. 84. **-2** A covered secret place to which only friends are admitted. **-3** The bosom. **-4** The breast of a cattle. **-Comp.** **-वती** (a female, female animal) with full udders; Bhāg.

ऊधन्यम् or **ऊधस्यम्** Milk (produced from the udder); ऊधस्यमिच्छामि तवोपभोक्तुम् R. 2. 66.

ऊन् 10 P. To decrease.

ऊन *a.* [ऊन्-हानौ अच् Uṇ. 3. 2] **1** Wanting, deficient, defective; किंचिदूनमनूनर्धेः शरदामयुतं ययौ R. 10. 1; incomplete, insufficient. **-2** Less than (in number, size or degree); ऊनद्विवर्षं निखनत् Y. 3. 1 less than two years old; ऊनं वाभ्यधिकं वापि Y 2. 295. **-3** Fewer, smaller. **-4** Weaker, inferior; ऊनं न सत्त्वेष्वधिको बबाधे R. 2. 14; Ms. 9. 123. **-5** Minus (in this sense used with numerals); एकोन less by one; °विंशतिः 20 minus 1 = 19; so °त्रिंशत् 29; °पञ्चाशत् 49; अष्टोनं शतम् 100 minus 8 = 92. **-Comp.** **-अतिरिक्त** *a.* Too little or too much. **-अब्दिकम्** The श्राद्ध ceremony on the previous day before the anniversary ceremony. **-रात्रः, -रात्रिः** N. applied to a particular lunar day (which is omitted if two lunar days end in one solar day); Sūrya 1. 40.

ऊनक *a.* Less, inferior.

ऊनयति Den. P. **1** To leave deficient or unfinished; मा त्वायतो जरितुः काममूनयीः Rv. 1. 53. 3. **-2** To deduct, lessen, diminish. **-3** To measure. -4 To deal out in small quantities.

ऊनित *p. p.* Lessened by subtraction, less, fewer &c.

ऊम् *ind.* An interjection of (*a*) interrogation; (*b*) anger; (*c*) reproach, abuse; (*d*) arrogance; (*e*) envy.

ऊम *a.* Protecting, **-मः** Ved. A good friend, an affectionate companion.

ऊय् 1 Ā. [ऊयते, ऊत] To weave, sew.

ऊररी = उररी q. v.

ऊरव्यः Born from the thighs, hence a वैश्य, a merchant; विप्राश्च बाहुजास्तद्वदूरव्याश्च जघन्यजाः Śiva. B. 31. 17.

ऊरी = उररी q. v.; तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतप्यते Śi. 2. 30.

ऊरुः *m.* [ऊर्णु-कर्मणि कु नुलोपश्च Uṇ. 1. 30] **1** The thigh; ऊरू तदस्य यद्वैश्यः Rv. 10. 90. 12; Ms. 1. 31, 87; R. 12. 88; (at the end of *fem.* compounds the form is °रुः or °रूः, but more usually the latter; रम्भोरूः, वामोरूः करभोरु Voc.). **-Comp.** **-अङ्गम्** Fungus, mushroom. **-अष्ठीवम्** [ऊरू च अष्ठीवन्तौ च P. V. 4. 77] thigh and knee. **-उद्भव** *a.* born or sprung from the thigh; ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री V. 1. 4. **-ग्लानिः** *f.* weakness of the thigh. **-ग्रहः, -ग्राहः** = °स्तम्भः q. v. **-ज, -जन्मन्, -संभव** *a.* sprung from the thigh. *-m.* a Vaiśya. **-दघ्न, -द्वयस, -मात्र** *a.* as high as or reaching the thighs, knee-deep; P. 5. 2. 37. **-पर्वन्** *m.*, *n.* the knee. **-फलकम्** the thigh-bone, hip-bone; Y. 3. 87. **-भिन्न** *a.* having a rent in the thigh; see **-न्नी** *f.* P. IV. 1. 52. **-स्कम्भः, -स्तम्भः** paralysis of the lower extremities, rheumatism of the thigh. करिणीवोरुस्तम्भविधृता K. (**-म्भा**) the plantain tree.

ऊरव्यः (**-व्या** *f.*) [ऊरु-यत्] A Vaiśya, a man of the third tribe (as born from the thighs of Brahmā or Puruṣa); cf. Ms. 1. 31, 87.

ऊररी = उररी q. v.

ऊर्ज् 10 P., Ā. To be strong; powerful, be happy; अदत् पिबदूर्जयमानमाशितम् Rv. 10. 37. 11.

ऊर्ज् *f.* [P. III. 2. 177] **1** Strength, vigour. **-2** Sap, juice. **-3** Water. **-4** Food; स देवानपि गच्छति स ऊर्जमुपजीवति Bṛi. Up. 1. 5. 1. oft. with इष्; इषे त्वा ऊर्जे त्वा Ts. 1. 1. 1; इषमूर्जं सुक्षितिम् &c. नम ऊर्जे इषे Bhāg. 4. 24. 38.

ऊर्जः **1** N. of the month Kārtika (as giving vigour and energy); 'बाहुलोर्जौ कार्तिकिकः' इत्यमरः; ऊर्जमतङ्गजम् Śi. 6. 50. **-2** Energy. **-3** Power, strength. **-4** Procreative power. **-5** Life, breath. **-6** N. of the sons of हिरण्यगर्भ (reckoned among the seven Ṛiṣis of the third Manvantara). **-र्जा** **1** Food ऊर्जावती (गङ्गा) Mb. 13. 26. 84. **-2** Energy. **-3** Strengh, sap. नाप्यूर्जां बिभरामास वैदेह्यां प्रसितो भृशम् Bk. 6. 3. **-4** Growth. **-5** N. of a daughter of Dakṣa and wife of Vasiṣṭha. **-र्जम्** Water. **-Comp.** **-मासः** The month कार्तिक; Bhāg. 12. 11. 44. **-मेध** *a.* Eminent intelligence, very wise; Hch.

ऊर्जयति Den. P. **1** To feed, strengthen, nourish. **-2** (Ā.) To become strong or powerful.

ऊर्जव्य *a.* Ved. Abounding in food or strength. सिषक्तु न ऊर्जव्यस्य पुष्टेः Rv. 5. 41. 20.

ऊर्जस् *n.* [ऊर्ज्-असुन्] **1** Vigour, energy. **-2** Food

ऊर्जस्वत् *a.* **1** Rich in food; juicy, succulent; ऊर्जस्वतीः पयस्वतीः प्रजावतीः Ts. 1. 1. 1.-**2** Powerful, strong, vigorous.

ऊर्जस्वल *a.* [ऊर्जस्-वलच्] **1** Great, powerful, strong mighty; तद्रक्ष...ऊर्जस्वलमात्मदेहम् R. 2. 50; Bk. 3. 55; Mv. 4. 35; Māl. 2. 9. **-2** Excellent, pre-eminent; U. 4.

ऊर्जस्विन् *a.* Mighty, strong, great; U. 5. 27. v. l. **-नी** A figure of Rhetoric, speaking of anything with contempt, description of violence.

ऊर्जित *a.* **1** (*a*) Powerful, strong, mighty; श्रीमदूर्जितमेव वा Bg. 10. 41; मातृकं च धनुरूर्जितं दधत् R. 11. 64; cf. also बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः vigorous, strong (speech); Si. 16. 38; ऊर्जितं क्षात्रं तेजः Ve. 1. 13. (*b*) Great, large, exceeding, much; धनुर्विस्फारयामास तडिदूर्जितनिःस्वनम् Rām. 5. 48. 25; Mv. 2. 13. **-2** Distinguished, glorious, superior; excellent, beautiful; °श्रीः Śi. 16. 85; मकरोर्जितकेतनम् R. 9. 39; 1. 93; Māl. 7. 4. **-3** High, noble, spirited; ऊर्जितः खलु ते कामः Rām. 2. 85. 2. °आश्रयं वचः Ki. 2. 1 spirited or noble. **-4** Increased; deep, grave; अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम् Ki. 11. 40. **-तम्** **1** Strength, might. **-2** Energy.

ऊर्जिन् *a.* Abounding in food.

ऊर्णम् [ऊर्णु-ड Uṇ. 5. 47] **1** Wool. **-2** A woollen cloth. **-Comp.** **-नाभः, -नाभिः -भी, -पटः, -वाभिः** a spider; यस्तूर्णनाभ इव तन्तुभिः Śvet. 6. 10; यथोर्णनाभिः सृजते गृह्णते च Muṇḍ. Up. 1. 1. 7. विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा Bhāg. 4. 6. 43. **-म्रद -दस्** *a.* soft as wool. ऊर्णम्रदाः पृथिवी दक्षिणावते Av. 18. 3. 49.

ऊर्णा **1** Wool; कम्बलीया ऊर्णाः Mbh. on P. V. 1. 3. माङ्गल्योर्णावलयिनि (हस्ते) R. 16. 87. **-2** A circle of hair between the eyebrows. सोर्णभ्रुवं वारणबस्तिकोशम् Bu. Ch. 1. 66; cf. (आवर्ते चान्तरा भ्रुवो Amar.)... ऊर्णयमन्तर्भ्रुवोः Nāg. 1. 17. **-3** N. of the wife of Chitraratha. **-Comp.** **-पिण्डः** a ball of wool. **-वल, -वत्** *a.* woollen. **-सूत्रम्** a thread of wool. **-स्तुका** Ved. a tuft of wool.

ऊर्णायु *a.* Woollen. **-युः** **1** A ram, **-2** Spider; विवराणि मुद्रयन् द्रागूर्णायुरिव सज्जनो जयति Bv. 1. 90. **-3** A woollen blanket.

ऊर्णु 2 U. [ऊर्णो (र्णौ) ति, उर्णुते, और्णोत्-और्णुत, ऊर्णुनाव-नुवे, और्ण-र्णा-र्णु-वीत्, ऊर्ण-र्णु-विष्यति-ते, ऊर्ण-र्णु-वितुम्, ऊर्णित] **1** To cover, surround, hide; ऊर्णुनाव स शस्त्रौघैर्वानराणामनीकिनीम् Bk. 14. 103, 3. 47; Śi. 20. 14. **-2** To cover oneself. -*Caus.* ऊर्णावयति. -*Desid.* ऊर्णुनूषति, ऊर्णुन-नु-विषति.

ऊर्द् = उर्द् q. v.

ऊर्दरम् A vessel for measuring corn (such as a bushel); a granery तमूर्दरं न पृणता यवेन Rv. 2. 14. 11. **-रः** A hero. **-2** A Rākṣasa or goblin.

क्रन्दन [क्रन्द् भावे ल्युट्] A cat. **-नम्** **1** A cry of distress or weeping, lamentation; व्यसनं प्राप्य यो मोहात्केवलं परिदेवयेत्। क्रन्दनं वर्धयत्येव Pt. 2. 188. **-2** Mutual defiance. **-3** Calling, inviting.

क्रन्दस् *n.* Ved. Battle-cry; शिमीवति क्रन्दसि प्राव सातये Rv. 10. 38. 1.

क्रन्दित *a.* [क्रन्द्-क्त] Wept, called or cried out; ततस्तद्वासिभिर्देवैः क्रन्दितः शरणार्थिभिः Ks. 114. 120. **-तम्** **1** Cry of distress or weeping, lamentation; हा तातेति क्रन्दितमाकर्ण्य विषण्णः R. 9. 75. **-2** Mutual defiance, challenge.

क्रप् 1 Ā. (क्रपते) **1** To pity. -2 To mourn. **-3** To lament. **-4** To go. **-5** To long for, desire.

क्रप् 10 P. (क्रापयति) To speak clearly.

क्रम् 1 U., 4. P. (क्रामति, क्रमते, क्राम्यति, चक्राम, चक्रमे, अक्रमीत्, अक्रस्त, क्रान्त) **1** To walk, step, go; क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः Rām.; गम्यमानं न तेनासीदगतं क्रामता पुरः Bk. 8. 2; 25. **-2** To go to, approach (with acc.).; देवा इमान् लोकानक्रमन्त Śat. Br. **-3** To pass or go over, go across, traverse; U. 2. 13; सुखं योजनपञ्चाशत्क्रमेयम् Rām. **-4** To leap, jump; क्रमं बबन्ध क्रमितुं सकोपः (हरिः) Bk. 2. 9. 5. 51. **-5** To go up, ascend; क्रामत्युच्चैर्भूभृतो यस्य तेजः Śi. 16. 83. **-6** (*a*) To cover, occupy, take possession of, fill; क्रान्ता यथा चेतसि विस्मयेन R. 14. 17. (*b*) To reach up to, pervade, penetrate; क्रामद्भिर्घनपदवीमनेकसंख्यैः Ki. 5. 34. **-7** To surpass, excel; स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना R. 1. 14. **-8** To undertake, strive after, be able or competent for, show energy for (with dat. or inf.); व्याकरणाध्ययनाय क्रमते Sk; धर्माय क्रमते साधुः Vop; व्युत्पत्तिरावर्जितकोविदापि न रञ्जनाय क्रमते जडानाम् Vikr. 1. 16; हत्वा रक्षांसि लवितुमक्रमीन्मारुतिः पुनः। अशोकवनिकामेव Bk. 9. 23. **-9** To be developed or increased, to have full scope, be at home (with loc.); कृत्येषु क्रमन्ते Dk. 170; क्रमन्तेऽस्मिञ्शास्त्राणि, or ऋक्षु क्रमते बुद्धिः Sk. क्रममाणोऽरिसंसदि Bk. 8. 22. **-10** To succeed, have effect (Atm.); न चक्रमस्याक्रमताधिकं धरम् Śi. 1. 54. **-11** To be repeated (as a letter or word in the arrangement called क्रम q. v.). **-12** To fulfil, accomplish. **-13** To have sexual intercourse with; to cover (in copulation); क्रमस्पर्श इव रोहितमनवग्लायता सदा Av. 4. 4. 7, (By वृत्तिसर्गतायनेषु क्रमः P. I. 3. 38; क्रम् by itself is used in the Ātm. in the sense of 'continuity' or 'want of interruption', 'energy or application', and 'development or increase', and also 'conquering or getting over.') -*Caus.* (क्रमयति, क्रामयति) **1** To cause to go &c. **-2** To repeat a letter (as in the क्रम arrangement). -*Desid.* चिक्रमिषति, चिक्रंसते &c.

क्रमः [क्रम्-भावकरणादौ घञ्] **1** A step, pace; त्रिविक्रमः; सागरः प्लवगेन्द्रेण क्रमेणैकेन लङ्घितः Mb.; Śi. 12. 18. **-2** A foot; (अपनेष्यति) असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः Rām. 5. 21. 28. **-3** Going, proceeding, course; क्रमात् or क्रमेण in course of, gradually; कालक्रमेण gradually, in course of time; कालक्रमेण जगतः परिवर्तमाना Svapna., भाग्यक्रमः course or turn of fate; R. 3. 7, 30, 32. **-4** Performance, commencement; अविचार्य क्रमं न करिष्यति। इत्थमत्र विततक्रमे क्रतौ Śi. 14. 53. **-5** (*a*) Regular course, order, series, succession; निमित्तनैमित्तिकयोरयं क्रमः Ś. 7. 30; Ms. 7. 24, 9. 85, 2. 173, 3. 69. (*b*) Traditional order; U. 6. (*c*) Order of propriety; लोकान्तरगतेनापि नोज्झितो विनयक्रमः Nāg. 5. 11. आत्मीयः पर इत्ययं खलु कुतः सत्यं कृपायाः क्रमः। *ibid.* 5. 20; Ku. 5. 32; प्रियवचननिवेदनत्वरया क्रमविशेषो नावेक्षितः Pratijñā. **-6** Method, manner; वर्तस्व च सतां क्रमे Rām. 2. 25. 2; नेत्रक्रमेणोपरुरोध सूर्यम् R. 7. 39. **-7** Grasp, hold; क्रमगता पशोः कन्यका Māl. 3. 13. **-8** A position of attack (assumed by an animal before making a spring); न मया क्रमः सज्जीकृत आसीत् Pt. 4. -9 Preparation, readiness; Bk. 2. 9. **-10** An undertaking, enterprize. **-11** An act or deed, manner of proceeding; कोऽप्येष कान्तः क्रमः Amaru. 48, 33. **-12** Particular manner of reciting Vedic texts, leaving at each time one word and taking up another; वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः Bhāg. 12. 13. 1. चर्चागुणान् क्रमगुणांश्चापेक्ष्य भवति Mbh. on P. V. 1. 119. **-13** Power, strength; स ईश्वरः काल उरुक्रमोऽसौ Bhāg. 7. 8. 9. **-14** N. of Viṣṇu. **-Comp.** **-अनुसारः, अन्वयः** regular order, due arrangement. **-आगत, -आयात** *a.* descended or inherited lineally, hereditary; क्रमायातोऽपि भूपतिः Pt. 1. 73, 84; 3. 167... त्यक्त्वैश्वर्यं क्रमागतम् Nāg. 1. 4. **-उद्वेगः** an ox. **-ज्यका, -ज्या** the sine of a planet declination. **-पाठः** the Krama reading. **-भङ्गः** irregularity, **-भाविन्** successive. **-माला -रथः -लेखा -शठः -शिखा** various kinds of क्रमपाठ. **-योगः** succession, order; Ms. 1. 42. **-योगेन** *ind.* in regular manner; तेनैव क्रमयोगेन जिज्ञासुः पर्यपृच्छत Mb. 1. 132. 78.

क्रमक *a.* **1** Orderly, methodical. **-2** Going, proceeding, **-कः** A student who goes through a regular course of study. **-2** One who knows the Krama arrangement of a text.

क्रमणः [क्रामत्यनेन करणे ल्युट्] **1** The foot. **-2** A horse. **-णम्** **1** A step, Y. 1. 188. **-2** Walking; यो वामृजवे क्रमणाय रोदसी Rv. 6. 70. 3. **-3** Proceeding. **-4** Transgressing. **-5** Treatment of words or letters according to the Krama arrangement; Rv. Pr. 14.

क्रमतः *ind.* Gradually, successively.

क्रमशः *ind.* 1 In due order, regularly, successively, seriatim. –2 Gradually, by degrees; R. 12. 47; क्रमशस्तान्निबोधत Ms. 1. 68, 3. 12.

क्रमिक *a.* [क्रमादागतः ठन्] 1 Successive, serial.–2 Descended lineally, ancestral, hereditary; आप्तैरलुब्धैः क्रमिकैस्ते च कच्चिदनुष्ठिताः Mb. 2. 5. 33.

क्रम्य *a.* To be treated or attended medically; Charak 8. 2.

क्रमुः, क्रमुकः [क्रम्-उन्, संज्ञायां कन्] The betel-nut tree; आस्वादितार्द्रक्रमुकः समुद्रात् Śi.3.81; Vikr.18.98; Bhāg.8.2.11.

क्रमेलः, क्रमेलकः 1 A camel; निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव Vikr. 1. 29; Śi. 12. 18; N. 6. 104. सद्यः संदानितानेकक्रमेलककुलाकुलम् Śiva. B. 20. 5.

क्रान्त *p. p* Gone, passed over, traversed &c.; (*p.p.* of क्रम् q.v.) **–तः** 1 A horse.–2 A foot, step; Ms.12.121. –3 Declination. **–न्तम्** 1 Going, passing. –2 A step. –3 A certain aspect in astronomy (when the moon is in conjunction with a planet). **–Comp. –दर्शिन्** *a.* omniscient.

क्रान्तिः *f.* 1 Going, proceeding. –2 A step, pace. –3 Surpassing. –4 Attacking, overcoming. –5 Declination of a planet. –6 The ecliptic. **–Comp. –कक्षः, –मण्डलम्, –वलयः, –वृत्तम्** the ecliptic. **–क्षेत्रम्** a figure described by the ecliptic. **–जीवा, –ज्यका, –ज्या** the sine of the declination or of the ecliptic. **–पातः** the equinoctial points or nodes of the ecliptic. **–भागः** the declination of a point of the ecliptic. **–वलयः** 1 the ecliptic. –2 the tropical zone, space within the tropics.

क्रान्तुः A bird.

क्रवण *a.* Ved. Worshipping, praising; अत्रा न हार्दि क्रवणस्य रेषते Rv. 5. 44. 9.

क्रविस् *n.* Ved. Raw flesh, carrion; पौरुषेयं च ये क्रविः Av. 8. 6. 23.

क्रव्यम् Raw flesh, carrion, स्थपुटगतमपि क्रव्यमव्यग्रमत्ति Māl. 5. 16. [cf. Gr. *kreas*; L. *caro*] **–Comp. –अद्, –अद, –भुज्** *m.* eating raw flesh; Rv. 10. 16. 9. Ms. 5. 131. (*–m.*) 1 a carnivorous animal, such as a tiger &c.; क्रव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि U. 1. 49. –2 a demon, goblin; R. 15.16. **–घातनः** a deer (killed for its flesh) cf. Bhāg. 5. 26. 12. **–वाहनः** Ved. an epithet of Agni; Rv. 10. 16. 11.

क्रशयति Den. P. To emaciate, make thin or lean; क्रशितं शरीरमशरीरशरैः Śi. 9. 61.

क्रशित *a.* Made lean, emaciated.

क्रशिमन् *m.* Thinness, emaciation, leanness.

क्राकचिकः A sawyer; मायूरकाः क्राकचिका वेधका रोचकास्तथा Rām. 2. 83. 13.

क्राथः Killing, murder.

क्रिमिः –का *f.* 1 A worm; क्रिमिकाण्डजन्तुकीर्णाम् (रसाम्) Bu. Ch. 5. 5. –2 An insect; see कृमि. **–Comp. –जम्** aloewood. **–शैलः** an ant-hill.

क्रियः The sign of the Zodiac called Aries.

क्रियमाणकम् A literary essay; Bṛi. S. 1. 5.

क्रिया [कृ भावे करणादौ वा श cf. P. III] 1 Doing, execution, performance, accomplishment; उपचार°, धर्म°; प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव Me. 116. –2 An action, act, business, undertaking; प्रणयिक्रिया V. 4. 15; Ms. 2. 4. –3 Activity, bodily action, labour. –4 Teaching, instruction; क्रिया हि वस्तूपहिता प्रसीदति R. 3. 29. क्रिया हि द्रव्यं विनयति नाद्रव्यम् Kau. A. 1. 5. –5 Possession of some act (as of singing, dancing &c.), knowledge; शिष्टा क्रिया कस्यचिदात्मसंस्था M. 1. 16. –6 Practice (opp. शास्त्र theory). –7 A literary work, composition; शृणुत मनोभिरवहितैः क्रियामिमां कालिदासस्य V. 1. 2; कालिदासस्य क्रियायां कथं परिषदो बहुमानः M. 1. –8 A purificatory rite, a religious rite or ceremony; Ms. 10. 43. –9 An expiatory rite, expiation.–10 (*a*) The ceremony of offering oblations to the deceased ancestors (श्राद्ध).(*b*) Obsequies.–11 Worship; त्रैतादिषु हरेरर्चा क्रियायै कविभिः ' कृता Bhāg. 7. 14. 39. –12 Medical treatment, application of remedies, cure; शीतक्रिया M. 4 cold remedies. –13 (In gram.) Action, the general idea expressed by a verb. –14 Motion. –15 Especially, motion as one of the seven categories of the Vaiśeṣikas; see कर्मन्. –16 (In law) Judicial investigation by human means (witnesses &c.) or by ordeals. –17 Burden of proof; क्रिया स्याद्वादिनोर्द्वयोः; द्वयोरपि वादिनोः क्रिया प्राप्नोति V. May.–18 A verb.–19 A noun of action. –20 Disquisition. –21 Study. –22 Means, expedients. –23 Instrument, implement. –24 A construction; कूपप्रपापुष्करिणीवनानां चक्रुः क्रियास्तत्र च धर्मकामाः Bu. Ch. 2. 12. –25 Spirit (अध्यात्म)?; द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवम् Bhāg. 12. 6. 38. **–Comp. –अन्वित** *a.* practising ritual observances. **–अपवर्गः** 1 completion or termination of an affair, execution of a task; क्रियापवर्गेष्वनुजीविसात् कृताः Ki. 1. 14. –2 liberation from ceremonial acts, absolution. **–अभ्युपगमः** a special agreement; क्रियाभ्युपगमात्त्वेतत् बीजार्थं यत्प्रदीयते Ms. 9. 53; **–अर्थ** *a.* 1 (a Vedic injunction) enjoining some duty. –2 useful for some purpose; अपि क्रियार्थं सुलभं समित्कुशम् Ku. 5. 33. **–अवसन्न** *a.* one who loses a law-suit through the statements of the witnesses &c. **–आरम्भः** Cooking; आत्मार्थं च क्रियारम्भः Ms. 11. 64. **–इन्द्रियम्** see कर्मेंद्रिय. **–कलापः** 1 the whole body of ceremonies enjoined in the Hindu religious law. –2 all the particulars or points of any business. **–कल्पः** a particular mode of diognosis. **–काण्डम्** The portion of a श्रुति text treating of the sacrifices. **–कारः** 1 an agent, worker. –2 a beginner, tyro, a fresh student. –3 an agreement. **–तन्त्रम्** one of the four classes of Tantras; Buddha. **–द्वेषिन्** *m.* a witness whose

testimony is prejudicial to the cause (one of the five kinds of witnesses). **–द्वैतम्** efficient cause. **–निर्देशः** evidence. **–पटु** *a*. dexterous. **–पथः** mode of medical treatment. **–पदम्** a verb. **–पर** *a*. diligent in the performance of one's duty. **–पादः** the third division of a legal plaint; that is, witnesses, documents and other proofs adduced by the plaintiff or complainant. **–माधुर्यम्** beauty of art and architecture; अहो क्रियामाधुर्यं पाषाणानाम् Pratimā 3. **–यज्ञः** religious rites (such as गर्भाधानसंस्कार); Mb. 10. 18. 5. **–योगः** 1 connection with the verb. –2 the employment of expedients or means; तदा तत्प्रतिकाराच्च सततं वा विचिन्तनात् । आधिव्याधिप्रशमनं क्रियायोगद्वये न तु ॥ Mb. 3. 2. 23. –3 the practical form of Yoga philosophy *i. e.* active devotion. **–लोपः** omission or discontinuance of any of the essential ceremonies of the Hindu religion; क्रियालोपाद् वृषलत्वं गताः Ms. 10. 43. **–वशः** necessary influence of acts done. **–वाचक, –वाचिन्** *a*. expressing any action, as a verbal noun. **–वादिन्** *m*. a plaintiff, complainant. **–विधिः** a rule of action, manner of any rite; अयमुक्तो विभागो वः पुत्राणां च क्रियाविधिः Ms. 9. 220. **–विशेषणम्**, 1 an adverb. –2 a predicative adjective. **–शक्तिः** *f*. the power of god (in creating this world). **–संक्रान्तिः** *f*. imparting (to others) one's knowledge; teaching; विवादे दर्शयिष्यन्तं क्रियासंक्रान्तिमात्मनः M. 1. 19. **–समभिहारः** [cf. P. III. 1. 22] the repetition of any act; क्रियासमभिहारेण विराध्यन्तं क्षमेत कः Śi. 2. 43.

क्रियावत् *a*. 1 Engaged in any actual work, versed in the practice of a thing; यस्तु क्रियावान्पुरुषः स विद्वान् H. 1. 167. यः क्रियावान् स पण्डितः. –2 Performing ceremonies in the right manner.

क्रिवि *a*. Ved. 1 Doing, performing. –2 Killing. **–विः** 1 A cistern, well. –3 A leather bag; a cloud (?) –4 N. of the country of पाञ्चाल.

क्री 9 U. (क्रीणाति, क्रीणीते, क्रीत) 1 To buy, purchase; महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया Śāntī. 3. 1; क्रीणीष्व मज्जीवितमेव पण्यमन्यत्र चेदस्ति तदस्तु पुण्यम् N. 3. 87, 88; क्रीणन्ति स्म प्राणमूल्यैर्यशांसि Śi. 18. 15; Pt. 1. 13; Ms. 9. 174. –2 To barter, exchange; कच्चित्सहस्रैर्मूर्खाणामेकं क्रीणासि पण्डितम् Mb. –3 To win. [cf. Pers. *kharidan*].

क्री *a*. (At the end of comp.) Buying.

क्रयः [क्री भावे अच्] Buying, purchasing. **–Comp.** **–आरोहः** a market, fair. **–क्रीत** *a*. bought. **–लेख्यम्** a deed of sale, conveyance &c. (गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् । पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते Brihaspati). **–विक्रयौ** (du.) trade, traffic, buying and selling; Ms. 8. 5; 7. 127. cf. also क्रयविक्रयवेलायां काचः काचो मणिर्मणिः Udb. **–विक्रयिकः** a trader, merchant. **–विक्रयिन्** *a*. 1 buying or selling, striking a bargain; Ms. 5. 41; 8. 400; Y. 2. 262. –2 One who buys an article at a lower rate and sells it at a higher rate; दानसागर, Bibliotheca Indica 274. Face. I, p. 27. **–शीर्षम्** the coping of a wall.

क्रयणम् [क्री भावे ल्युट्] Buying, purchasing.

क्रयिकः *a*. [क्रय-ठन्] 1 A trader, dealer. –2 A purchaser.

क्रय्य *a*. [क्री-यत्] A thing exhibited for sale in the market; क्रेयं नो धान्यं न चास्ति क्रय्यम् Mbh. on P. VI. 1. 82. (opp. क्रेय which only means 'fit to be purchased'; cf. Sk. on P. VI. 1. 82).

क्राय (यि) कः 1 A purchaser. –2 A trader, merchant.

क्रीत *p. p.* Bought; see क्री. **–तः** One of the twelve kinds of sons recognised in Hindu Law; a son purchased from his natural parents; Ms. 9. 160; क्रीतश्च ताभ्यां विक्रीतः Y. 2. 131; तव क्रीतसुतोऽस्मीति वाचिकेन व्यजिज्ञपत् Śiva. B. 31. 32. **–तम्** A bargain. **–Comp.** **–अनुशयः** 'repenting a purchase', rescission, returning a thing purchased, to the seller (admissible in some cases by law).

क्रीतक *a*. Got by purchase. **–कः** A son bought from his parents and adopted; क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् । स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥ Ms 9. 174; cf. क्रीत abvove.

क्रे-णिः, –णी *f*. Buying, purchase.

क्रेतृ *m*. A buyer, purchaser; Y. 2. 168.

क्रेय *a*. Purchasable, fit to be bought; खार्यां सहस्रक्रेयायां दुर्लभे भोजनेऽभवत् Rāj. T. 5. 271. **–Comp.** **–दः** One who exhibits anything for sale, seller.

क्रीड् 1. P. (क्रीडति, क्रीडित) 1 To play, amuse oneself; वानराः क्रीडितुमारब्धाः Pt. 1; एष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः Mk. 10. 59; जक्षन् क्रीडन् रममाणः Ch. Up. 8. 12. 3. –2 To gamble, play at dice; बहुविधं द्यूतं क्रीडतः Mk. 2; नाक्षैः क्रीडेत्कदाचिद्धि Ms. 4. 74; Y. 1. 138. –3 To jest, joke or trifle with; सद्वृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति Gīt. 3; क्रीडिष्यामि तावदेनया V. 3; एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः H. 2. 23; Pt. 1. 187; Mk. 3. With अनु (Ātm.) to play, sport, amuse oneself; साध्वनुक्रीडमानानि पश्य वृन्दानि पक्षिणाम् Bk. 8. 10. **–आ, –परि, –सम्** [Ā. क्रीडोऽनुसंपरिभ्यश्च P. I. 3. 21] to play &c.; संक्रीडन्ते मणिभिर्यत्र कन्याः Me. 69; but क्रीड् with सं is Paras. in the sense of 'making a noise'; त्वन्नामवर्णा इव कर्णपीता मयास्य संक्रीडति चक्रचक्रे N. 3. 50; संक्रीडन्ति शकटानि Mbh. 'the carts creak'.

क्रीड *a*. [क्रीड्-घञ्] Playing, sporting; क्रीडं (ळं) वः शर्धो मारुतम् Rv. 1. 37. 1, 5. **–डः** 1 Sport, pastime, play, pleasure. –2 Jest, joke.

क्रीडकः 1 A player. –2 A porter, door-keeper.

क्रीडनम् [क्रीड् भावे ल्युट्] 1 Playing, sporting; बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि प्रहृता Mahān. –2 A play-thing, toy.

क्रीडनकः, –कम्, क्रीडनीयम्, –यकम् A play-thing, toy. लीलया व्यनुदत्तांस्तान्बालः क्रीडनकानिव Bhāg. 3. 2. 30. Ś. 7. **–क्रीडनकतया** *ind*. After the manner of a plaything; Bhāg. 5. 26. 32.

क्रीडा [क्रीड्-भावे अ] 1 Sport, pastime, play, pleasure; तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः Me. 35, 63; क्रीडामुदो यातनाः Gīt. 9. 9. –2 Jest, joke. –3 (in music) A kind of measure. –4 A play-ground; Mb. 3. –**Comp.**–**आकूतम्** a sportive purpose. –**उद्देशः** play-ground. –**काननम्**, –**वनम्** a pleasure grove, park; क्रीडाकाननकेलिकौतुकजुषामायुः परिक्षीयते Bh. 3. 103. –**कोपः** false or feigned anger; कथमपि सखि क्रीडाकोपाद्व्रजेति मयोदिते Amaru. 12. –**कौतुकम्** 1 wanton curiosity; Ks. 18. 153. –2 sport, play. –3 sexual intercourse. –**गृहम्**, –**मन्दिरम्** a pleasure-house. –**नारी** a prostitute, harlot. –**परिच्छदः** a play-thing, toy ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः Bhāg. 7. 5. 56. –**मयूरः** a peacock kept for pleasure; क्रीडामयूरा वनबर्हिणत्वम् (प्राप्ताः) R. 16. 14. –**मृगः** a toy-deer; विक्रीडितो यथैवाहं क्रीडामृग इवाधमः Bhāg. 6. 2. 37. –**रत्नम्** 'the gem of sports', copulation. –**वेश्मन्** *n.* a pleasure-house; क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते V. 2. 23. –**शैलः**,–**पर्वतः** an artificial hill serving as a pleasure abode, a pleasure mountain; क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः Me. 79.

क्रीडि *a.* Ved. Playing, sporting (epithet of the wind); ते क्रीड (ळ) यो धुनयो भ्राजदृष्टयः Rv. 1. 87. 3.

क्रीडितम् Sport, play; Rām. 5; Mb. 3.

क्रीडु *a.* Ved. Playing, moving up (as the Soma); क्रीडु (ळु) र्मखो न मंहयुः Rv. 9. 20. 7.

क्रुञ्च् 1 P. (क्रुञ्चति, क्रुञ्चित) 1 To curve or make crooked. –2 To become or be crooked. –3 To be or become small, shrink. –4 To make small, lessen. –5 To approach, arrive at, go up to.

क्रुञ्च् *m.* 1 A curlew, heron; अद्भयः क्षीरं व्यपिबत्क्रुङ्ङाङ्गिरसो धिया Vāj. 19. 73. –2 A swan. भृङ्गाली-कोकिल-क्रुङ्भिर्वाशनैः पश्य लक्ष्मण Bk. 6. 73.

क्रुञ्चः (*f.* **क्रुञ्चा**) 1 A curlew, heron; Vāj. 24. 22, 31. –2 A kind of lute. –3 N. of the mountain क्रौञ्च.

क्रुड् 6 P. (क्रुडति, क्रुडित) 1 To sink, dive. –2 To be or become thick.

क्रुथ् 9 P. (क्रुथ्नाति) To kill, slay.

क्रोथः Murder, killing.

क्रुध् 4 P. (क्रुध्यति, क्रुद्ध) To be angry (with the dat. of the person who is the object of anger); हरये क्रुध्यति; but sometimes with words like उपरि, प्रति &c. also; ते ह ब्राह्मणाश्चुक्रुधुः Bṛi. Up. 3. 1. 2; ममोपरि स क्रुद्धः, न मां प्रति क्रुद्धो गुरुः &c.

क्रुध् *f.* Anger; क्रुधा संधिं भीमो विघटयति यूयं घटयत Ve. 1. 10; Ks. 76. 18.

क्रुद्ध *p. p.* 1 Angry, provoked. –2 Fierce; cruel. –**द्धम्** Anger. –**Comp.** –**वर्गः** a group of provoked persons; Kau. A. 1. 14.

क्रुध्मिन् *a.* Ved. Angry, wrathful, irritable; शुभ्रो वः शुष्मः क्रुध्मी मनांसि Rv. 7. 56. 8.

क्रोधः [क्रुध्-भावे घञ्] 1 Anger, wrath; कामात्क्रोधोऽभिजायते Bg. 2. 62; so क्रोधान्धः, क्रोधानलः &c. –2 (In Rhet.) Anger considered as the feeling which gives rise to the *raudra* sentiment. –3 N. of the mystic syllable हुम् or हुम्. –4 (also क्रोधन) N. of the 59th year of the संवत्सर cycle. –**धा** N. of a daughter of Dakṣa. –**Comp.** –**इद्ध** *a.* inflamed with anger, darting out fire; क्रोधेद्धैर्दृष्टिपातैर्मुहुरुपशमिता वह्नयोऽमी त्रयोऽपि Ratn. 1. 3. –**उज्झित** *a.* free from anger, composed, cool. –**कृत्** *a.* angry. (–*m.*) the Supreme Being. –**ज** *a.* proceeding from wrath (as the eight vices; पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोष्टकः॥ Ms. 7. 48). –**मूर्च्छित** *a.* overcome or infatuated with anger; ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः Rām. 1. 1. 49. –**तः** a kind of perfume. –**वश** *a.* passionate, violent. –**हन्** *m.* an epithet of Viṣṇu.

क्रोधन *a.* [क्रुध-युच्] Wrathful, passionate, angry, irascible; यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः Ve. 3. 31. –**नः** N. of a son of Kauśika. –**ना** A passionate woman, vixen. –**नम्** Being angry, anger.

क्रोधनीय *a.* Provocative; न क्रुद्ध्यत्याभिशप्तोऽपि क्रोधनीयानि वर्जयन् Rām. 2. 20. 4. –**यम्** Injury.

क्रोधालु *a.* [क्रुध्-आलुच्] Wrathful, irascible, angry, passionate.

क्रोधिन् *a.* [क्रुध्-णिनि] Passionate, angry. –*m.* 1 A buffalo. –2 A dog. –3 The 38th year of the संवत्सर cycle.

क्रुन्थ् 9. P. (क्रुथ्नाति) 1 To embrace. –2 To be distressed, suffer pain.

क्रुमुः *f.* N. of a river (tributory of the Indus); मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्निरीरमत् Rv. 5. 53. 9.

क्रुमुकः Ved. A piece of wood to catch the sacrificial fire; स क्रुमुकं प्राविशत् क्रुमुकमव दधाति Yv. 5. 1. 9. 5.

क्रुश् 1 P. (क्रोशति, क्रुष्ट) 1 To cry, weep, lament, mourn (for); क्रोशन्त्यस्तं कपिस्त्रियः Bk. 6. 124. –2 To cry out, yell, scream, bawl, call out; अतीव चुक्रोश जीवनाशं ननाश च Bk. 14. 31.

क्रुश्वन् *m.* A jackal.

क्रुष्ट *p. p.* 1 Cried out. –2 Called out to. –3 Called at, abused. –**ष्टम्** 1 Crying, a cry, yell. –2 Weeping. –3 A noise, sound.

क्रोशः [क्रुश्-घञ्] 1 A cry, yell, shout, scream, noise. –2 A measure of distance equal to $\frac{1}{4}$th of a Yojana, a *Kośa* क्रोशार्धं प्रकृतिपुरःसरेण गत्वा R. 13. 79; समुद्रात्पुरी क्रोशौ (nom.) or क्रोशयोः (loc.) –3 A measure of time equal to 48 minutes; क्रोशमास्ते। क्रोशं स्वपिति Mbh. on P. I. 4. 51. **-Comp. -तालः, -ध्वनिः** a large drum.

क्रोशन *a* Crying; वि क्रोशनासो विष्वञ्च आयन् Rv. 10.27. 18. **-नम्** A cry; Suśr. 3. 9. 10.

क्रूर *a*. [कृत-रक् धातोः क्रूः; cf. Uṇ. 2. 21] **1** Cruel, wicked, hard-hearted, pitiless; तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया R. 12. 4; Me. 107; Ms. 10. 9; तानहं द्विषतः क्रूरान् Bg. 16. 19. **-2** Hard, rough. **-3** Formidable, terrible, fierce, ferocious, savage. **-4** Destructive, mischievous. **-5** Wounded, hurt. **-6** Bloody. **-7** Raw. **-8** Strong. **-9** Inauspicious (as opposed to सौम्य and अक्रूर; said of 1st, 3rd, 5th, 7th, 9th and 11th signs of the zodiac which are supposed to have a malignant influence.) **-10** Hard, solid, hardened; Ś. 2. 4. **-11** Hot; disagreeable, sharp; Ms. 2. 33. **-12** Harsh, jarring; क्रूरक्वणत्कङ्कणानि Mv. 1. 35. **-रः, -रम्** Boiled rice. **-रः 1** A hawk. **-2** heron. **-3** An uneven sign of the zodiac. **-4** N. of a planet (Rāhu or Saturn). **-5** A kind of horse; तद्वद्वामाश्रयः क्रूरः प्रकरोति धनक्षयम् Śālihotra 15. **-रम् 1** A wound. **-2** Slaughter, cruelty. **-3** Any horrible deed. **-4** Any frightful appearance. *-ind*. In a formidable manner; Mb. 3. **-Comp. -आकृति** *a*. terrible in form. **(-तिः)** epithet of Rāvaṇa. **-आचारः** *a*. following cruel or savage practices; Ms. 4. 246. **-आत्मन्** the planet Saturn. **-आशय** *a*. **1** containing fierce animals (as a river). **-2** of a cruel disposition. **-कर्मन्** *n*. **1** a bloody act. **-2** any hard labour. *-a*. doing a bloody act; अहं क्रूरकर्मा जात्या चाण्डालः K. **-कर्मकृत्** *m*. a rapacious animal; Ms. 12. 58. **-कृत्** *a*. fierce, cruel, unrelenting; **-कोष्ठ** *a*. having costive bowels (unaffected by strong purgatives). **-गन्ध** sulphur. **-चरित, -चेष्टित** *a*. cruel, ferocious. **-दृश्** *a*. **1** evil-eyed, having a malignant look; Ks. 62. 27. **-2** mischievous, villainous. (*-m*.) N. of Saturn; also of Mars. **-राविन्** *m*. a raven **-लोचनः** an epithet of the planet Saturn.

क्रोञ्चः N. of a mountain; see क्रौञ्च.

क्रोडः [क्रुड् घनीभावे संज्ञायां घञ्] **1** A hog; भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना Bhāg. 7. 2. 1. **-2** The hollow of a tree, cavity; हा हा हन्त तथापि जन्मविटपिक्रोडे मनो धावति Udb. **-3** The chest, bosom, breast; क्रोडीकृ to clasp to the bosom; क्रोडीकरोति प्रथमं यथा जातमनित्यता। धात्रीव जननी पश्चात्तथा शोकस्य कः क्रमः॥ Nāg. 4; Bh. 2. 35. **-4** The middle part of anything; Vikr. 11. 75; see क्रोड (*n*.)–5 An epithet of the planet Saturn. **-डम्, -डा 1** The breast, chest, the part between the shoulders; Rām. 5. 24. 40. **-2** The interior of anything, a cavity, hollow; उदयास्ताचलावेतौ यत्क्रोडे बाल्यवार्धके Mv. 7. 23. **-3** The breast of a horse. **-4** The lap; U. 4. **-डी** A sow; हा वत्स्यामि कथं क्रोडीगर्भे Ks. 53. 120. **-Comp. -अङ्कः, -अङ्घ्रिः, -पादः** a tortoise. **-कान्ता** the earth. **-पत्रम् 1** marginal writing. **-2** a post script to a letter. **-3** a supplement. **-4** a codicil to a will.

क्रोडीकृ To clasp, to embrace; क्रोडीकरोति प्रथमं यदा जातमनित्यता Nāg. 4. 8.

क्रोडीकरणम् Embracing, clasping to the bosom.

क्रोडीमुखः A rhinoceros.

क्रोधनिन् *m*. Designation of an elephant in the fifth stage; Mātaṅga L. 9. 16.

क्रोष्टु -ष्टृ *m*. (**-ष्ट्री** *f*.) [क्रुश्-तुन् Uṇ.1.69] A jackal (the strong cases of this word are necessarily formed from क्रोष्टृ and the weak ones optionally); so क्रोष्टुक Y. 1.148. क्रोष्टारोऽभ्यद्रवन्सर्वे संरब्धा हतबान्धवाः Bhāg. 10. 15. 36.... त्रस्यत् क्रोष्टुकुलाकुला Śiva. B. 22. 68. **-Comp. -शीर्षम्, -क्रोष्टुकशिरस्** a disease of the knee; Suśr. 2. 1. 75.

क्रोष्ट्रीयाः Followers of the school of grammar started by क्रोष्टु; क्रोष्ट्रीयाः पठन्ति Mbh. on P. I. 1. 3.

क्रौञ्चः [क्रुञ्च् प्रज्ञा° अण्] **1** A curlew, heron; मनोहरक्रौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः Ṛs. 4. 8; Ms. 12. 64. क्रौञ्चो विषाभ्याशे माद्यति Kau. A. 1. 20. 17. **-2** N. of a mountain (said to be the grandson of Himālaya and said to have been pierced by Kārtikeya and Paraśurāma); हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् Me. 59. क्रौञ्चं भिन्नो मद्बाणवेगेन क्रौञ्चत्वं वा गमिष्यति Pratimā. 5. 12; क्रौञ्चं यथा गिरिवरं युधि कार्तिकेयम् Abhiṣeka 6.7. **-Comp.-अदनम्** the fibres of the stalk of a lotus. **(-नी)** the seed of lotus.**-अरातिः, -अरिः, -रिपुः 1** an epithet of Kārtikeya. **-2** of Paraśurāma. **-दारणः, -सूदनः** an epithet (1) of Kārtikeya, (2) of Paraśurāma. **-वर्णः** a kind of horse. Mb. 7. 23. 26; cf. com. as–' सितलोमकेसराढ्याः कृष्णत्वग्गुह्यलोचनोष्ठखुराः। ये स्युर्मुनिभिर्वाहा निर्दिष्टाः क्रौञ्चवर्णास्ते॥'

क्रौड *a*. **1** Belonging to a hog; क्रौडीं तनुम् Bhāg. 2.7.1. **-2** Relating to Viṣṇu's Avatāra as a hog; क्रौडे हतो दितिज उद्धरतोऽम्भसः क्ष्माम् Bhāg. 11. 4. 18.

क्रौर्यम् **1** Cruelty, hard-heartedness; Ms. 12. 33. **-2** Terribleness.

क्रौशशतिकः **1** A mendicant who walks a hundred Krośas. **-2** One who deserves to be approached from distance of 100 Krośas (as a teacher).

क्रौष्टुकिः N. of a grammarian; of an astrologer.

क्लथ् 1, 9 P. **1** To kill, hurt. **-2** To turn round, revolve.

क्लन्द् I. 1 P. (क्लन्दति, क्लन्दित) **1** To call out. **-2** To cry, lament, weep. -II 1 Ā. (क्लन्दते or क्लदते) To be confused. **-2** To grieve.

क्लम् 1, 4. P. (क्लामति, क्लाम्यति, क्लान्त) To be fatigued or tired, be exhausted or depressed; न चक्लाम न विव्यथे Bk. 5. 102; 14. 101. **-2** To feel sorry, pine for; Ś. 6.

-*Caus*. (क्लमयति-ते) To fatigue, exhaust, depress, wither; प्रियाशोको जीवं कुसुममिव घर्मो क्लमयति U. 3. 30. (v. l.).

क्लमः, क्लमथः, क्लमथुः Fatigue, languor, exhaustion; विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः Śi. 4. 66; Ms. 7. 151; Ś. 3. 20.

क्लान्त *p. p.* [क्लम्-क्त] 1 Fatigued, tired out; तमातपक्लान्तम् R. 2. 13, Me. 37; V. 2. 23. **-2** Withered, faded: क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः Ś. 3. 25; R. 10. 48. **-3** Lean, thin, emaciated. **-4** Depressed in spirits, exhausted. **-Comp. -मनस्** *a.* languid, low spirited.

क्लान्तिः *f.* [क्लम्-क्तिन्] Fatigue. **-Comp. -च्छिद्** *a.* refreshing, invigorating.

क्लुच् 4 Ā. (क्लुच्यते) To fear, be afraid (according to some 1 Ā. also).

क्लिद् 4 P. (क्लिद्यति, क्लिन्न) To become wet, be damp, be moist. -*Caus*. To moisten, wet; न चैनं क्लेदयन्त्यापः Bg. 2. 23; Bk. 18. 11.

क्लिन्न *a.* **1** Wet, moistened; running (as an eye). **-2** Rotted, putrified; Charak 1. 11, 27. **-3** Soft, moved (as heart); क्लिन्नधियं च मातरम् Bhāg. 4. 3. 10; 9. 11. 5. **-Comp. -अक्ष** *a.* blear-eyed. **-वर्त्मन्** *n.* watering of the eyes. **-हृद्** *a.* tender-hearted.

क्लेदः [क्लिद्-भावे घञ्] **1** Wetness, moisture, dampness; Śānti 1. 29; तदञ्जनक्लेदसमाकुलाक्षम् R. 7. 27. **-2** Running, discharge from a sore; Ms. 7. 55. 23. **-3** Distress, suffering; कुशलवोन्मृष्टगर्भक्लेदः R. 15. 32 (= उपद्रव Malli.)

क्लेदक *a.* Wetting, moistening. **-कः 1** Phlegm. **-2** One of the fires in the body.

क्लेदन् *m.* The moon.

क्लेदन *a.* [क्लिद् णिच्-ल्युट्] Wetting, making wet. **-नः** Phlegm. **-नम् 1** Wetting, moistening. **-2** Trickling, oozing.

क्लेदित *a.* Soiled; Subh.

क्लेदुः 1 The moon. **-2** Morbid combination of the three humors of the body (संनिपात).

क्लिन्द् 1 U. (क्लिन्दति-ते) To lament.

क्लिब् *f.* Ved. The created world; क्लिबे स्मर कृतं स्मर Vaj. 40. 15.

क्लिश् 4 Ā. (also P. according to some authorities) (क्लिश्यते, क्लिष्ट or क्लिशित) **1** To be tormented, be afflicted, suffer; अप्युपदेशग्रहणे नातिक्लिश्यते वः शिष्या M. 1; त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम् Ms. 8. 169. **-2** To torment, molest; भक्तं मां मातिचिक्लिशः Bk. 6. 17. -II 9 P. (क्लिश्नाति, क्लिष्ट, क्लिशित) **1** To torment, afflict, molest, distress; क्लिश्नाति लब्धपरिपालनवृत्तिरेव Ś. 5. 6; एवमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् Ku. 2.40; R. 11. 58. **-2** To suffer, feel pain.

क्लिश्नत् *a.* Dispelling, removing; शीतांशोरंशुजालैर्जलधरमलिनां क्लिश्नती कृत्तिभैमीम् Mu. 3. 20. (v. l. क्लिन्दत्).

क्लिशित,-क्लिष्ट *p. p.* **1** Distressed, suffering pain or misery. **-2** Afflicted, tormented. **-3** Faded. **-4** Inconsistent, contradictory; *e. g.* माता मे वन्ध्या. **-5** Elaborate, artificial (as a composition.). **-6** Put to shame. **-7** Wearied; hurt, injured. **-8** Being in a bad condition, worn; पीतेनैकेन संवीतां क्लिष्टतोत्तमवाससा Rām. 5. 15. 21. **-9** Marred, impaired; Ś. 5. 19; Pt. 1. 11; Ś. 6. 10; disordered, Ś 7. 14. **-10** Dimmed, made faint; हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः Ku. 2. 19. **-11** Injured, hurt; Ś. 6. 19. **-12** Bothersome, tedious; यथा शरीरो बालस्य गुप्तः सान्क्लिष्टकर्मणः Rām. 7. 75. 4. (the commentator Rāma Tilaka gives क्लिष्टकर्मणः = शुभाचारस्य, which seems doubtful). **-ष्टम्** A contradictory statement. **-Comp. -वर्त्मन्** *n.* a disease of the eyelids.

क्लिष्टा *f.* A kind of चित्तवृत्ति as laid down in the पातञ्जलयोगशास्त्र.

क्लिष्टिः *f.* **1** Affliction, anguish, distress, pain. **-2** Service.

क्लेशः [क्लिश्-भावे घञ्] **1** Pain, anguish, suffering, distress, trouble; किमात्मा क्लेशस्य पदमुपनीतः Ś. 1; क्लेशः फलेन हि पुनर्नवतां विधत्ते Ku. 5.86; Bg. 12. 5. **-2** Wrath, anger. **-3** Care, trouble. **-4** Worldly occupation. **-5** Sin (in the Buddhist sense); अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः Yoga Sūtra 2. 3. अपि च क्लेशान् विहाय मम शत्रुबुद्धिरेव नान्यत्र Nāg. 3; अनुकम्प्यतामसौ राज्यस्य कृते क्लेशदासीकृतो तपस्वी *ibid.* **-Comp. -अपह** *a.* allaying pain, consoling, palliative. (**-हः**) a son. **-कर** *a.* causing pain or trouble. **-क्षम** *a.* capable of enduring trouble.

क्लेशक *a.* [क्लिश्-वुञ्] Giving pain, troublesome.

क्लेशलः Pain; तेषामसौ क्लेशल एव शिष्यते Bhāg. 10. 14. 4.

क्लेशित *a.* Pained, distressed; Mb. 3. 4.

क्लेशिन् *a.* **1** Causing pain or suffering **-2** Hurting, injuring. निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीम् Śi.

क्लीतकिका, क्लीतनी The Indigo plant.

क्लीब् 1 Ā. (क्लीबते) **1** To be impotent, to behave like a eunuch. **-2** (10 Ā) To be timorous, to be modest or unassuming; प्राप्तौ पुरुषकारादि मुक्त्वा क्लीबयसे कथम् Ks. 104. 125.

क्लीब (व) *a.* **1** Impotent, neuter, emasculated; Ms. 3. 150, 4. 205; Y. 1. 223. **-2** Unmanly, timid, weak, weak-minded; R. 8. 84; क्लीबान् पालयिता Mk. 9. 5. **-3** Cowardly. **-4** Mean, base. **-5** Idle. **-6** Of the neuter gender. **-7** Desireless (कामहीन); विद्वान्क्लीबः पश्यति प्रीतियोगात् Mb. 12. 292. 23. **-बः, -बम्** (**-वः, -वम्**) **1** An impotent man, a eunuch; न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति।

मेढ्रं चोन्मादशुक्राभ्यां हीनं क्लीबः स उच्यते ॥ Katyāyana quoted in Dāyabhāga. -2 The neuter gender.

क्लीवता, क्लैब्यम् (व्यम्) 1 Impotence (lit.); वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् Pt. 1. -2 Unmanliness; timidity, cowardice; क्लैब्यं मा स्म गमः पार्थ Bg. 2. 3. -3 Impotence, powerlessness; यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषाम् R. 12. 86.

क्लु 1 Ā. (क्लवते) To move, go.

क्लेश् 1 Ā. (क्लेशते) 1 To speak articulately. -2 To impede, hinder. -3 To strike, kill. -4 To distress.

क्लैतकिकम् Fermented liquor.

क्लोमम्, क्लोमन् *n.* [क्लु गतौ मनिन्] 1 The lungs; Vāj. 25. 8; यकृच्च क्लोमानश्च पर्वताः Bṛi. Up. 1. 1. 1. -2 The bladder; Mv. 3. 32.

क्लोशः Ved. Fear; यदि क्लोशमनु ष्वणि Rv. 6. 46. 14.

क्व *ind.* 1 Whither, where; क्व तेऽन्योन्यं यत्नाः क्व च नु गहनाः कौतुकरसाः U. 6. 33; क्व-क्व when repeated in co-ordinate sentences imply 'great difference' or 'incougruity'; क्व रुजा हृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधम् M. 3. 2; क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः R. 1. 2; Ki. 1. 6; Ś. 2. 19. -2 Sometimes क्व is used in the sense of the loc. of किम्; क्व प्रदेशे *i. e.* कस्मिन्प्रदेशे. क्वचन Somewhere; क्वचन पतनयोग्यं देशमन्विष्यताधः N.; यत्र क्वचन वत्स्यामि Bhāg. 1. 17. 36. न-क्व-च Nowhere, never; नानुभूतं क्व चानेन देहेनादृष्टमश्रुतम् Bhāg. 4. 29. 65. न क्वचन Nowhere; Mb. 14. (*a*) With a following अपि it means (1) somewhere, anywhere; (2) sometimes. (*b*) With a following चित् it means (1) in some places; प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः Ś.1.14; Ṛs.1.2. R. 1. 41; (2) in some cases; क्वचिद् गोचरः क्वचिन्न गोचरोऽर्थः. क्वचित्-क्वचित् (*a*) in one place-in another place, here-here; क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितम् Bh. 3. 125, 1. 4. (*b*) now-now (referring to time); क्वचित् पथा संचरते सुराणां क्वचित् घनानां पततां क्वचिच्च R. 13. 19.

क्वङ्गुः See प्रियङ्गु (Mar. कांग).

क्वत्य *a.* [क्व-त्यप् P. IV. 2. 104] Belonging to what place, being where; ... क्वत्येयं तव दुर्मतिः Bk. 9. 127.

क्वण् 1 P. (क्वणति, क्वणित) 1 To sound (indistinctly), jingle, tinkle; इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन् H. 2. 86; क्वणन्मणिनूपुरौ Amaru. 31. (v.l. रणन्) Ṛs. 3.24; Me. 37. -2 To hum, warble (as bees &c.); sing indistinctly; किंचित्क्वणत्किनरमध्युवास Ku. 1. 54; U. 3. 24; Bk. 6. 84. -3 To blow (flute); वेणुं क्वणन्तम् (कृष्णम्) Bhāg. 10. 15. 42.

क्वणः, क्वणनम्, क्वणितम्, क्वाणः 1 A sound in general. -2 The sound of any musical instrument. **-नः** A small earthen pot or boiler.

क्वणित *a.* Sounded, twanged. -**Comp.** -**ईक्षणः** a vulture. **-वेणु** *a.* one who has breathed the flute; श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् Bhāg. 10. 21. 12.

क्वाणः Sound; सरत्नकङ्कणक्वाणवितीर्णकरतालिके Ks. 120.106.

क्वथ् 1 P. (क्वथति, क्वथित) 1 To boil, decoct. -2 To digest.

क्वथः A decoction, solution prepared with a continued or gentle heat.

क्वथनम् [क्वथ्-ल्युट्] Boiling, decocting; समेत्य सद्यः क्वथनेन फेनताम् Ki. 16. 57.

क्वथित *a.* [क्वथ्-क्त] 1 Boiled, decocted; पक्षान्तयोर्वाऽप्यश्नीयाद्यवागूं क्वथितां सकृत् Ms. 6. 20. -2 Hot; अश्रुधाराः प्रमुञ्चन्ती संतापक्वथिताङ्गका Ks. 90. 61. **-तम्** Spirituous liquor (prepared with honey).

क्वाथः [क्वथ्-करणे घञ्] 1 A decoction, solution prepared with a continued or gentle heat. -2 The mixture of the materials for decoction. -3 Pain, sorrow, distress. **-Comp.** **-उद्भवम्** blue vitriol used a collyrium. (Mar. मोरचूद.)

क्वाचित्क *a.* (**-त्की** *f.*) Met with occcasionally, rare, unusual; इति क्वाचित्कः पाठः

क्वेल् 1 P. (क्वेलति) To shake, move.

क्षः 1 Destruction. -2 Disappearance, loss. -3 Lightning. -4 A field. -5 A farmer. -6 Viṣṇu in his 4th or Narasiṁha incarnation. -7 A demon.

क्षञ्ज्, क्षज् 10 U. (क्षञ्जयति-ते) To live in distress or pain. -1 Ā. (क्षजते) To kill. -1 Ā. (क्षञ्जते) 1 To go. -2 To give.

क्षण् (न्) 8 U. (क्षणोति, क्षणुते, क्षत) 1 To hurt, injure; इमां हृदि व्यायतपातमक्षणोत् Ku. 5. 54. -2 To break (to pieces); (धनुः) त्वं किलानामितपूर्वमक्षणोः R. 11. 72; (with **परा,-परि, -वि** used in the same senses as क्षण्).

क्षणः, -णम् [क्षणोति दुःखं क्षण्-अच्] 1 An instant, moment, measure of time equal to $\frac{4}{5}$ of a second; न हि कश्चित्क्षणमपि Bg. 3. 5; क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः R. 1. 73; 2. 60; Me. 26; क्षणमवतिष्ठस्व wait a moment. -2 Leisure; अहमपि लब्धक्षणः स्वगेहं गच्छामि M. 1; Pt. 1. 138; गृहीतः क्षणः Ś. 2 'my leisure is at your disposal' *i. e.* I pledge my word to do your work. -3 A fit moment or opportunity; रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः Pt. 1. 138; Me. 64; अधिगतक्षणः Dk. 147. -4 An auspicious or lucky moment. -5 A festival, joy, delight; तदेव वीरोऽभिजगाम तोरणं कृतक्षणः काल इव प्रजाक्षये Rām. 5. 47. 38. -6 Dependence, servitude. -7 The centre, the middle. -8 A certain day of the fortnight (as the full moon). -9 Rule, resolution; गन्तुं भूमीं कृतक्षणाः

Mb. 1. 64. 51. (In comp. क्षण is translated by 'momentary', 'temporary'. **क्षणात्, -क्षणेन** in a moment, at once, immediately). **-क्षणेक्षणे** *ind.* Every instant, moment; क्षणेक्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः आरब्धैर्व्यसनैर्भूम्ना क्षीणकोशः क्षणे क्षणे Rāj. T. 5. 166. **-Comp. -अन्तरे** *ind.* the next moment, after a little while. **-अर्धम्** half a moment, small space of time. **-क्षेपः** a momentary delay. **-दः** an astrologer. (**-दम्**) 1 night-blindness. -2 water. (**-दा**) 1 night; क्षणादथैष क्षणदापतिप्रभः N. 1. 67; R. 8. 74; 16. 45; Śi. 3. 53. -2 turmeric. °करः, °पतिः the moon; उदिते क्षणदाकरे Śi. 9. 70. °चरः a night-walker, a demon; सानुप्लवः प्रभुरपि क्षणदाचराणां R. 13 75. °आन्ध्यम् night-blindness, nyctalopsis. **-द्युतिः** *f.* **-प्रकाशा, -प्रभा** lightning. **-निःश्वासः** the porpoise. **-भङ्गवादः** the doctrine of the continual decay of things (Buddh.); Bādarāyaṇa 2. 1. 18. - **भङ्गुर** *a.* transient, frail, perishable; मृगतृष्णासमं वीक्ष्य संसारं क्षणभङ्गुरम् H. 4. 130. **-मात्रम्** *ind.* for a moment; क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः R. 1. 73. **-रामिन्** *m.* a pigeon. **-विध्वंसिन्** *a.* perishable in a moment. (*-m.*) a class of atheistic philosophers who deny the continued identity of any part of nature, and maintain that the universe perishes and undergoes a new creation every instant. **-वीर्यम्** an auspicious moment (क्षण, मुहूर्त).

क्षणतुः A wound, sore.

क्षणनम् Injuring, killing, wounding.

क्षणिक *a.* [क्षणः स्वसत्ताव्याप्यतयाऽस्त्यस्य ठन्] Momentary, transient; स्वप्नेषु क्षणिकसमागमोत्सवैश्च R. 8. 92; एकस्य क्षणिका प्रीतिः H. 1. 64. **-का** Lightning. **-Comp. -आलयम्** a temple where temporary idols are worshipped; Māna. 61. 127.

क्षणिन् *a.* (**-नी** *f.*) 1 Having leisure. -2 Momentary. -3 Having a festival. **-नी** Night.

क्षणेपाकः An article cooked in a moment.

क्षत् *f.* 1 Killing. -2 Tearing. -3 Injury, hurt.

क्षत *p. p.* [क्षण्-क्त] 1 Wounded, hurt, injured, bitten, torn, rent, broken down &c.; see क्षण्; रक्तप्रसाधितभुवः क्षतविग्रहाश्च Ve. 1. 7; Ku. 4. 6; R. 1. 28; 2. 56; 3. 53. -2 Diminished; trodden. **-तम्** 1 Scratching, a scratch. -2 A wound, hurt, injury; क्षते प्रहारा निपतन्त्यभीक्ष्णम् Pt. 2. 178; क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम् U. 4. 7; क्षारं क्षते प्रक्षिपन् Mk. 5. 18; नख° Ku. 3. 29. -3 Danger, destruction, peril; क्षतात् किल त्रायत इत्युदग्रः R. 2. 53. **-Comp. -अरि** *a.* victorious. **-आस्रवम्** Blood; Bhag. 3. 18. 19. **-उदरम्** dysentery. **-कासः** a cough produced by injury. **-जम्** 1 blood; स च्छिन्नमूलः क्षतजेन रेणुः R. 7. 43; Ve. 2. 27; Rām. 5. 10. 19. -2 puss, matter. **-योनिः** *f.* a violated woman, a woman who is no longer a virgin. **-विक्षत** *a.* mangled, covered with cuts and wounds. **-वृत्तिः** *f.* destitution, being deprived of any means of support; क्षतवृत्तिर्वने नित्यं फालकुद्दाललाङ्गली Rām. 2. 32. 29. **-व्रतः** a student who has violated his vow or religious engagement. **-हरम्** aloewood.

क्षतिः *f.* [क्षण्-क्तिन्] 1 Injury, wound; द्विषां क्षतीर्याः प्रथमे शिलीमुखा विभिद्य देहावरणानि चक्रिरे Ki. 14. 55. -2 Destruction, cutting, tearing down; विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले Ś. 2. 6. -3 (Fig.) Ruin, loss, disadvantage; सुखं संजायते तेभ्यः सर्वेभ्योपीति का क्षतिः S. D. 37. -4 Decline, decay, diminution; प्रतापक्षतिशीतलाः Ku. 2. 24; H. 1. 114. -5 Death; आचक्षते शुद्धिदमा प्रसूतेरा च क्षते रागमधोक्षजे च Viś. Guṇa 572.

क्षत्तृ *m.* [क्षद् संज्ञायाम् तृच् Uṇ. 2. 91.] 1 One who cuts or carves anything; क्षत्ता वामस्य देव भूरेः Rv. 6. 13. 2. -2 An attendant, a door-keeper; यत् क्षत्तारं ह्वयत्या Av. 9. 6. 1; मुनिः प्रवेशितः क्षत्त्रा कन्यान्तःपुरमृद्धिमत् Bhāg. 9. 6. 43; chamberlain; Ks. 52. 106. -3 A coachman, charioteer; Vāj. 16. 26. -4 A man born of a Śūdra man and Kṣatriya woman; cf. Ms. 10. 9. -5 The son of a female slave; (*e. g.* विदुर); यावतः कृतवान्प्रश्नान्क्षत्ता कौषारवाग्रतः Bhāg. 1. 13. 2. -6 Brahmā. -7 A fish. -8 One who fights from a chariot. -9 The manager of a treasure (कोषाध्यक्ष). -10 A guard (?); Gīrvāṇa; एवमाघोषयत्क्षत्त्रा नन्दगोपः स्वगोकुले Bhāg. 10. 39. 12.

क्षत्रः, -त्रम् 1 Dominion, power, supremacy, might. -2 A man of the Kṣatriya caste, or the Kṣatriya tribe taken collectively; क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रुढः R. 2. 53; 11. 69, 71; असंशयं क्षत्रपरिग्रहक्षमा Ś. 1. 22; Ms. 9. 322; ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् । जयत्यजितमत्यन्तम् ... Kau. A. 1. 9. -3 A man of the warrior class, a soldier; क्षत्रप्रताप U. 6. 18; martial or heroic valour; 6. 16; -4 Injury, harm (हिंसा); ' क्षत्रं हिंसा तदर्थं जातं क्षत्रजम् ' -com. of Nīlakaṇṭha on Mb. 12. 189. 5; (क्षत्रजं सेवते कर्म वेदाध्ययनसंगतः ।). **-त्री** 1 A woman of the military caste. -2 The rank of a member of the military caste. -3 Wealth. -4 Water. -5 The body. **-Comp. -अन्तकः** an epithet of Paraśurāma. **-धर्मः** 1 bravery, military heroism; क्षत्रधर्महतः Ms. 5. 98. -2 the duties of a Kṣatriya. **-पः** a governor, satrap; (a word found on coins and inscriptions.) **-पतिः** the possessor of dominion; क्षत्राणां क्षत्रपतिः Vāj. 10. 17; (cf. छत्रपति). **-बन्धुः** 1 a Kṣatriya by caste; Ms. 2. 38. -2 a mere Kṣatriya, a vile or wretched Kṣatriya; (as a term of abuse); cf. ब्रह्मबन्धु; Bhāg. 4. 28. 48. **-विद्या, -वेदः** the science of the warrior class (क्षात्रिय); धनुर्वेद; अध्येमि क्षत्रविद्याम् Ch. Up. 7. 1. 2; क्षत्रवेदविदां श्रेष्ठो ब्रह्मवेदविदामपि Rām. 1. 65. 23.

क्षत्रिन् *m.* A man of the military order.

क्षत्रियः [क्षत्रे राष्ट्रे साधु तस्यापत्यं जातौ वा घः Tv.] 1 A member of the military or second caste; धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते Bg. 2. 31. ब्राह्मणः क्षत्रियो

वैश्यस्त्रयो वर्णा द्विजातयः Ms. 10. 4. The Mahābhārata (Śāntiparvan) says: ब्राह्मणानां क्षतत्राणात्ततः क्षत्रिय उच्यते । −2 A kind of horse; क्षत्रिया वह्निसंभवाः Śālihotra, Appendix II, 14. **−यम्** The rank or power of the Kṣatriya class; Rv. 4. 12. 3. **−Comp. −धर्मः** See क्षत्रधर्मः; Ms. 10. 81. **−हनः (−णः)** an epithet of Paraśurāma; Mb. 5. 178. 89.

क्षत्रियका, क्षत्रिया, क्षत्रियिका A woman of the Kṣatriya caste; Mb. 1. 2. 318.

क्षत्रियाणी [P. IV. 1. 49. Vārt. 7] 1 A woman of the Kṣatriya caste. −2 The wife of a Kṣatriya.

क्षत्रियी The wife of a Kṣatriya.

क्षद् 1 Ā. (क्षदते) Ved. 1 To cut. −2 To kill; जारः कनीन इव चक्षदान Rv. 1. 117. 18. −3 To consume, eat; Rv. 1. 25. 17. −4 To cover, protect. −5 To distribute (food); तस्मै घृतं सुरां मध्वन्नमन्नं क्षदामहे Av. 10. 6. 5.

क्षदनम् 1 Carving, dividing, tearing. −2 Eating.

क्षद्मन् *n.* [क्षद् भक्षणे मनिन्] 1 Water. −2 Food.

क्षन्द् See क्षुन्द् below.

क्षप् 1 U. (क्षपति-ते, क्षपित) To fast, to be abstinent; अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव च Ms. 5. 69. −*Caus.* or 10 U. (क्षपयति-ते, क्षपित) 1 To throw, send, cast. −2 To miss.

क्षपित *a.* Destroyed, diminished; क्षपिता तावद्विटपाश्रया लता R. 8. 47; Bhāg. 4. 31. 6.

क्षप् *f.* Ved. 1 Night. −2 A measure of time. −3 Darkness; क्षपो जिन्वन्तः पृषतीभिर्ऋष्टिभिः Rv. 1. 64. 8. −4 Water.

क्षपः Water.

क्षपणः A Bauddha mendicant. **−णम्** 1 Defilement, impurity (अशौच); सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम् Ms. 5.71. −2 Destroying, suppressing, expelling. −3 Fasting; चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते Mb. 13. 106. 13. −4 Abstinence, chastisement of the body.

क्षपणकः A Bauddha or Jaina mendicant; नग्नक्षपणके देशे रजकः किं करिष्यति Chān. 110; कथं प्रथममेव क्षपणकः Mu.4.

क्षपणी 1 An oar. −2 A net.

क्षपण्युः An offence.

क्षपा [क्षपयति चेष्टाम्; क्षि-णिच् अच्] 1 A night; विगमयत्युन्निद्र एव क्षपाः Ś. 6. 5; R. 2. 2; Me. 112. −2 Turmeric. **−Comp. −अटः, −चरः** 1 night-stalker. −2 a demon, goblin; ततः क्षपाटैः पृथुपिङ्गलाक्षैः Bk. 2. 30; 5. 64; 8. 56; दनुजः स्विदयं क्षपाचरो वा Ki. 13.8; Rām. 5.2.53. **−आन्ध्यम्** night-blindness. **−करः, −नाथः** 1 the moon; क्षिप्रं क्षपानाथ इवाधिरूढः Śi. 3. 22. −2 camphor. **−घनः** a dark cloud. **−चरः** a demon, goblin.

क्षम् 1 Ā., 4 P. (क्षमते, क्षाम्यति, चक्षमे, चक्षाम, क्षान्त or क्षमित) 1 To permit, allow, suffer; अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य R. 7. 34; 12. 46. −2 To pardon, forgive (as an offence); क्षान्तं न क्षमया Bh. 3. 13; क्षमस्व परमेश्वर; निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः R. 14. 58. −3 To be patient or quiet, wait; स मुहूर्तं क्षमस्वेति (v. l. सहस्वेति) द्विजमाश्वास्य दुःखितम् R. 15.45. −4 To endure, put up with, suffer; अपि क्षमन्तेऽस्मदुपजापं प्रकृतयः Mu. 2; नाज्ञाभङ्गकरान् राजा क्षमेत स्वसुतानपि H. 2. 105. −5 To oppose, resist; Rām. 7. 58. 6. −6 To be competent or able (to do anything); ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः Śi. 1. 38, 9. 65. −*Caus.* To beg pardon, forgive; एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् Bg. 11. 42.

क्षन्तव्य *pot. p.* 1 To be borne or endured. −2 Pardonable, fit to be forgiven; उक्तं मया प्राक्क्षन्तव्यमेतस्मान्मेऽपराधतः Ks. 119. 53.

क्षन्तृ *a.* [क्षम्-तृच्] Patient, enduring, forbearing, submissive.

क्षम् *f.* Ved. The ground, earth.

क्षम *a.* [क्षम्-अच्] 1 Patient (said of the earth); विमृग्वरीं पृथिवीमा वदामि क्षमां भूमिं ब्रह्मणा वावृधानाम् Av. 12. 1. 29. −2 Enduring, submissive; अतोऽत्र किंचिद्भवतीं बहुक्षमाम् Ku. 5. 40. −3 Adequate, competent, able (with gen., loc., inf. or in comp.) मलिनो हि यथादर्शो रूपालोकस्य न क्षमः Y. 3. 141; सा हि रक्षणविधौ तयोः क्षमा R. 11. 6; हृदयं न त्ववलम्बितुं क्षमाः R. 8. 60; गमनक्षम, निर्मूलनक्षम &c. −4 Appropriate, fit, proper, suitable; तन्नो यदुक्तमाशिवं न हि तत्क्षमं ते U. 1. 14; आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः R. 1. 13; Ś. 5. 27. −5 Fit for, capable of, suited to; उपभोगक्षमे देशे V. 2; तपःक्षमं साधयितुं य इच्छति Ś. 1. 18; स्पर्शक्षमं रत्नम् 1. 27; 7. 5. −6 Bearable, endurable. −7 Favourable, friendly. −8 Worthy; यूयमेव स्तवक्षमाः Mv. 1. 26. **−मम्** 1 Propriety, fitness. −2 Battle, war. **मः** N. of Śiva.

क्षमणीय *a.* 1 To be borne, patiently borne. −2 To be pardoned or forgiven.

क्षमा [क्षम्-अङ्] 1 Patience, forbearance, forgiveness; क्षमा सत्यं दमः शमः Bg. 10. 4, 34; 16, 3; क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम् H. 2; R. 1. 22; 18. 9; तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः Śi. 2. 83. −2 The earth. −3 The number 'one'. −4 An epithet of Durgā. **−Comp. −जः** the planet Mars. **−भुज्, −भुजः** a king. **−भृत्** *m.* 1 a mountain. −2 a prince; प्रातिष्ठन्त क्षमाभृताम् Śi. 19. 30.

क्षमावत्, क्षमान्वित, क्षमायुक्त *a.* 1 Patient, indulgent. −2 Knowing what is proper or right; Rām. 5.

क्षमापयति Den. P. To ask any one's pardon, beg pardon; क्षमापय महाभागं ततः शान्तिर्भविष्यति Bhāg. 9. 4. 71.

क्षमापनम् Begging pardon. क्षमापनैश्च सा देवी प्रसन्नवदनाम्बुजा Parṇal. 4. 47.

क्षमितृ *a.* (**–त्री** *f.*), **–क्षमिन्** *a.* (**–णी** *f.*) 1 Patient, forbearing, of a forgiving nature; समदुःखसुखः क्षमी Bg. 12. 13. कामं क्षाम्यतु यः क्षमी Śi. 2. 43; Y. 2. 200, 1. 133. –2 Capable, able.

